तिकं ३० वल्मीकंचशनैर्भित्वादेहंप्रक्षाल्यतज्जलैः उत्तिष्ठोत्तिष्ठभोवत्सवल्मीकाच्छादितंवपुः
३१ पश्यरक्षस्वसततंसर्वधर्मास्यदंवपुः धिक्त्वांपाषाणहृदयंधिक्तपःकायशोषणं ३
२ किंयातास्तपसावत्सतवपूर्वेपितामहाः उन्मीलयदृशौवत्सभुंक्ष्वस्वादुतरंफलं ३३ इत्यक्षे
र्गदितेमारेध्यानाच्चलितहृत्तदा ददतंस्वादुपक्वानिपुत्रवत्सेतिवादिनं ३४ स्खलमानंयष्टिह
स्तंजरत्कायकृशोदरं प्रबुद्धोमुनिराईलःकिंचित्कुद्धोददर्शसः ३५ तस्मिंश्चकाले
चचार्वंगीसमायातातिलोत्तमा

ते तस्मात्कैलासयोग्योयंयाम्यागच्छत्तमाचिरं ७२ सूतउवाच इत्युक्त्वाययुःशैवाःशिव
लोकंतदन्विताः सप्तकोटीश्वरंक्षेत्रंदर्शनात्पुण्यदायकं ७३ सेवनाच्छिवसायुज्यं भवत्येवनसंश
यः इत्यादिम०अष्टादशोध्यायः ऋषयऊचुः सह्यपूर्वेदृषत्सूतनदीःक्षेत्राण्यादिकान् म
हर्षीणांचतीर्थानांमहिमानंवदस्वनः १ इत्याकर्ण्यवचस्तेषांसूतःपौराणिकोत्तमः प्रोवाचवच
नंधीमान्मुनीनाह्लादयन्गिरा २ सह्याद्रिपूर्वदिग्भागेतदुत्पन्नामहानदी भीमरथ्याक्रयापुण्या
स्मृतमात्राघनाशिनी ३ दर्शनात्स्पर्शनात्तस्याः साक्षात्कैलासदायिनी देवर्षिपितृसंघानांसद्य
स्तृप्तिकरीशुभा ४ श्रीशैलाद्रिंचनिर्भिद्यपूर्वसागरगामिनी महर्षीणांचतत्तीरेकुटजानिबहू
निह ५ विश्वामित्रभरद्वाजकण्वयांगिरसादयः तत्रस्नात्वातपस्तप्त्वामहतींसिद्धिमापिरे ६
इंद्रोजारत्वपापेनगुरुवाक्यात्परिच्युतः सोपिभीमरथींगत्वाविष्णुंप्रतितपश्चरन् ७ तद्वाक्या

विकार्यैश्चोदितः ४६ यस्मान्मारवृथामोहमानंदीवहुरास्त्विह शिवनेत्राग्निदग्धोभूःसर्वदाकाय
वर्जितः ४७ सूतउवाच इतिश्रुत्वामुनिस्तोचशमयित्वाक्रुधंतदा पुनश्चित्तंसमाधायशिवध्यानपरो
भवत् ४८ तिलोत्तमाभयाविष्टहृदयात्रीअगामिनी स्वर्लोकंसासमासाद्यइंद्रायेवंन्यवेदयत् ४९
एवंबहुतिथेकालेगतेस्वारोचिषेंतरे लोकान्द्रष्टुंययाविंद्रश्चादयित्वास्वकांतनुं ५० दृष्ट्वाद्वीपान्च
हुविधान्देशान्ग्रामानेकशः क्रमाद्गोदावरींप्राप्यगोतमाश्रममुत्तमं ५१ बहुशिष्यगणोपेतंवे
दघोषसमन्वितं दृष्ट्वागंतुमनाविप्रस्तदाहल्योददर्शह ५२ ऋतुस्नातांकांतिमतींभासयंतींदिशोद
शा दृष्ट्वातांचकमेशक्रोमन्मथाविष्टचेतनः ५३ तदाचिंतापरोभूत्वानचचालपदात्पदं विडोजास्तत्त
टिपुण्येविजनेचनिकुंजके ५४ उषित्वाचिंतयामासऋषिस्त्रीकंसमागमं इत्थंचित्तोभून्मुदितेनांतरा
त्मना ५५ रात्र्यास्तृतीययामेपिकुक्कुटध्वनिमास्मरन् कृत्वास्वरंगो × निश्चित × तमोपितल्पाद्

त्थायवेगतः गोदावर्यांपुण्यनद्यांस्नातुकामोबहिर्ययौ इंद्रस्तदोटजंप्राप्यशचीनेदूरंनिरस्यच ५७ स्व
पंतींशयनेहत्वाजग्राहेंद्रःशरार्दितः चुचुंबास्यंतुवेगेनकिमेतदितिसावदत् ५८ स्नात्वाशुद्धतुनु
र्भूत्वानित्यकर्मसमाप्यच किमेतत्क्रियतेभर्तरित्युक्तस्तमथाब्रवीत् ५९ अधिकारःस्त्रियस्त्वय
अस्नात्वागतोस्म्यहं इत्युक्तेंद्रस्तदारेमेतावधंत्वयथेछतः ६० गौतमोपिनदींगत्वास्वपंतींतांनिरी
क्ष्यच नक्षत्राणितथादृष्ट्वामध्यरात्रममंसत ६१ किमेतदितिसंचिंत्यपुनःस्वनिलयंययौ प्राप्योट
जंरमंतंचइंद्रंदृष्ट्वाचुकोपह ६२ धिक्षन्निवलोकांस्त्रीन्भर्त्सयंस्तर्जयन्द्रुतंदेवप्रांतरे भीताअह
ल्याभयविक्लया ६३ अयेजारपतेशक्रकुमार्गःस्वीकृतस्त्वया तवलोकेस्त्रियःसर्वास्त्वतिसौंदर्य
रूपिणः ६४ रमयित्वापिताःसर्वास्त्वयातास्तथापिन त्वदंगानिचसर्वाणिभगाकाराणिसंत्व
हो ६५ इंद्रंज्ञात्वामुनिश्चेत्यंनिरस्यनिलयाद्बहिः अहल्यांचाशपत्क्रुद्धःशिलाभवदुराचरे ६६

अहिल्याशापसंविग्नादुःखशोकभयाकुला॥ पपातपादयोस्तस्यसमस्वाज्ञानसंभवा॥६७॥किल्बिषंभर्तुरच
रंज्ञात्वानुग्रहभाग्भव॥इतितस्यावचःश्रुत्वाग्रमयित्वामनःस्वकं॥६८॥पुनराहस्वकांभार्यांभाविकार्यम
नुस्मरन्॥अयेजारिणिदुर्बुद्धेमद्वचोजातुनान्यथा॥६९॥तथापितववात्सल्यात्कृपुमद्वाक्यमंजसा॥य
दादाशरथौरामोजनकाध्वरहेतवे॥७०॥विश्वामित्रेणसहितोगमिष्यतितवोपरि॥तदातत्पादरजसामुक्त
शापाभविष्यसि॥७१॥इत्युक्त्वातांमुनिःपत्नींविससर्जोटजाद्बहिः॥तद्दोषपरिहारायशिवध्यानपरोभव
त्॥७२॥इंद्रश्चापिमुनींद्रेणसर्वत्रभगतांतनो॥दृष्ट्वाभयान्वितोभूत्वासद्यमेवान्ववर्तत॥७३॥एवंकालेग
तेविप्रादेवास्त्विंद्रविनाकृताः॥सदाचिंतापराभूत्वाधिषणेनसमन्विताः॥७४॥मंत्रयांचक्रिरेसर्वेशक्रा
न्वेषणकर्मणि॥ इत्यादिम० एकोनविंशोध्यायः॥ शौनकउवाच॥मंत्रयित्वातदादेवाःकिमकुर्वतसूतज
॥सह्याद्रिकंदरावासीशक्रोवैकिंचकारह॥॥एतत्कथ्यतांनोविस्तार्यवतुमर्हस्यशेषतः॥सूतउवाच॥मंत्र

कायजेनसुगंधेनसुरभीकृतदिक्तटा ३६ कल्पद्रुसुमनोभारकबरीकर्णमल्लिका दिव्याभरणभूषा
ढ्याडुकूलवसनोज्वला ३७ दिव्यचंदनलिप्तांगीपीनोन्नतपयोधरा ईषन्नर्तितपादोद्यद्रणन्मंजीरशो
लिनी ३८ ससर्तत्रीन्त्रणंतीसातस्याअपिस्वरोत्तमा इत्थंतिलोत्तमातस्यसन्मुखंप्रापसुंदरी तदा
भृंगाःकोकिलाश्चमंदंमंदंचकूजिरे पुष्पितास्तरुगुल्माद्याःसर्वेर्तुकुसुमोज्वलाः ४० मदनोत्तद्दी
धेतत्रसंज्ञायापन्नमानसः एतत्सर्वंसमालोक्यमुहुरुःक्रोधमूर्छितः ४१ लोकान्सर्वानेककालेदि
धक्षन्वदनाग्निना तस्यकोपाग्नितप्तासावेपमानकलेवरा ४२ पपातपादयोःसुभ्रूःक्षम्यतांक्षम्य
तामिति सर्वमिंद्रकृतंज्ञात्वामुनिःक्रोधाग्निनाज्वलन् ४३ राज्ञायशक्रंमारंचतपोविघ्नकरावुभौ
यस्मात्तपस्विनंज्ञातंनिर्मलंमांजितेंद्रियं ४४ जारमार्गरतंकर्तुप्रेषयामासजारिणौ तस्माज्जारोभ
वत्विंद्रःपश्चात्तत्फलभाग्भवेत् ४५ इत्थंशप्त्वाचदेवेंद्रंमुहुरुःकुपितोभृशं शशापमारंसहसाभा

तस्यांविधानतः १२ तत्तीरेवसतिंकृत्वामूर्तिंसंस्थाप्यभक्तितः नित्यार्चनपरोभूत्वातपस्तेपेहरिंस्म
रन् १३ एवंतपसियुक्तः स्यान्महाकालोत्यगात्तदा कदाचिद्भक्तिसंतुष्टःप्रादुरासीद्धरिःस्वयं १४
शंखचक्रगदापद्मधारीकौस्तुभभूषणः वनमालीपीतवासागरुडोपरिसंस्थितः १५ तंदृष्ट्वादेव
देवेशंपीतवाससमच्युतं अस्तोषीत्कमलाकांतंभक्त्यावनतकंधरः १६ इंद्रउवाच नमामिविष्णुं
त्रिदशारिनाशनंविशालवक्षःस्थलसंस्थितश्रियं शुभाननंनीतिमतांशुभांगतिंत्रिविक्रमंमंद
रधारिणंसदा १७ दामोदरंरंजितभूतलंश्रियायशोंशुशुभ्रंभ्रमरांगसप्रभं हरिंगुरुंदग्धरिपुं
पुरुष्टुतंनमामिविष्णुंजगतामधीशं १८ त्रिधामतंतिग्मरथांगपाणिंनंनयस्थितंतत्समनोपमै
र्गुणैः निःश्रेयसाख्यंक्षपितेतराशयंनमामिविष्णुंपुरुषोत्तमंपरं १९ इतिस्तुतोमहेंद्रेणहरिः
प्राहदयानिधिः वरंवृणीष्वदेवेंद्रवरदोहंसमागतः २० इतिविश्लोर्वचःश्रुत्वाशक्रः प्राहकृतांजलिः

स्वामिन्सर्वजगन्नाथविश्वोभक्तार्तिनाशन २१ मुनिशापार्तिकुलांगमामुद्धरनमोस्तुते इतींद्रवच
नंश्रुत्वाहरिःप्राहदयानिधिः २२ विप्रशापंमहाक्रूरमयापिननिवारकं अन्योपायंकरिष्यामियथा
तवहितंभवेत् २३ तवदृष्टिस्तदेवास्तुअन्येषांलोचनाकृतिः एतदारभ्यदेवेंद्रसहस्राक्षइतिप्रथां
२४ लोकेगमिष्यसिसदासर्वेषांप्रीतिदायकः इतितस्मैवरंदत्वातत्रैवांतरधीयत २५ इंद्रोपिमुदि
तःप्राप्यस्वर्लोकंपुनरेवसः तदाप्रभृतितत्तीर्थंसर्वेषांभीष्टदायकं २६ विष्णुश्चवरदोभूत्वासर्वानु
ग्रहकारकः तत्रास्तेमुनिवृंदैश्चनारदाद्यैरभिष्टुतः २७ ब्राह्मणक्षत्रियविशःशूद्राश्चमुनिसत्तम
तत्रस्नात्वा हरिंपूज्यलेभिरेवांछितंफलं २८ यइदंशृणुयान्नित्यंपठेद्वाविष्णुसन्निधौ तदाभी
मरथीस्नानफलंप्राप्नोत्यसोनरः २९ इत्यादिम० विंशोध्यायः सूतउवाच तत्पुरस्तान्नदीपु
ण्याकुल्यावेणीसमाख्या महापातकविध्वंसहेतुकीसत्यपादजा १ सत्यशरीरसंभूतानदीहरि

हरात्मिका कृष्णाकृष्णतनुःसाक्षादेणीदेवो महेश्वरः २ तयोरैक्यंपरंब्रह्मकैवल्यफलदायकं
शौनक उवाच कथंहरिहरौदेवौनदीभावमुपाश्रितौ ३ परात्परतरौतौहिनदीत्वंकथमागतौ
एतन्नःश्रद्दधानानामृषीणांभावितात्मनां ४ कृपयावदसर्वज्ञकथांशिवपदानुगां सूतउवाच
शृणुध्वमृषयःसर्वेकथांकल्मषहारिणीं ५ जैमिनीयेपुराकल्पेभगवान्कमलासनः यष्टुकामो
महेशानंभगवंतमुमापतिं ६ चिंतयामासबहुधाक्षेत्रंप्रतिमनोगतं क्षिप्रसिद्धिकरंक्षेत्रंकु
त्रवासंभवेन्मम ७ प्रभासंवाकुरुक्षेत्रंनैमिषंपुष्करंतुवा प्रयागंपुंडरीकंवाबादरंवावदंतु
वा ८ सत्यंवासत्यसंधंवागोकर्णंसेतुमूलकं महेंद्रमलयाद्रीवासह्यंवापारियात्रकं ९
कौमारंभार्गवंजांबवंसौपर्णंक्रोधपर्वतं सह्यामलकतीर्थंचासह्यमूर्ध्निकुटाद्रिकं
१० एवमादिमहापुण्यक्षेत्राणिगिरयोमलाः कुत्रवासंभवेद्देवंयागः शंकरतुष्टिदः

यित्वातदान्योन्यंस्थिरीकृत्यमनःसुराः २ अन्वेषुकामादेवेंद्रंलोकाल्लोकांतरंययुः भूतलंसमनु
प्राप्यदेशान्ग्रामांस्तदाविरे ३ गिरीन्चनानितीर्थानिमुनीनामाश्रमाणिच क्षेत्राणिचातिपुण्यानि
नदीनदसरांसिच ४ स्थलीःस्थलानिरम्याणिदेवतायतनानिच देवाःसत्यांचलंदृष्ट्वाधारातीर्थेप्रवे
दिरे ५ तत्रामरगणाःसर्वेपप्रछुर्वासुकिंतदा सर्वंप्रोवाचदेवेभ्योवासुकिःज्ञापकारकं ६ व्रीडया
वन्नदेहंचतन्निवासस्थलंतदा तेभ्यःसर्वंचविज्ञाप्यवासुकिस्तान्विससर्ज्जवान् ७ ततोदेवातिदुःख
र्तःप्रययुःसत्यवर्त्मनादूरादूरतरंगत्वाकुत्रचित्सत्यकंदरे ८ ध्यायंतंपरमेशानंब्रीडंतंस्वेनकर्म
णा तंदृष्ट्वाधिषणःप्राहसोत्वयंस्तस्यमानसं ९ महेंद्रश्रृणुमद्वाक्यंविप्रशापःसुदारुणः तस्यो
पायंहरिर्वेत्तितन्निवारणकारणं १० तच्चभीमरथींप्राप्यस्नात्वातस्यांविधानतः तपःकुरुहरिंध्या
यंस्तत्तीरेसत्यपादजे ११ इतिजीववचःश्रुत्वाविसृज्यसकलामरान् स्वयंभीमरथींप्राप्यस्नात्वा

गविधिनालप्येहवांछितंफलं २१ क्षिप्रसिद्धिकरंक्षेत्रंकुत्रमेसंभवेद्वद इत्याकर्ण्यविधेर्वाक्यं भृ
गुरूचेप्रहर्षयन् २२ अवधारयदेवेशमद्वाक्यंभारतीपते रामस्तृष्टमहाक्षेत्रंगोकर्णंशंकरालयं
क्षिप्रसिद्धिकरंचैवशिवभक्तिविवर्धनं यत्किंचिच्चकृतंकर्मतदनंतायसंभवेत् २४ भृगोर्वचः
समाकर्ण्यब्रह्मा प्राहतथास्त्विति सरस्वत्याचगायत्र्याभृगुणासहितोययौ २५ हंसयुक्तविमा
नस्थोद्योतयद्दिक्तरंतथा सत्यपश्चिमदिग्भागेगोकर्णंदृष्टवान्विधिः २६ समागंतंतदादृष्ट्वा
यद्भुब्रह्माणमंजसा सत्याचलस्थाऋषयोमहेंद्रमलयादिषु २७ नानाक्षेत्रकृतावासानानातीर्थ
तदाश्रयाः समाजग्मुश्चमुनयःसभार्याःसहशिष्यकाः २८ विश्वामित्रोभरद्वाजःपुलस्त्यःपु
लहःक्रतुः अंगिराश्चवसिष्ठोत्रिःकण्वश्च्यवनगोतमौ २९ मार्कंडेयोमहाभागोमुद्गलोगा
लवस्तथा एवमादिमुनिश्रेष्ठा द्रष्टुकामामहोत्सवं ३० गोकर्णंशंकरक्षेत्रंसमासेदुर्भृगूत्तम

काः ब्रह्मासंभृतसंभारोदेवानाकाययत्तदा ३१ इंद्रः शच्यान्वितःप्रायाल्लोकपालाप्सरोगणैः विद्या
धरैःकिंपुरुषैःकिंन्नरोरगराक्षसैः ३२ देवर्षिभिर्नारदाद्यैः सहितस्त्वरितोभ्यगात् विष्णुर्लक्ष्म्या
न्वितःप्रापवैकुंठनिलयैर्गणैः ३३ देवर्षिद्विजसंकीर्णेशुभेब्रह्मणः सभा कृत्वाध्वर्युर्भृगुं
ब्रह्मास्वयंहोताभवत्तदा ३४ यागारंभंचकारासौमुहूर्तेभृगुनोदिते अनाहूयचविघ्नेशमरु
द्गातस्यप्रजनेन ३५ यागारंभणकेकालेवाणीमाकाययत्तदा स्नात्वालंकृत्यसर्वांगंगंतुकालोवि
लंबितः ३६ कालमासन्नकं ज्ञात्वाभृगुःशास्त्रदवोचत भारतीशास्त्रदाहूतानागताकालवेदि
नी ३७ विज्ञायानागतांब्रह्मागायत्रीमाकयत्तदा गायत्र्यासुसमागत्यकालेगछतिवेगतः
इत्युक्तमात्रागायत्रीदक्षिणेसमुपाविशत् पश्चात्समागतावाणीतांदृष्टाकुपिताब्रवीत् ३९ ए
षाज्येष्ठासनारूढाकनिष्ठापिस्वयंसदा युष्मत्प्रेषणयानेवगायत्र्यारोढुमर्हति ४० मदासनं

समारुत्यस्थितेषाममसन्निधौ अयोग्यासर्वदाचेषाशुनीवाध्वरमंडपं ४२ अमान्यायत्रमान्यंते
मान्यानांचव्यतिक्रमः त्रीणितत्रभविष्यंतिदुर्भिक्षंमरणंभयं ४३ पूज्यानेवसदार्चेतनीचान्यार्चे
कदाचन यद्यर्चेतनरोमोहात्तस्यकार्यंविनश्यति ४४ तेवायूयंमहांतोपिसदाचंचलमानसा
: तस्मान्नद्योभवध्वंवैममशापान्नसंशयः ४५ इतिश्रुत्वासुराचाणीगायत्रीमशपत्तदा गाय
त्र्यपिपुनर्वाणींत्वंचाप्यद्यधुनीभव ४६ इतिश्रुत्वांस्तदादेवान्वाप्याद्दष्ट्वामहर्षयः कथंकार्य
मिदंप्रोचुःसर्वेसमत्र्यभूरिशः ४७ इमंशापंनिरसितुंदेवाअपिनचक्षमाः॥तस्मादुपायःकर्त
व्यस्त्वन्यथालोकसंक्षयः॥४८॥ अप्रार्थयन्सुरावाणीमृषिभिः सहसंगताः॥सरस्वत्यपिसंमत्र्य
स्वशापविनिवारणं ४९ स्यांद्वौनद्योभवध्वंचसर्वलोकोपकारकाः॥अन्यांद्वौदेवतारूपाभव
ध्वमविशंकया॥५०॥ एवंब्रुवंतीश्चपुंदेवाअमर्यःपश्चिमाब्धिगाः॥इतिकृत्वाचसंकेतंभेजि

॥११॥ ॥इतिचिंताकुलेतत्रसभायांभारतीपतौ॥ भृगुरभ्याययौद्रष्टुंब्रह्माणंकमलासनं १२ व
वंदेपादयोस्तस्यभृगुरव्यक्तजन्मनः॥ ब्रह्माभृगुंसमालोक्यप्रीत्यफुल्लविलोचनः १३ स्वसमीपा
सनस्थंचउपवेश्यदयानिधिः॥ प्रोवाचदययाविधाःप्रीत्यापश्यन्मुहुर्मुनीन् १४ ब्रह्मोवाच कुतो
वत्ससमायातस्त्वत्रतेकिंप्रयोजनं॥ मत्सृष्टिः कुशलाकिंवात्वयादृष्टाचकिंमुने १५ इतितस्यव
चःश्रुत्वाशिवभक्तगणाग्रणीः॥ भृगुःप्रोवाचविनयात्तस्मैसर्वकृतांजलिः १६ भृगुरुवाच सृष्टिः
सर्वत्रकुशलाचित्राश्चित्रपराभवत् इदानींममपौत्रेणनिर्मितासर्वसुंदरा १७ पुण्यक्षेत्रगणोपेता
रामसृष्टिर्विचित्रदा कालेकालेवृष्टिकरीत्वयारविवर्जिता १८ तत्रसंतिजनाःसर्वेसदासंतुष्टमा
नसाः क्षिप्रसिद्धिकराग्रामाःखेटाःपुर्यस्तथैकधा १९ भृगोर्वचनमाकर्ण्यब्रह्मालोकपितामहः
प्राहसंतुष्टहृदयोध्यायंश्छिवपदांबुजं २० यष्टुकामोमुनेत्वद्यसर्वधातारमीश्वरं संतोष्यया

वाःक्षुद्रनद्यश्चजज्ञिरे।सर्वेदेवास्तरंगिण्यःस्वर्लोकोपकारकाः॥६१॥यस्मिन्देशेपुण्यनदी
पुण्यक्षेत्रंचनास्तिहि।सदेशःकीकटोनामनगसेत्तत्रवैद्विजः॥६२॥कीकटस्थाद्विजाविप्राजन्म
जन्मनिगर्हिताः।तेराचरितकर्माणिनिष्फलानिनसंशयः॥६३॥उरादेशाविशुध्यर्थंतरंगिण्यो
तिपुण्यदाः।निर्मिताःक्षेत्रनद्यश्चऋषीणामाश्रमाणिच॥६४॥नानाविधानितीर्थानिसर्वलो
कोपकारकः।ब्रह्माऋषिभिरामंत्र्यकृत्वाविघ्नेशपूजनं॥६५॥तस्मैवरंददुःसर्वेकर्मादौपूज्य
कोभवयागंसमाप्यवेब्रह्मादेवर्षिगणसंयुतः॥६६॥कोटितीर्थकृतस्नानावरंलेभेचशंका
रात्॥६७॥इत्थंहरिहरोदेवोनरीभावमुपागतो॥कृत्वावेणीनदीपुण्यासाक्षाद्धरिहरात्मिका
६९॥स्नातानामत्र मर्त्यानांमहापापहराशुभा॥सर्वसंपत्करीपुण्यास्वर्गमोक्षप्रदायिनी॥
६९॥मातृहापितृहाचैवभ्रूणहापशुघातकः॥ब्रह्मघ्नोपिसुरापोपिस्तेयीवागुरुतल्पगः॥७०

तत्संयोगकरोवापितत्रस्नानाद्विमुच्यते श्रावण्यांसोमवारेवाकार्तिक्यांचविशेषतः ७१ स्नात्वापितॄंश्चसंतर्प्यकैलासपदमश्नुते वैशाखेचमुनिश्रेष्ठमासमेकंनिरंतरं ७२ संकल्प्य नियमोपेतःप्रातःस्नात्वाभगोदये तन्तीरेविधिवत्पूजांचकृत्वाद्रोणैःसबिल्वकैः ७३ संभोज्य ब्राह्मणांछुद्धान्वेदशास्त्रसमन्वितान्इत्थंसर्वमनुष्यायेकुर्वंतिभक्तिपूर्वकं ७४ महेंद्रभवनंप्राप्यकुलकोटिसमन्विताःभुक्त्वाभोगाननेकांश्चगत्वाशिवपदंततः ७५ कैलासेतेनकरावासेसुखेननिवसंतिते यइदंपुण्यमाख्यानंश्रृणोतिश्रद्धयानरः कृष्णवेण्यास्नानफलंलभतेनात्रसंशयः ७६ इतिश्रीस्कं० एकविंशोध्यायः ऋषयऊचुः भगवन्सूतसर्वज्ञवानवासीतिसंज्ञयापुरीप्रोक्तामहाबुद्धेकुत्रास्तेसापुरीशुभा १ केनादौनिर्मितावेयंकथंपुण्यतराभवत् एतत्सर्वंचविज्ञायवक्तुमर्हस्यशेषतः २ सूतउवाच श्रृणुध्वंतत्कथांपुण्यामृषयःसंशि

तत्रताः॥सर्वौघौघक्षयकरींश्रोतृणांविस्मयप्रदां॥२॥कस्मादोभगवान्ब्रह्मासृष्ट्वालोकाननेक
शः॥तत्रस्थानांजनानांचसरात्कदनकारिणी॥४॥नदीनदतटाकांश्चपुरीर्निर्मायसत्तच॥पश्चा
दुपपरीःसप्तनिर्मेजगतांपतिः॥५॥तासांनामानिवक्ष्यामिशृण्वंतुमुनिपुंगवाः॥वनवासीकुल
लंभाकाश्मरीकुंडिनीपुरी॥६॥हाहलीमंदरीचेतिउपपुर्यःप्रकीर्तिताः॥कृतेतुकोमुदीप्रोक्ता
त्रेतायांवेंदवीमता॥७॥द्वापरेतुजयंतीस्याद्वानवासीकलौयुगे॥वानवास्यांनरोयस्तुवरदास्त
नकारकः॥८॥षष्टिवर्षसहस्राणिगंगास्नानफलंलभेत्॥नर्मदायांमहानद्यांस्वदेहाघापनुत्तये
॥कार्तिकेवरदांगत्वास्नात्वानित्यमतंद्रिताः॥पुनःस्वस्थानसायांतितस्मात्पुण्यतमानदी॥१०॥त
स्यांस्नानविधिंवक्ष्येशृणुध्वंमुनिपुंगवाः॥रात्र्यांत्रिभागसंशेषेमुत्थायशयनाद्द्विजः॥११॥मनसा
शिवपादाब्जंध्यायन्नानतमानसः॥कृत्वाशौचविधानेनधौतदंतोमलात्रयः॥१२॥संकल्पविधिसंस्नात्सवासाउर्ध्वं

रिस्त्रोतसाकृतिं ५१ ब्रह्मभीमरथीचासीद्धरिःकुल्याहरस्तथा वेणीभद्रा पुनर्विप्रस्तुंगभ
द्विजपुंगवाः ५२ धरेशोवरदास्कंदःकुमुद्वत्यभवत्तदा सरस्वतीचस्वर्द्वागीगायत्रीविरजा
भवत् ५३ संज्ञाचकारजाज्ञेकोमारीशाल्मलीनदी ताम्रगौर्यभिधागंगाचंडीचासीत्तुचंडि
का ५४ अघनाशीकौशिकीचलक्ष्मीचासीछरावती नाम्नासोज्ञीतलाजज्ञेसुषुम्नासुरसाभ
वत् ५५ रंभासुम्नावतीपुण्यासोपर्णेप्राचपार्वती तिलोत्तमाचक्रनदीवाराहीचवसुंधरा ५६
कुल्लाभवच्चतुलसीसुपर्णीविनताभवत् कद्रूश्चकेटकीजातादनुर्वैबहुधर्षिणी ५७ दितिश्च
सांवरीजज्ञेअदितिःकुटजानदी जंघासुकेशिनीजातानदीनामुत्तमानदी ५८ नेत्रावतीचित्र
यष्टीस्कंदस्यातिप्रियंकरी देवसेनाभवद्धारास्वाहेलावतिसंज्ञया ५९ कांक्षाजासीत्स्वधादेवी
रतिःसौम्यछिदाभवत् निलीजाताभद्रकालीछायासीच्चगुणाकरा ६० इत्यादिबहुशोदे

कान्यो विगृहीतवान्॥२३॥सापिकालांतरंनीत्वामृतायममवापसा॥कस्यांतंनिरयेपश्चाज्जन्मान्यने
कशः॥२४॥संप्राप्यक्रमशःसाचपेशाचीयोनिमापहा॥सत्यद्रेश्वमहारण्येविजनेघोररूपिणी॥
२५॥तचारबहुवर्षाणिनिराहारातिदुःखिनी॥कदाचिद्विप्रवर्योहिशिवभक्तगणाग्रणीः॥२६॥वीरे
शनामाधर्मात्मापर्यटन्वसुधातलं॥तीर्थयात्रापरोभूत्वावरान्प्राप्यसद्विजः॥२७॥स्नात्वातस्यांपु
ण्यनद्यांसंपूज्यमधुकेश्वरं॥बिल्वपत्राणिसंगृह्यवीरेशःस्वगृहंययौ॥२८॥तदासत्यारवीमार्गेग
छंतंद्विजसत्तमं॥दृष्ट्वायथौपिशाचीसागंगांसुहृदंप्रयीदिता॥२९॥दृष्ट्वातांदुद्रुवेवेगात्कोहमानो
भयातुरः॥सान्वधावत्तवेगेनतद्धस्तंजगृहेत्वरात्॥३०॥प्राक्षिपद्बिल्वपत्राणिभयात्तदुपरिद्विजः
बिल्वस्यत्रीनमात्रेणत्यक्त्वादूरंततोगता॥३१॥प्राहित्रोहीतिवदतीपपातास्यचपादयोः॥तंदृष्ट्वावि
स्मितोविप्रःकिमेतदितिएष्टवान्॥३२॥तांचतद्वीनायोग्यांघोरारावांकुरूपिणीं॥उवाचभयसंवि

ग्नमनाः शिवपरायणः॥३३॥ वीरेंद्र उवाच॥अयेपिशाचप्रतिरूरेदारुणेभयदायिनि॥तवेदृशंकुरूपं
चकिमर्थंप्राप्तितावद॥३४॥वीरेंद्रवाक्यंसाश्रुत्वास्मृतजन्मांतराधिनी॥इतःपूर्वंपंचदशेजन्मन्यासं
द्विजांगना॥३५॥मार्तंडोनाममेभर्ताचंडिकानाम्न्यहंद्विज॥कदाचिदपिनोभर्तुर्हितकर्त्रीविरोधिनी॥
३६॥नित्यंन्यायाभिभर्तारमाक्षिप्याक्षिप्यरोधिनी॥सदारोषणशीलाचभर्तुर्निकटगामिनी॥नानाविधो
षधैर्मंत्रैःपुरुषान्वशकारिणी॥व्यभिचाररतानित्यमनाचारकरीतथा॥३८॥चोरयित्वाभर्तृवित्तंप
रेषांचप्रदायिनी॥भर्तुर्भुक्तेःपुराभोक्त्रीपाकपात्रेभुनज्म्यहं॥३९॥पतिरुच्छिष्टंतंभुंक्तेकुचेलाधवसं
मुखे॥मार्जेत्यक्त्वखलंचापिदेहेचासीन्ममासनं॥४०॥अपत्र्यंक्रूरदृष्टांतंसदाधर्षरवाहिनी॥मद्य
पानरतानित्यंशूद्रसंघाभिलाषिणी॥४१॥मद्दृक्पथगतंयंवारूपवंतंबलान्वितं॥मंत्रौषधैर्वशानी
त्वारमयित्वायथेच्छतः॥४२॥कदाचिन्मद्भुमत्तार्हंपतिगेहमथाविशं॥एवंविधदुराचारंज्ञात्वामम

तिरेवमां ४३ त्यक्त्वान्यामग्रहीत्सोपिविधिदृष्टेनवर्त्मना पश्चात्कालांतरेचाहं मृतासंयमनींगता
४४ मांदृष्ट्वायमराजोपिभर्त्सयामासभूरिशः घातयेनांताडयेनांबंधयेनांचहेभटाः इत्युक्त्वा
घोररूपोसौमज्जयामासनारके आकल्पंनिरयेवासंयातनाबहुधापिच ४५ भुक्त्वापश्चादादि
देशतिर्यग्योनौशुभांतदा तानिजन्मानितेवक्ष्येस्मृत्वास्मृत्वाबिभेम्यहं ४७ भवेच्चतुर्दशेव्याघ्री
सिंहीचैवत्रयादशे भवेद्द्वादशकेगोधानकुल्यकादशेभवे ४८ दशमेसरटाचाहं नवमेऽजग
रीभवे अष्टमेहंशुनीनीचावाराहीसप्तमेद्विज ४९ षष्ठेभवेताम्रचूडीव्यालीपंचमजन्मनि भवेच्च
तुर्येशलभीकाकासंतृतीयके ५० भवेद्द्वितीयेचांडालीजात्यंधाकुष्ठरोगिणी नासाकर्णेपुरो
पस्रुव्रणकीटगणाकुला ५१ मामधस्तत्यजुस्तोचपितरोचापिदुर्भगा रुदंतीचरुदंतीचक्षुत्क्षा
मार्तीव्रणाकुलां ५२ आतपातप्तसर्वांगीविवस्त्रांगंतुमक्षमा एवंविधांमांपथिकः कश्चिद्द्वि

नदीसंप्रार्थयेत्सर्वमवगाहाघनुत्तये ॥१३॥ सत्यपादोद्भवेदेविश्रीशैलोत्तुंगगामिनि त्वयिस्नानंक
रोम्यद्यवरदेपापहारिणि ॥१४॥ गोर्यैत्रभ्रतेवरदेसर्वपापनोदिनि अर्घ्यंगृहाणदेवेशिममसौख्य
प्रदाभव ॥ दत्वार्घ्यंवरदानंद्येपश्चात्स्नानंसमाचरेत् देवानृषींश्चसंतर्प्यधौतवस्त्रोवरः शुचिः ॥१६॥
नित्यकर्मसमावर्त्यमधुकेशंप्रपूजयेत् एवमाचरतःपुंसोजन्मजन्माघसंक्षयः ॥१७॥ भवत्येवनसं
देहोगंगास्नानफलंभवेत् ॥ महादरिद्रश्रमनंसर्वसंपत्प्रदायकं ॥१८॥ महाघोघहरंपुण्यंमधुकेश्व
रपूजनं गंगेववरदापुण्याविश्वेशोमधुकेश्वरः ॥१९॥ वानवासीपुरीकाशीनिःश्रेयसफलप्रदा
अत्रेतिहासंवक्ष्यामिशृणुध्वंमुनिपुंगवाः ॥२०॥ पुरासुबर्बरेदेशेमार्तंडोनामवैद्विजः वेदवेदांग
तत्वज्ञोनित्यकर्मरतःसदा ॥२१॥ अतिथेयोग्निशुश्रूषुर्नित्यंप्राणिहितेरतः तस्यभार्याचंडिका
ख्यापतिद्वेषकरीसदा ॥२२॥ कुचैलाकर्कशाक्रूराभर्तृवाक्यविरोधिनी एवंविधांपतिर्ज्ञात्वात्य

कृत्वाचकरसंपुटं॥६३॥निमग्ननयनाभीतावेपमानशरीरिणी॥पिशाचिश्शृणुमद्वाक्यंवरदापुण्यदानृणां॥६४॥ज्ञानवासीपुरीचास्तिसाक्षात्कैवल्यदायिनी॥इतीनादेवकैवल्यदातासमधुकेश्वरः॥६५॥इत्थंस्थितेपुण्यराशौकाचिंतामरणेनृणां॥इत्युक्तांसमाहूयवरदांपुनरायथौ॥६६॥तत्तीरेतांनिवेश्यासौस्नात्वातत्तीर्थवारिभिः॥तद्देहंशोषयामासरक्षतामधुकेश्वरः॥६७॥तत्तीर्थस्यत्रिभागेणपेशाचीतनुमुज्झहो॥मधुकेश्वरनिर्मात्येस्तस्यागात्राण्यभक्षयत्॥६८॥तस्मिन्कालेविहगणायानमादायसत्वरं॥आसयंतोदिव्याःसर्वेआययुश्चतदंतिकं॥६९॥दिव्यमाल्यांबरधरादिव्यगंधानुलेपनां॥दिव्यस्त्रीतांसमावेश्यविमानेसर्वकामदे॥७०॥सातस्मिन्समयेसाध्वीसर्वाभरणभूषिता॥तेनविप्रेणसहितादृष्टचित्तास्यनेकधा॥७१॥विप्रंप्रदक्षिणीकृत्यसंप्रेक्ष्यमधुकेश्वरं॥विमानवरमारूढाद्योतमानास्वकांतिना॥७२॥पश्यत्सुसर्वलोकेषुवानवासीजनेषुच॥कैलासमगमच्छीघ्रंसर्वलोकोत्तरोत्तरं॥७३

वस्तव्यंवानवास्यांचद्रष्टव्योमधुकेश्वरः स्नातव्यावरदादेवीधर्मार्थश्रेयसोर्थिभिः ७४ अर्चयित्वा
श्चवंद्यश्चसर्वदामधुकेश्वरः सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं ७५ सर्वक्षेत्रेषुयामुक्तिस्त
त्सर्वंमधुकेश्वरे हुंडाख्योलुब्धकः कश्चिच्चोरव्यासमागतः ७६ दृष्ट्वान्मधुकेशंचकैलासमग
द्बुधाः इत्यादिम० द्वाविंशोध्यायः ऋषयऊचुः भगवंछिवयदाजवंदनाहतकिल्बिषः गुरुप्रसा
दात्त्वंवेत्सिभूतभव्यभवादिकं १ मधुकेशाकथांपुण्यांविस्तराद्वक्तुमर्हसि हुंडाख्यः शबरःकोसौ
कस्माच्चौर्यार्थमागतः २ वानवासीकदाप्रापमधुकेश्वरपालितां कदाद्रष्टासदृष्टोकथंमुक्तिमवा
दहो ३ एतत्सर्वंहृदालोच्यविस्तरेणवदस्वनः सूतउवाच श्रद्धानामुनिगणाःशृण्वंतुममभाषि
तं ४ श्रुतमात्रेणयेनासुशिवभक्तिर्विवर्धते तापसस्यमनोःकालेपुरात्रेतायुगेद्विजाः ५ हुंडाख्यः
शबरःकश्चित्पुलिंदानांकुलाग्रणीः क्रूरःप्राणिवधोद्युक्तोमृगयासक्तमानसः ६ धनुर्वि

घातिकुशलोमहाबलपराक्रमः॥तस्यानुजाश्चचत्वारस्तत्समानित्यहिंसकाः॥९॥मार्गरुध्वापुछिंदो
सोयंथान्वभ्रातिनित्यज्ञः॥परस्वहरणेचिंतासदातस्यदुरात्मनः॥१०॥एवंप्रवर्तमानोसौबहुवित्तार्जने
नोत्सुकः॥कुत्रदुर्गंकरिष्यामिविशद्दुर्गंतुमक्षमः॥११॥इत्थंविचिंत्यमानस्यभायातस्यप्रियंकरी॥
भद्रहुंड्यात्मजाक्रूरापुल्कसीनामसाब्रवीत्॥१२॥इदानींममतत्पित्रंसत्वरंघातयाम्यहं॥पुल्कस्य
वंमतिंहत्वाज्ञेभर्तारमाप्यच॥१३॥पुल्कस्युवाच॥भर्तस्तवजनाःसर्वेविपक्षानात्रसंशयः॥अ
तस्त्वयाप्रयुसेनवर्तनीयंप्रयत्नतः॥१४॥मत्पित्रोर्वेश्रगंदुर्गंकुटजाख्यंमहागिरौ॥तदस्मत्सर्वजारभ्य
अस्मदीयंनसंशयः॥१५॥तस्मिन्दुर्गेभूरिधनंपरैर्लोकितुमक्षमं॥सिंह्याघवराहाद्यास्तत्रसंत्येवभू
रिशः॥१६॥तत्सर्वजैःस्थापितंचद्रव्यजातंमहागिरौ॥वैदर्भीपुरवासीचमल्लाख्यनृपतिस्तदा॥१७॥
वृद्धंमत्पितरंज्ञात्वाबहुसैन्यसमन्वितः॥गिरिदुर्गंतदारुध्वाहत्वाचपितरौमम॥१८॥द्रव्यजातंस

प्रवरस्तदा ५३ दृष्ट्वा शिवशिवेत्युक्त्वा योयादृछिको मुनिः एवंसंतप्यबहुशस्तत्रैवमरणंगता
५४ पैशाचंजन्मचासाद्यअत्रापिबहुदुःखिता अतिविस्तारजठरा स्थूलास्यास्थूलनासिका ५५
गताक्षीपिंगकेशाचतालपादकरद्वया सूचीप्रवेशकेशीचकल्पमेघवराद्भुता ५६ छायाद्योत
यतेनित्यंजलंचापिशिलायते तरवः कंटकायंतेयद्भुक्तंतद्विषायते ५७ एवंकष्टान्वितायामे
गताःपंचशताःसमाः इदानींदैवयोगेनत्वांस्पृष्टासुखितांतरा ५८ चंडालीजन्मनिमयात्वि
वनामश्रुतंसकृत् तत्पुण्यगौरवाद्यत्तद्दुर्जनमभूद्द्विज ५९ मामुद्धरोद्धरस्वामिन्दयासारहि
साधवः एवंविलप्यबहुशोनियत्यभुविदंडवत् ६० रुरोदबहुधादीनास्मृत्वास्मृत्वातिसंकटं
तांवीक्ष्यविबुधश्रेष्ठोलुटंतींबहुविक्लवां ६१ ग्रामयन्निवतद्दुःखंप्रोवाचचदयानिधिः उत्तिष्ठोत्तिष्ठ
हेवत्सेधैर्यंकुरुपिशाचके ६२ त्वामुद्धरिष्येचाद्यैवक्षम्यतांक्षम्यतामिति इत्यमुक्त्वातदोत्थाय

नान्संप्रेषयामास नानादुर्गवनादिषु ॥२६॥ स्थितानानेतुकामोसौसर्वशाबरनायकान् ॥ इदंवाक्यंस
माकर्ण्यनानाशाबरजातयः ॥२७॥ स्वस्वपक्षरक्षार्थमेकैकंस्थाप्यनिर्गताः ॥ शार्ङ्गचित्रधनुश्चाप
भिंडिपालसतोमराः ॥२८॥ कुंतमुद्गरपाशेंदुखड्गपाणिभिरुद्धताः ॥ गोंडमुज्जारविभ्राद्जा भीरुंडा
वनसंस्थिताः ॥२९॥ तानागतान्समालोक्यदुंडोवचनमब्रवीत् ॥ स्त्रियाश्चबलोद्रिक्तमद्यमाश्रित्य
गर्विताः ॥३०॥ अस्मद्दुर्गसमाजहुर्हत्वामद्यसुरावुभौ ॥ निरस्यसर्वास्तद्धन्देशांतरमगुश्चते
३१॥ भवद्भिःसहगत्वाद्यरुध्वातंगिरिदुर्गकं ॥ हत्वादुर्गस्थितान्सर्वान्यश्चात्तान्घातयाम्यहं ॥३२॥ दुं
डवाक्यंतदाकर्ण्यसर्वेशाबरनायकाः ॥ अवीवदंस्तदादुंडंसाधुसाध्वितिसर्वशः ॥३३॥ तेरन्वितस्तदा
नीसप्रययौकुटजाचलं ॥ तस्यप्रयाणसमयेनानावाद्यान्ववादिरे ॥३४॥ ढक्काकरटाकांस्यसा
नूपटहानूडिंडिमानूस्वरान् ॥ मंदूर्मर्दलमांडिशान्कनकान्काहलान्बहून् ॥३५॥ इत्यादिवाद्यसं ७९

रावैर्भटानां सिंहगर्जनैः॥ क्ष्वेलानास्फोटनैश्चापि हुंकारैः किल्बिषारवैः॥३९॥ अलयं बुद्धमेघौघस
मकालइवागताः॥ इतिकोलाहलंकृत्वा गिरिमारुरुहुर्बलात्॥३०॥ वनाद्दुनंतरंगत्वापरीत्यमहत्
तीः शिलाः॥ ददृशुस्तत्रतेदुर्गं गिरिमस्तकसंस्थितं॥३१॥ सदानिर्झरतोयौघसंश्रावितशिलात
लं॥ महावातरवध्मातकीचकारवमेदुरं॥३२॥ खर्जूरकेतकीतालतरुखंडोपशोभितं॥ स्वपुरैः
स्वपुराकारंकदलीवनमंडितं॥३३॥ करिभग्नतरुद्भूतमहारवसुगर्जितं॥ शिलादुर्गंचतेदृष्ट्वा जग
र्जुरतिदारुणं॥३४॥ तेषांगर्जितमाकर्ण्यतत्रस्थामल्लसैनिकाः॥ तदास्वान्दुर्बलान्मत्वा द्विषतोपिम
हाबलान्॥३५॥ संभूयमिलातेदूताःदुर्गंत्यक्त्वाययुस्त्वरात्॥ बहुयत्नात्समारुह्यदुर्गंशाबरना
यकाः॥३६॥ अंतर्गत्वात्वदृष्ट्वातान्प्रहसन्बहुधातदा॥ स्त्रियाःदुर्बलायेवायथास्मत्सर्वंजोगतो
३५॥ अज्ञानिनोचजरठोवयमेवबलान्विताः॥ अभिषिच्यतदाहुंडंसंस्थाप्यगिरिमस्तके॥ अनु

ज्ञाताययुः सर्वे स्वस्वपल्लीं यथागतं ॥ गतेत्वज्ञावरानीके सभार्य स्कुलुपेवसन् ॥ ४६ ॥ अवतीर्य गिरिं
रात्रौ कुदिलाग्रामखर्वटान् ॥ तत्रस्यवस्तून्यादाय पुनर्यांति स्वपर्वतं ॥ ४७ ॥ एवंकालेगते विप्राः कदा
चिल्लुब्धको निशि ॥ चिंतयित्वा च बहुधा मल्लयित्वा नृपात्मजं ॥ ४८ ॥ सानुजः सबलोगंतुमुद्युक्तो
ऽतदा खलः ॥ सर्वेकार्पटिका भूत्वा शिवरात्र्यांजनैः सह ॥ ४९ ॥ वेंदर्यां मनुजेशास्यरात्र्यां व्याजेननि
र्ययुः ॥ तत्रनानाजनाः शिवरात्र्यां समाययुः ॥ ५० ॥ गायंतश्चजपंतश्चशिवध्यानपरायणाः
चरदायांकृतस्नानभस्मरुद्राक्षधारिणः ॥ ५१ ॥ पूजोपस्करमादाय तस्कुश्चशिवसंनिधौ ॥ तदाका
र्पटिकोहुंडोनिनीयस्वान्महानिशि ॥ ५२ ॥ स्वयंकार्पटिकोभूत्वातैः साकंमंडपेस्थितः ॥ मल्लपौरैः
सहायातः सभार्यः ससुतस्तदा ॥ ५३ ॥ महापूजांचकारासौबिल्वेद्रोणैरनेकशः ॥ मालतीकुंदमंदा
रकेतकीकुसुमेशुभैः ॥ ५४ ॥ चित्रान्नैर्भक्ष्यभोज्यैश्चनालिकेरैः सदाडिमैः ॥ कदलीपनसैश्चूतैर्दी

मात्सर्य मज्ञातीन्संन्निरस्यच, दुर्गेस्ववशगंचक्रेबलवान्मल्लभूपतिः १७ तन्निरस्तास्तदाहंवो
प्रापदेशांतरंगता, एतावद्दिनपर्यंतंमयाचोक्तंकदाचन १८ यदाकालःसंभवेत्ततदाकार्यंकरो
म्यहं इतिमत्वास्थितंभर्तर्नोक्तंत्वांप्रतिकर्हिचित् १९ सचतिष्ठतिदेवेंद्रगोतस्यामासक्तमानसः
भटाःकतिपयाःसंतितेपिहीनपराक्रमाः २० शक्तिमान्मतिमांस्त्वहिबलवंतस्त्वदानुजाः त्व
द्वेशबराःसंतिमहाबलपराक्रमाः २१ आंध्राःकिरातहूणाश्चपुलिंदाःपुल्कसाःशबराः सल्लाआ
भीरकाश्चापित्वद्वेषासर्वदागाः सदा २२ दृष्ट्वासभार्यंकालज्ञोहुंडःसेनान्यमब्रवीत् हुंडउवा च
मद्वासनाश्चकुंकांडसर्वेटविनिवासिनः २३ मज्ञातीयालुब्धकाश्चपुलिंदाभीरकादयः
सर्वेप्राद्युणिकाश्चापितन्मित्रामित्रमित्रकाः २४ सर्वानाकापयस्मिंस्संन्नद्धायुधपाणयः
अद्यैवगिरिमारुह्यकुटजंदुर्गकातरं २५ इत्यदीरितमाकर्ण्यकुंकांडोहुंडउवाचतं इ

दा गृहान्॥ कदाहनिष्येजनतां नागरोश्वविशेषतः॥६५॥ इत्येवंध्यायमानोसौनिद्रांलेभेनचिंत
या॥ज झिरेदस्युरेवेतिमल्लचाराः प्रमुग्धकाः॥६६॥तच्चेष्टांवधौहेदृष्ट्वाराज्ञेसर्वंन्यवेदयन्॥
तल्लींभूयतदाराजासमाप्येश्वरपूजनं॥६७॥परेद्युः पारणंकृत्वाविप्रान्संतर्प्यभूरिशः॥सर्वा
न्नृपान्समाहूयसामात्यसचिवैर्वृतः॥६८॥हुंडंहंतुंमनश्चक्रेतदुर्गंप्रारुरोधसः॥हत्वातत्र
पुलिंदान्सवशमानीयतद्भिया॥६९॥तत्रसंस्थाप्यबहुशोभटान्संग्रामकोविदान्॥अन्वेषमाणस्तं
हुंडंराजभिर्बहुभिर्वृतः॥७०॥वनमभ्यागतोस्तोश्वरुरुधुर्बहुसैनिकाः॥तदाहुंडःप्रदुद्राव दृष्ट्वाता
न्हंतुमागतान्॥७१॥अनुजग्मुस्तदाभ्रष्टास्त्वरमाणाः सहस्रशः॥सदुर्गंगंतुमुद्युक्तोगिरिमूल
मुपाश्रयत्॥७२॥तदामल्लभटासर्वेजघ्नुस्तत्रारदृष्टिभिः॥तदासंभ्रांतचित्तोसौदुद्रुवेसर्वतोदिशः॥७३
अभिगम्यत्वराभ्रष्टागत्वातंजघ्नुरोजसा॥ससैनिकंसानुगंचहुंडंहत्वानृपोत्तमाः॥७४॥स्वस्थानमगमन्सर्वे

दिशः स्वस्वोद्भवद्वाराद्दंडोद्यतकरायाम्यास्तत्रसमागताः ७५ बध्वासंज्ञेतोदंडेनदुंडेनियु
र्यमालयं मध्येमार्गेशिवगणाविमानंसार्वकामिकं ७६ आरुह्यसत्वरंगत्वायाम्यान्संतासय
रोषतः छित्वापाशांस्तमादाययानमारोपयन्गणाः ७७ निःश्वसंतोयमगणादूरेस्थित्वाबभा
षिरे नमोवोभगवद्भूतान्यायमार्गप्रवर्तकाः ७८ अयंव्याधोदुराचारोनित्यंप्राणिविहिंसकः
भगवल्लोकयोग्योनत्यत्रैनंचगमिष्यथ ७९ सोमवारदिनेपुण्येनकृतंशिवपूजनं शिव
रात्रिव्रतंनेवत्यत्रैकेनंचगमिष्यथ ८० अष्टम्यांचचतुर्दश्यामन्यपुण्यदिनेपिवा अनेननकृ
तापूजात्यत्रैकेनं० ८१ नगतःशंकरस्येत्रेनस्नातंतीर्थवारिषु नकृतात्रिवरात्राचत्यत्रैकं०
८२ अन्यथास्वामिनेब्रूमोवयंसर्वेनसंशयः इतियाम्यवचःश्रुत्वाशंभवःपुनरब्रुवन ८
३ धर्मसारमिदंवाक्यंकेनाशाःशृणुताधुना बहूनांवाक्यजल्पानांब्रूमएकोत्तरंवरं ८४

शिवव्रतानांसर्वेषांशिवरात्रिर्विशिष्यते॥शिवक्षेत्रेचलब्धंचेद्यास्यःकिमुनतत्फलं॥८५॥
अयंपुलिंदःसुकृतीशिवभक्तगणाग्रणीः॥गत्वायंवरदातीरंमधुकेश्वरसन्निधौ॥८६॥जाग
रंकृतवांस्तत्रमहापूजोदहर्दिने॥अस्यपुण्यानिसंख्यातुंशेषेणापिनशक्यते॥८७॥तस्माछिव
पदाहेयंदुःखंत्यजतभोगणाः॥वाराणस्यांचकेलासेमंदरेसत्यमस्तके॥८८॥गोकर्णेमधुके
पुण्येसदावसतिर्नृकरः॥ब्राह्मणःक्षत्रियोवापिवैश्योवाशूद्रएववा॥८९॥वरदायांकृतस्ना
नोदृष्ट्वाचमधुकेश्वरं॥शिवरात्र्यांविशेषेणशिवात्मासोनसंशयः॥९०॥वानवासीकृतावासम
धुकेश्वरधूर्जटे॥त्राहिमांकृपयास्तोभोसंसारभयकातरं॥९१॥सदाब्रुवंतियेमर्त्यास्तेवैकैव
ल्यभागिनः॥इत्युक्ताःप्रययुःशैवाःकीर्तयंतोमुदायुताः॥९२॥शिवक्षेत्रेषुसर्वेषुसिद्धिक्षेत्र
मिदंद्विजाः॥सद्यःकैवल्यदंत्वेतच्छिवसंतोषकारणं॥९३॥इत्यादिमहात्रयोविंशाः॥ऋषयऊचुः

क्षारखर्जूरजं भक्तेः ५५। भक्त्यापरमयोपेतो मधुकेश्वरतुष्टये। चक्रे सांबस्यनैवेद्यं यथाविभव
विस्तरं ५६। पूजांते समहाराजश्चक्रेनृत्यादिसेवनं। आगंतुकाजनाः सर्वेपूजांचक्रुरनेकशः
५७। भस्मोद्धूलितसर्वांगारुद्राक्षैरभिभूषिताः पेठुः पुराणंकेचिच्च श्रोतारस्तत्रकेचन ५८। पेठु
र्वेदान्सेतिहासां काव्यानिशिवतुष्टये जेपुः पंचाक्षरींविद्यांस्तोत्रपाठांश्चचक्रिरे ५९। उत्सि
ष्योत्सिष्यवासांसिननृतुःशिवयोगिनः तस्मिन्महोत्सवेकालेननृतुर्वारयोषितः ६०। नानावा
द्यरवंचक्रुर्नानागीतानिभक्तितः कृत्वेत्थंमहतींपूजांमधुकेश्वरसन्निधौ ६१। महाजनैर्नागरिकै
रर्घ्यंचक्रेमहानिधिः शिवार्घ्यमितिदत्वासोतारकार्घ्यमथाकरोत् ६२। आभगोदयकालाच्चजा
गरंशिवसन्निधौ दंपतीपूजनंचक्रेदानानिविविधानिच ६३। तस्मिन्महोत्सवेकालेदुंडोसौ
समयोत्सुकः कदानिद्रावशंमल्लेहत्वाचादायतद्धनं ६४। देवागारंकदाभेत्स्यअंतस्थांश्चत

जगत्कर्तामत्समोनास्तिकर्हिचित्॥लोकाननेकानस्रजंस्तत्रतत्रजनान्बहून्॥१०॥प्रजापतीन्मरीच्यादीन्मनून्स्वायंभुवादिकान्॥चतुर्विधान्प्राणिसंघांश्चतुर्वर्णान्क्रमादपि॥११॥षडंगांस्तथावेदानितिहासाननेकशः॥अष्टादशपुराणानिसंक्रातीरयनेतथा॥१२॥जातिभेदांतथामर्यादांस्त्रिगुणांस्तत्वसंचयान्॥महिनाकःक्षमेस्तुमित्येनानाविचित्रधा॥१३॥विष्णुःस्मयावेत्तापरंब्रह्माणंकुपितोब्रवीत्॥स्वयमप्यतिगर्विष्टंस्फुरदोष्ठपुटोहरिः॥१४॥अरेमूढमतेब्रह्मन्वृथाहंकारगर्वितः॥वृद्धःस्वभावतोमुग्धःसदाविस्मृतिकारकः॥१५॥सर्वेकार्यक्षमाःकुंजावृद्धागर्वितमानसाः॥उक्तार्थमेववक्ष्यंतिपरिहासोक्तिवादिनः॥१६॥पराधारकृतंकार्यमकारिस्मवयंतिति॥झरठानांस्वभावोयंनित्यंमिथ्याववादिनां॥१७॥अस्मज्जठरजन्मात्वंवृथाहंकारमद्धीः॥अहंसर्वजगत्कर्तामत्पुत्रस्त्वंमदाश्रयः॥१८॥मदाधारेणम

८३

ह्याक्यालोकान्सृजसिकेवलं ॥ अन्यथासृष्टिवैचित्र्यंकथंतवभवेदिदं ॥१९॥ आधारभूतःस
र्वेषामहमेवनचापरः ॥ सृष्टिकर्ताहमेवेषांरक्षकश्चाहमेवहि ॥२०॥ मद्विनासकलालोकाःस
र्वेप्यंतिनसंशयः ॥ अवतारणिकृत्वाहंहत्वा२तिदुर्जनान् ॥२१॥ अपालयमहंलोकान्मद्विना
कःक्षमोभवेत् ॥ विष्णुवाक्यमितिश्रुत्वाधाताक्रोधाकुलेक्षणः ॥२२॥ताडयामासहस्तेनकपो
लेकेशवस्यह ॥ ब्रह्मणाताडितोविष्णुस्तथाकोपाग्निनाज्वलन् ॥२३॥स्वयंतंताडयामासचतु
र्भिःपाणिभिर्हरिः ॥ गाढप्रहारभिहतोमूर्छामापक्षणंविधिः ॥२४॥उत्थायतंचहस्ताभ्यांपा
तयामासवेगतः ॥ पतितस्तत्सदेविष्णुर्गृहीत्वाभ्रामयन्मुहुः ॥२५॥वाराणस्यांपुनर्वेधान्यपतन्न
श्चेतनः ॥ विष्णुस्तमन्वधावच्चगृहीत्वातंपुनर्विधिं ॥२६॥हस्तैःसंताडयामाससोभ्युत्थाया
हनद्धरिं ॥ निर्युद्धकुशलोवीरोब्रह्मविष्णूतदाद्विजाः ॥२७॥युयुधातेतथान्योन्यंमुष्टामुष्टिक

चाकर्षि बाहुभि२र्युध्वादंडादंडि परापदि २५ नियुद्धमितिकृत्वातौशस्त्रपाणी बभूवतुः चा
पाशुगदकावीकाजघ्नतुर्बाणवृष्टिभिः २९ मंत्रास्त्राणि प्रयुंजानौतत्प्रतीकारवेदिनौ ब्रह्मा
ब्रह्मास्त्रमस्त्रदिग्वैवैलवास्त्रकं ३० तेस्त्रैघोरतरेक्रुद्धेयुयुधातेपरस्परं अस्त्रज्वालाभि
संतप्तादेवाःसंक्षुभितास्तदा ३१ कैलासमगमन्सर्वेस्वामिनेतन्निवेदितुं शैलादिनानीयमा
नाः शिवसन्निधिमापिते ३२ तेदृष्ट्वाजगदीशानंमीदुष्टमनामयं प्रणम्यावेदयंश्चक्रुर्ब्रह्मा
विष्णुश्चचेष्टितं ३३ भृंगमात्रात्तदेवानुज्ञाप्यदयानिधिः तयोर्गर्वापनोदायकार्य्यप्रा
डरभद्रयोः ३४ अंतरेशोमहादेवोलिंगरूपीसदाशिवः ज्योतिर्महोदयशिवशिवरात्र्यां
महानिशि ३५ तोदृष्ट्वाविस्मितौभूत्वाप्रणमंचक्रतुस्तदा प्राहगंभीरयावाचातौशि
वस्त्रिभवंकरः ३६ ब्रह्मन्विलोकिंकिमेतद्युवयोर्दुर्विचेष्टितं श्रुत्वातौस्वामिनोवाक्यंभ ८४

भगवन्सूतसर्वज्ञसर्वेसंशयभेदक॥कथंवैकेतकीपुष्पैःप्रीतिःस्यान्मधुकेशितुः॥१॥साक्षा
त्पुराशिवेनेतदभिज्ञापयुतंसदा॥अनादराद्दुरस्तेपोमित्यस्माभिःकृतंपुरा॥२॥कथंमच्छि
वज्ञानीकर्मेदंकृतवान्वद॥अस्मिन्नर्थेभवानेवसंशयोत्तारकोमुने॥३॥एतत्सर्वंच विस्तार्यवद
नोरौमहर्षणे॥स्कंदउवाच॥इत्यूदीरितमाकर्ण्यमुनिभिस्तत्ववादिभिः॥४॥कथांपुरातनींप्राह
श्रावयन्मुनिसंचयान्॥सूतउवाच॥अहोऋषिगणाःशंभोःसत्कथासारवित्तमाः॥५॥श्रुत्वा
श्रुत्वाशंभुलीलांश्रोतुकामामुदुःपुनः॥वेदमूर्तिःपुराकल्पेससर्जविविधाःप्रजाः॥६॥ब्रह्मा
स्त्रीलोकसंघातांस्तेषामाधारकान्बहून्॥शिवाज्ञयाविष्णुरपिपालनार्थंतुवैप्रजाः॥७॥अव
तारानसोकृत्वाजघ्नेदैत्याननेकशः॥पालयित्वाथसाधूनांमर्यादाहिप्रवर्तिताः॥८॥कदाचि
त्तौब्रह्मविष्णूशिवमायाविमोहितौ॥अहंकार्यमनसौगर्वितौसंबभूवतुः॥९॥ब्रह्मास्म्यहं

लिंगमूलके ॥४७॥ लिंगाग्रंचमयादृष्टमितिमिथ्याब्रवीचत ॥ तच्छ्रुत्वाकुपितेशंभौकेतकंचाब्रवीदि
दं ॥४८॥ स्वामिन्नावांसहायातौ नमिथ्याविधिभारती ॥ तद्वाक्यमितिचाकर्ण्यद्वयोः शापमदात्प्र
भुः ॥४९॥ ब्रह्मन्मिथ्याभिवादेन पूजानर्हस्वभूतले ॥ तेदेतद्दिनमारभ्यसदाजडमतिर्भव ॥५०॥ तवाप्य
नृतवादेन शापमेनंददाम्यहं ॥ इतिश्रुत्वाचतंशंभुर्विलुमाहत्यानिधिः ॥५१॥ हरेःसत्यवचःश्रुत्वा
लोकेपूजार्हकोभव ॥ त्वामर्चयंतियेमर्त्यामम प्रियकरोत्तमाः ॥५२॥ इत्युक्त्वांतर्दधेलिंगेशंभुः सांब
सनातनः ॥ विश्वैश्वर्ययाकाश्यांतदारभ्यप्रथांगतः ॥५३॥ इदंस्वकल्मषयुतंतत्केतकंविधिमब्र
वीत् ॥ तवकार्यान्नमब्रह्मन्शापः प्रालोतिदारुणः ॥५४॥ शिवपादांबुजंत्यक्त्वानसेहेदिनमात्रकं
इतिभाषितमाकर्ण्यब्रह्मापिप्राहकेतकं ॥५५॥ वानवासीपुरंगत्वाशिवप्रसिद्धिकरंपरं तपःकुरुस
दाभक्त्यामधुकेश्वरसन्निधौ ॥५६॥ शिवशापःशिवेनैववारणीयोनचापरैः ॥ केतकंवानवास्यांचवि

धिवाक्यप्रचोदितं ॥५७॥ तपस्तेपे शिवंध्यात्वा बहुकालमतंद्रितं । लिंगेप्रादुरभूच्छंभुः केतकस्यवरेण
या ॥५८॥ आविर्भूतंमहादेवंदृष्ट्वाकेतकमब्रवीत् । हरन्नोभोमहादेवकृपालोभक्तवत्सल ॥५९॥ अज्ञा
निनामयाप्रोक्तमसत्यंविधिवाक्यतः । क्षम्यतांस्वदयांकुरुदयानिधे ॥६०॥ अप्राप्यत्वत्पदांभोजे
नसहेहंशिवाव्यय । इत्युक्त्वादंडवद्भूमौपपातबहुशस्तथा ॥६१॥ केतकस्यवचःश्रुत्वावरंप्रादात्स्व
यंप्रभुः । शिवरात्रिंमहापुण्यांत्यक्त्वान्यदिवसेभवान् ॥६२॥ अनर्होभवमद्भक्तादित्याहभगवान्शिव
ः । इत्युक्त्वांतर्दधेतत्रलिंगेस्मिन्मधुकामिधे ॥६३॥ तदारभ्यचतद्भक्त्यांशिवप्रीतिकरंत्वभूत् । तस्मा
न्मद्भक्तपोभक्त्याकेतकैस्तद्दिनेशुभे ॥६४॥ पूजयामासवैभक्त्यामधुकैश्चशुभैश्चते । शिवरात्र्यां विशे
षेणकेतकीकुसुमैः शुभे ॥६५॥ येकुर्वंतिशिवार्चांतेयास्यंतिभगवत्पदं ॥६६॥ इत्यादिम० चतुर्विंशो
ध्यायः ॥२४॥ ऋषयऊचुः । वेदव्यासकृपालोशवर्णीकृतकथांबुधे । भगवन्सूतनोब्रूहिकथांशैवीं

महोदयां ॥२॥ एतन्नः श्रद्दधानानां कृपया वक्तुमर्हसि ॥ सूत उवाच ॥ शृणुध्वं मुनयः सर्वे पुरा स्कंदेनभाषितं ॥३॥ सनत्कुमारमुनयेकैलासेशंकरालये ॥ एनांकथांसमुद्दिश्यस्कंदप्रश्नेयोगिराट् ॥४॥ तत्कथां भवतांवक्ष्येयदुक्तंशंभुजन्मना ॥ रैवतस्यमनोः कालेकल्पेजाबालिकेपुरा ॥५॥ कुशास्त्रास्त्रस्यदायादः सुंदोनाममहासुरः ॥ हतेपितरिकुशास्त्रेभैरवेणमहात्मना ॥६॥ दुद्राव सुंदोतिभया त्प्राणत्राणपरायणः ॥ सह्याद्रिकंदरेवासी द्दुकालंसदानवः ॥७॥ बलवंतंचतंज्ञात्वा विद्युन्मालीसुतंददौ ॥ कृतोद्वाहः सबलवान्वव्रधेसह्यमूर्धनि ॥८॥ विद्युन्माली कांदिशीका भैरवाहवनोपितान् ॥ आक्रांपयामासतदापातालतलवासिनः ॥९॥ विद्युन्माल्याज्ञयासर्वेचागतादैत्यदानवाः ॥ तेमुदांतिकमभ्येत्यददृशुर्दैत्यनायकं ॥१०॥ सुंदोयं बलवांस्त्राता अस्मा

न्देवभयात्सदा ॥ इत्यूचैः प्रवदंतस्ते

यकेपितविग्रहौ ॥३७॥ गदतःस्म स्वचित्तांतंकृतांजलिपुरावुभौ ॥ तौगर्वितौ शिवोज्ञात्वाकृपयेद
मुवाच ह ॥३८॥ एतल्लिंगस्यमहतोमूलाग्रंयस्तुपश्यति ॥ सएवजगतःकर्तान्यथाजडएवसः ॥ श्रुत्वाव
चस्तावन्योन्यंसंकेतंचक्रतुस्तदा ॥ हंसरूपीययौ ब्रह्मातदग्रंद्रष्टुमिच्छया ॥४०॥ क्रोडरूपीहरिः प्राया
ल्लिंगमूलंविलोकितुं ॥ अदृष्ट्वागाच्चतन्मूलंबहुवर्षमटन्हरिः ॥४१॥ पुनःशिवाग्रंकविप्रा ब्रह्मागाद्ध
युयोजने ॥ श्रांतपक्षःखिन्नमनास्तदोर्ध्वंगंतुमक्षमः ॥४२॥ अदृष्ट्वालिंगमूर्ध्वंनंतदाचिंतापरोभवत्
तदागालेतकंवेगान्निर्गतंलिंगमस्तकात् ॥४३॥ दृष्ट्वापृच्छत्तदावेधाःकुतआयासिकेतक एत
ल्लिंगस्यमूर्धानमावहामियुगान्बहून् ॥४४॥ अतीत्यश्रांतदेहोस्मिपुनर्यामिशिवांतिकं ॥ श्रुत्वाके
तकिवाक्यंसपुनःप्रारश्रमातुरः ॥४५॥ आनंसहेवलिंगाग्रादागतावितितंवद ॥ ओमित्युक्तेकतके
नसहेवागाच्छिवांतिकं ॥४६॥ तावपृच्छच्छिवःसांबोदृष्ट्वायातौनचेतिच ॥ प्राहविप्लुर्मयोदत्तदृष्टं

स०१०
८१

स्थानं प्राप्य दुर्गीकरं यतः ॥ पुरं विरचयामास स्वाभिधानेन दैत्यराट् ॥२२॥ सुदेन निर्मितत्वात्तत्सोदाख्यमभवत्पुरं ॥ तस्मिन्पुरवरे रम्ये नानाविधजनान्विते ॥२३॥ वसन्भूमिं स्ववज्ञागांचक्रे सोदैत्यनायकः ॥ कदाचिद्गुरवर्योपि सोदाख्यनगरीं ययौ ॥२४॥ गुरुमभ्यागतं दृष्ट्वा सुदः संतोषनिर्भरः ॥ पूजयित्वा यथार्हं च गुरुमूचे कृतांजलिः ॥२५॥ सुद उवाच ॥ गुरो युष्मत्प्रसादेन भूमिर्लब्धा सागरा ॥ पुरं चातीव सुखदं दैत्यसेना निवासकं ॥२६॥ इदानीं स्वर्गलाभाय उपदेष्टुं त्वमर्हसि ॥ इति सुदवचः श्रुत्वा ध्यात्वाकविरुवाच ह ॥२७॥ दैत्येंद्र शृणु मद्वाक्यं देवास्त्वतिबलान्विताः ॥ सर्वायुधधरा देवी त्वजेया दैत्यदानवैः ॥२८॥ करोम्युपायं तेवत्स पुत्रोत्पादनहेतवे ॥ भुनक्तु पिंडं त्वत्पत्नी मंत्रपूतं महाबलं ॥ तेन दोहदिनी भूत्वा पुत्रमुत्पादयिष्यति ॥२९॥ तेन स्वर्गं स्वयं नेष्यानान्यथास्ति तुमक्षमः ॥ इत्युक्त्वा मंत्रितं पिंडं तस्यै शुक्रः प्रदत्तवान् ॥३०॥ सा प्रीत्याचत्तमादाय भक्त्या पिंडमभक्षय

८१

यत्र शुक्रः स्वरूपानमगमत्काले सा सुषुवे सुतौ ॥३२॥ जातमात्रेण तौ वीरौ लोकान्बिभ्रदतुः स्वनैः ।
चकंपे वसुधा सर्वान्यपतन्गिरिमस्तकाः ॥३३॥ हंदिदेवनिकायानां मनांसि चचकंपिरे ॥ इत्थमत्यद्भुता
कारौ बालौ दृष्ट्वा मुमोदह ॥३४॥ नाम चक्रेतदा सुंदस्तदानीं हृष्टमानसः ॥ एकं मधुकनामानमकरोत्के
टभाव्ययं ॥३५॥ पुषोष मुदितः सुंदो बालौ दृष्ट्वा दिनेदिने ॥ वर्धमानौ महाक्रूरौ बलवंतौ बभूवतुः ॥३६
एकदा कविरागत्य बालौ स्वचरणंगतौ ॥ उत्थाप्य स्वांकमारोप्य पूर्ववृत्तमवोचत ॥३७॥ बालौ शृणुतमे
वाक्यं शिवो लोकगुरुः प्रभुः ॥ यदाकदापि मनसा शिवद्रोहं नकारयेत ॥३८॥ शिवसंसक्तमनसौ
शिवध्यानपरायणौ ॥ शिवपूजारतौ नित्यं लिंगसंस्थाप्ययत्नतः ॥३९॥ भवेतांवचनान्मेद्य बलवं
तौभविष्यथ ॥ इत्युक्त्वाप्रययौ शुक्रस्तदावैवरदातरे ॥४०॥ स्वनाम्नास्थाप्यलिंगेदैत्यानवास्यांशुभेरि
ने ॥ महाविभवसंयुतौपूजांचक्रतुर्मुदा ॥४१॥ एवंबहुविधेकाले बलिनौमधुकैटभौ ॥ स्वर्गंजेतुंप्र

यत्ततुर्दैत्यदानवसंयुतो ४२ नानाविधभटैःशस्त्रैर्विद्युन्माली पुरोगमैः रुरुधुश्चचतुर्द्वारं स्वःपुर्या
मुनिपुंगवाः ४३ चहलकपाटान्निर्भिद्यश्चिछिदुःकल्पपादपान् जघ्नुर्देवनिकायांश्चपेहुर्मरा कि
नीतरं ४४ तदासेंद्राः सुरगणामंत्रयित्वायुनःपुनः मत्वातौदुर्जयौक्रूरौबलवंतौदुरासदौ ४५
स्वर्गंत्यक्त्वायुःसेंद्राः प्रापुस्तेभैरवींगुहां केचित्ता न त्यवर्तंत भयात्केचित्पडुद्रुवुः ४६ विद्युतान्दे
वसंघांस्तान्दृष्ट्वातोमधुकैटभौ स्वर्गाधिपत्यंतावेवकारयामासतुर्द्विजाः ४७ पुनर्भूमिंसमासा
द्यवानवासीनिवासिनौ श्रीवानेवप्रतिष्ठाप्यविष्णुविद्वेषकारकौ ४८ विष्णुपूजाकरान्मर्त्यान्हंतुंदे
त्यवरान्बहून् समादिदेशतुर्वीरौविष्णागारप्रभेदिनौ ४९ आज्ञयापरमेशस्यविष्णुःपूजार्हकोभ
वत् विष्णु भक्तान्हतांदृष्ट्वा शिवोपिकुपितोभवत् ५० देवान्निर्वापितान्दृष्ट्वाहतान्चैवब्रा
ह्मणान्बहून् सर्वेनारदादृष्ट्वा शिवोविष्णुमुवाचह ५१ विष्णोजहिखलौवीरौमधुकैटभापरिवृंहितः

सुंदमासेदुरुद्धवान् दैत्यसेनाभिसंकाशा सुंदाज्ञाकारिणीसदा १२ कदाचिदुशनाः प्राया
प्टुंसुंदंमहाबलं उत्थाप्यसुंदंसप्राहविद्युन्मालीप्रचोदितः १३ उपवेश्यस्वनिकटेसुंददैत्यप
तिंतदा उवाचभार्गवःप्रीत्यातदंगंपाणिनास्पृशन् १४ शुक्रउवाच कुरुत्यपिवत्सभवान्सेना
क्षेमवतीकिमु त्वत्रित्र्यंसकलंराज्यंसुरैरपहृतंतव १५ इतिश्रुत्वाकवेर्वाक्यंसुंदः प्राहकृतांज
लिः १६ सुंदउवाच गुरोभवत्कृपासाराःसर्वत्रकुशलंतव पितुर्घातदिनारभ्यवनवासमकारषं
१७ इतोस्मद्राज्यलाभाययागंकुरुगुरोमयि इत्युक्त्वाप्ररुरोदोच्चैः पतित्वातस्यपादयोः १८ उत्था
यसुंदंहस्ताभ्यामुपवेश्यासनेशुभे जगादसोत्र्यंशुक्रः सुहृत्कृत्यातुरंतदा १९ शुक्रउवाच
दुर्गंकृत्वासत्यपादेदैत्यदानवसंयुतः तत्रावासंकुरुष्वत्वंपुनर्यास्यतवांतिकं २० इत्युक्त्वाप्र
ययौशुक्रोहर्षयंस्तस्यमानसं सदैत्यदानवंसुंदो विद्युन्मालीसहायवान् २१ शुक्रोपदिष्टंस

महोत्सवेकालेप्रादुरासीत्तदाशिवः॥६२॥लिंगमध्यान्महातेजाभासमानोदिशोदश॥शाकरेः
पृष्ठमारुह्यपार्वत्यासहशंकरः॥६३॥सोमाचविष्णुप्रमुखान्देवान्संबोध्यशंकरः॥सर्वेशृण्वंतुमद्वा
क्यंलिंगेस्मिन्मधुकेश्वरे॥६४॥सदावसामिभोदेवाभवंतोत्रवसंतुच॥इत्थंपुण्यजनवासीवरदा
घोघहारिणी॥६५॥अत्रस्नात्वाचमांपूज्यकृतकृत्याभवंतुवै॥इत्युक्त्वांतर्दधेतत्रलिंगेचमधुका
ख्ये॥६६॥सर्वे देवाःसऋषयस्तत्रवासंप्रचक्रिरे॥एवंवःकथितंविप्राश्चरितंमधुकेशितुः॥६७
श्रुत्वैतत्पुण्यमाख्यानंधीरोप्यलभतेगतिं॥इत्यादि॰पंचविंशोध्यायः॥ऋषयऊचुः॥सूतसूतमहा
भागशार्ङ्गधन्वतनयस्यहो॥भवद्भाकंसारतरंवेदव्यासमुनीरितं॥१॥राजाःकथंब्रह्मकरात्मु
वसत्कथां॥केनोकाकुत्रचावासीत्कथंतस्यगतिर्मुने॥२॥सूतउ०॥पुरासनत्कुमारायस्कंदेनोक्तापुरा
तनीं॥कैटभेश्वरमुद्दिश्यशेषींश्लोत्रमनोरमां॥३॥कदाचिद्वरदामूलेवैशाखेमासिभूसुराः॥

प्रातःस्नात्वापुण्यनद्यांगायत्रींजेपुरेवहि ४ नानादेशजनास्तत्र स्नानार्थमगमज्जवात् तेपिसस्नुः
पुण्यमासिमेषेप्रागर्यमोदये ५ भरद्वाजाश्रमंदृष्ट्वा स्वाश्रमस्यसमीपगान् प्रातःस्नानरतान्नित्यं
भस्मरुद्राक्षधारिणः ६ शिवपूजापरान्सर्वान्कोढेवांछितवरायणान् प्रीत्याप्रोवाचसमुनिः पुराणंमु
निसत्तमाः ७ नानेतिहाससंयुक्तं विचित्रकथयान्वितं एवंदिनेदिनेविप्रा भरद्वाजोदयानिधिः ९
पुराणंश्रावयामासवरदातीरवासिनां कश्चिल्लेवर्तकस्तत्रडुर्मदोनामसर्वदा १० मत्स्यान्निघृष्टु
र्बडिशंवरदाजलमध्यतः शाश्वत्प्रक्षिप्यचादायघटिकेस्थापयत्यसौ ११ कदाचित्सोपिशुश्राव
केवभेश्वरसत्कथां एवंदिनत्रयेतीतेश्रवणाद्भुतकिल्बिषः १२ चतुर्थेदिवसेयत्कास्वधर्मेनि
त्यहिंसकं भयकंपितसर्वांगः स्मृत्वास्मृत्वास्वपातकं १३ दृष्ट्वाद्विजसमाजंचकिंचिद्दूरेरुरोद
ह अहंघोरतरःपापीनास्तिकोनिर्घृणःसदा १४ त्रायध्वंमांदुराचारंसर्वधर्मविवर्जितं ईत्युक्त्वा



दंडवद्भूमौपतित्वाचपुनःपुनः॥दूरेस्थित्वाचबद्धिरांकृतांजलिपुरोऽभवत्॥एवंवदंतदाशेंदृष्ट्वाविस्मि
तमानसाः॥१६॥जनाःप्रोचुर्नकिंचिच्चभारद्वाजस्तदाब्रवीत्॥वर्तमानेकटभेशेदयालौमधुकेश्वरे॥स्ना
नमात्रान्मुक्तिदात्रीवरदापिचवर्तते॥संसारोरगदष्टानांदिव्यौषधकरीशुभा॥किमर्थंदुःखितोदा
क्षस्त्वंक्षम्यतांक्षम्यतामिति॥१९॥स्वाधीनएवदेहोस्तिनकस्यापिनदीवशा॥वेश्याखःस्वयमायातिकिम
र्थंदुःखकारणं॥२०॥तेवेश्याखसमोमासोवानवासीसमानरः॥वेश्यारवेवरदास्नानमनायासगति
प्रदं॥२१॥सर्वक्रतुपुण्यपुण्यंसर्वदानेषुयत्फलं॥तत्फलंलभतेमर्त्योवरदास्नानमात्रतः॥२२॥तत्रापि
माघत्रितयेमुक्तिरेवनसंशयः॥क्षिप्रसिद्धिकरीत्वेषावानवासीपुरोत्तमा॥२३॥वरदोमधुकेशोस्ति
वरदामुक्तिदायिनी॥अस्यास्तीरेमहर्षीणामाश्रमाविवसंतिहि॥२४॥तीर्थानिविविधान्यत्रमहा
पापहराणिच॥इतआयाहिभोदात्रमत्समीपमुपाविश॥२५॥त्वामुद्धरिष्येसद्योहंमुक्तापापंनसं

मधुकैटभ नामानौ कैलासंप्रापयाशुवे ५२ पुनस्तौप्रलये घोरेतवकर्णपुटोद्भवौ तदानीमपितौ
वीरौजहित्वमविघ्नकया ५३ पुनः स्वारोचिषेकालेउत्पत्स्येतेतवोदरात् स्वारोचिषंहंतुकामौत
दानीमपितौजहि ५४ एवंत्रिवारंकृत्वातौमत्सकाशंत्वमानय गाणपत्यंचदास्यामियतस्तौमत्स
रायणौ ५५ इत्युक्त्वाविष्णुसंकैलासेशंकरंस्वयं ब्रह्मवीरेशमुख्येभ्योज्ञानमुद्रामुपादिशत्
५६ शिवशक्तियुतोविष्णुर्हंतुंप्राप्यतौरवलौ नियुद्धकुशलौभूत्वाहत्वातौमधुकैटभौ ५७ कैला
सवास्यकोद्यानेवस्तुमन्वेषयद्भृशं लिंगंदृष्ट्वामहाश्चर्यंवरदातीरवासिहि ५८ विष्णुर्देवैः सहा
भ्येत्यऋषिभिः सत्यवासिभिः पूजयामासदेवेशांसांबंबासुतान्वितं ५९ पपातसुमनोवृष्टिर्लिं
गमूर्ध्निसुशोभना प्रणेमुर्भक्तिलोदेवास्तदाजयजयेतिच ६० मुनयोभक्तिनम्रास्तउपशृंत्यतदा
ब्रुवन् जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः ६१ विद्याधरगणाःसर्वेतुष्टुवुर्भक्तिभाविताः एवं

मारयामासतैर्बालैः सहसंगतः॥ जालंनिःक्षिप्यबहुशः पक्षिसंघान्मारयत्॥ केकान्काकान्ब
कान्गृध्रान्श्येनान्कोकलकोकिलान्॥ कपोतांस्तित्तिरान्वंजान्धृङ्काटान्सारसान्बहून्॥ मत्स्या
न्भेकांस्तिलिप्सांश्चजलमालान्नदीभवान्॥ कपीन्खुलायान्गाश्चापियत्तैर्बहुविधैरहं॥ किमत्रब
मात्र५ हुनोक्तेनप्राणिंममारषं॥ एवंदुश्चरितंमांचदृष्ट्वामज्जनकस्तदा॥४१॥ अक्षराभ्यासनार्थंचगुरवेमां
समर्पयत्॥ तत्रापिबालकान्सर्वान्चञ्चीकृत्यप्रयत्नतः॥ दुर्मार्गवर्तिनश्चैनंज्ञात्वागुरुस्ताडयत्
तमप्यमारयंरात्रौपाषाणेनातियत्नतः॥ कदाचित्कार्तिकेमासिरात्रौदस्युभिरन्वितः॥४४॥ चौर्य
र्थंमगमंविप्रकैटभेश्वरसन्निधौ॥ गाढांधकारेपंथानमदृष्ट्वायत्नवानहं॥ कस्यचिद्दूर्तिनिकटे
दंडहस्तंमहाप्रभं॥ अवतीर्यशनैर्दीपंगृहीत्वागांशिवालयं॥ निर्भिद्ययत्नतोद्वारंसदीपोलिंगसन्नि
धिं॥ शिवायेस्थाप्यतंदीपंकनकाभरणान्यहं॥ गृहीत्वागमकालेमांददृशुःस्खलपालकाः॥ बध्वासं

ताड्यबहुशोराजोतिकमुपाययुः कारयामासराजामोश्रूलाग्रारोपणंतदा तत्रापिबहुदुःखार्तोम
मारद्विजपुंगवाः यामास्तदासमागत्यबध्वासंताड्यभूरिशः ५० मत्वाणान्यातनादेहेसंयोज्यप्रेत
राट्भटाः मद्गोणायामयःशंकुमतितप्तंसुदारुणं ५१ निःक्षिप्यादायमांनिन्युर्मार्गेत्वतिभयंकरे
गर्जयंतोभर्त्सयंतस्ताड्यंतश्चमांपथि ५२ रुदन्क्षुधार्तोबहुशःशुष्ककंठोष्ठतालुकः प्रेतभूतोवि
वस्त्रश्चस्मरन्मत्कृतपातकं ५३ क्वचित्संकंक्वचिद्गृध्रंक्वचित्संतप्तकर्दमः क्वचित्संतप्तसिकता
स्तीक्ष्णधाराःशिलाःक्वचित् ५४ क्वचिन्मरुप्रपतनंपर्वतारोहणंक्वचित् क्वचित्करकरक्षोद्याः
क्वचित्करशिलागुणाः ५५ क्वचिदग्निप्रवेशश्चशिलाग्रारोहणंक्वचित् क्वचित्तप्ताग्निपतनेसोधा
तारःक्वचित्क्वचित् ५६ स्नायुभेदःक्वचिन्मार्गेत्वस्थिभेदःक्वचित्स्थले मस्तकेतप्तपाषाणंहस्तयोरं
सयोस्तदा ५७ सम्यक्संताड्यनिःक्षिप्यवायुगत्याचनिम्निच क्वचित्सर्पाःक्वचिद्व्याघ्राभृंगाणां

संहतिः क्वचित्पल्वलेषु बभ्रुकीटान्क्वचिन्मार्गे क्वचिद्दावससंकुलं॥क्वचिज्जलूकादरनेक्वचित्सिंहाभिदरानं॥६०॥सारमेयाः क्वचिन्मार्गे किंनाम्नानिन्युरुस्वणाः॥शोचन्स्वकृतकार्योणिस्मृत्वातिदुःखितः क्व
मात्संयमनीप्रापकृच्छ्राणिविशोषितः॥यमोतिभीषणाकारोज्वलदग्निसमप्रभः॥भर्त्सयन्पापि
नोदीनान्महामहिषवाहनः॥६३॥दंष्ट्राकरालवदनोभ्रकुटीकुटिलाननः॥दंडपाशोद्यतकरोमेघगंभी
रनिःस्वनः॥६४॥निरयस्थान्महाघोरान्महापातककारिणः॥आनीयशिक्षयत्यग्रेतदामामर्पयन्भ
टाः॥६५॥यमोप्पिक्रूरदृष्ट्यामांनिरीक्ष्यभृशंकोपितः॥तर्जयामासबहुशस्तच्छ्रुत्वाक्षुभितोभवं॥६६॥
यमाज्ञाकारिणोदूताघोररूपाभयंकराः॥ताडयांचक्रिरेमांचपाशदंडकरादिभिः॥६७॥यदृच्छयानार
दोगात्तदायमदिदृक्षया॥मत्पुण्यगौरवादिप्रहर्षयामधुकैटभे॥६८॥यमःसौम्यतनुर्भूत्वाअर्घ्यमादा
यसत्वरं॥अभ्युत्थायाभिगम्याथपूजयामासनारदं॥६९॥संपूजितोमुनिस्तेनस्वासनेचाप्युपावि

शायः॥ इत्येतद्वदकैवर्तदुःखभीतिकरंत्यज॥२७॥इत्युक्तोरितमाकर्ण्यभरद्वाजमहर्षिणा॥दाशस्तन्नि
कटंगत्वाकृतांजलिरभाषत॥२८॥विप्रेंद्रशृणुमद्वृत्तंकृपोलोदीनवत्सल॥श्रवणात्खलुसर्वेषांभव
दुःखंभवेत्तवतु॥२९॥पूर्वजन्मस्मृतिर्जाताखलुकथाश्रवणादहो॥मामहिंसत्संयमिन्न्यायमःपापिभ
यंकरः॥३०॥स्मरन्स्मरंश्चभगवन्निवर्त्यतेहृदयंमम॥अन्नाकोहंचतद्वृत्तंत्राहित्राहिदयानिधे॥३०
इत्युक्त्वान्यपतद्भूमौछिन्नमूलइवद्रुमः॥हस्तपादंलुटन्दाशोमुमूर्छातीवविकलः॥३१॥भरद्वाज
श्चतंदृष्ट्वाविलुठंतंचमूर्छितं॥क्षिप्रंजीवनमादायजत्वाशिवमनुंमुनिः॥३२॥कृपयेक्षत्तदंगानित
स्पृणाद्युत्थितोभवत्॥कैवर्तोधैर्यमालंब्यस्वानुभूतमवोचत॥३३॥अवधारयविप्रेंद्रमद्वृत्तंवदा
म्यहं॥अहंपूर्वंभवेकश्चिद्विप्रस्तुरधर्मधीः॥३४॥दुर्नयोनामपापीयान्मत्सरश्चापिदुर्जनः॥वैरा
न्वितोबलाद्वित्तान्नाशायादायसर्वदा॥३५॥केनाप्यलक्षितोभूत्वामहाकूपेषुनिर्दयः॥निःक्षिप्य

स०पू
९३

ज्ञया॥९७॥भरद्वाजकृपालेशात्केदमेश्वरसंनिधौ॥वरदायांकृतस्नानःपूजांदृष्ट्वामहेश्वरीं॥९८॥ना
पयिष्यतिकैलासमित्यप्रेषत्तदासमं॥तत्सर्वमघनोजातंभरद्वाजमहामुने॥९९॥सामुद्रमहायो
गिन्नित्यत्कारप्रणामच॥सूतउवाच॥इतिदाक्षवचःश्रुत्वामुनिराहृदयानिधिः॥१००॥भोदाक्षस्वा
हिनयोत्तंवरदायांमहामनाः॥केदमेश्वरमासाद्यसोपश्रयंसमहोत्सवं॥१०१॥प्रदक्षिणानमस्कारं
कृत्वात्वंभक्तिसंयुतः॥यानमारुह्यकैलासंगमिष्यसिनसंशयः॥१०२॥इत्युक्तोदाक्षवर्योसोमुनिना
चदयालुना॥वरदायांकृतस्नानोभस्मोद्धूलितविग्रहः॥१०३॥केदमेश्वरमासाद्यसोपश्रयञ्चमहोत्सवं॥
स्वयंप्रदक्षिणीकृत्यप्रणम्यबहुशस्तदा॥१०४॥निवासमकरोत्तत्रनित्यमित्यंचकारह॥कदाचिद्दक्ष
वर्योयंज्वरदाहेनपीडितः॥१०५॥ममारवरदातीरेकैलासमगदुधाः॥तथाकुमुद्वतीपुण्यानदीनासु
त्तमानदी॥१०६॥देवर्षिद्विजसेव्याचसत्यपादोद्भवाचसा॥संक्रांत्यांचव्यतीपातेग्रहणेचंद्रसूर्ययोः

९३

९० अयनद्वितये चैवकृतस्नानानरासुवि। कुलैकविंशमुद्धृत्यकैलासंलोकमाययुः ९१ इत्यादि
म० षट्त्रिंशोध्यायः। ऋषयऊचुः। सदाशिवयदारम्योनैरुद्रोचोपसंततो। भगवन्स्तनोब्रूहिकथां
रौद्रीं मनोरमां १ कुक्षाक्षोभेरवेणाद्रौनिहतःसत्यमस्तके। इतिप्रोक्तंपुरासूततत्कथांविस्तराद्
द्रुत २ सूतउवाच। पुरासनत्कुमारेणकैलासेवटभूमिके। स्कंदंप्रणम्यचापृच्छिअयमर्थोमहर्षिणा
३ तत्कथामेववोवक्ष्यइतस्तानीयखंडके। विस्तरेणभवंतोपिश्रुत्वासंतोषमेष्यथ। प्रसंगादुक्रमे
णाद्यसंक्षेपेणवदामिवः। पुरादितेःसुतोविप्रमहाबलपराक्रमो। हिरण्यपूर्वकशिपुनेत्रनामधरा
नुभो। तावत्यतिबलोन्मत्तोजगत्त्रयवशंकरौ। दिविजान्भूधरांश्चापिबाधातेतिगर्वितौ। इतोवृह
रिणाज्येष्ठोवराहेणकनिष्ठकः ७ हिरण्याक्षसुतःकश्चित्कुसाक्षइतिविश्रुतः। तपस्तताप धा ता
रमुद्दिश्यबहुवत्सरं ८ वीरयागकरोनित्यंनिराहारोनिराश्रयः। एवंतपसिवर्तंतंकदाचिच्चतुरान

नः ९ आजगामवरदातुंकृत्स्नाक्षायतदाविधिः कृत्स्नाक्षोवेधसंदृष्ट्वा विमानंसर्वकामदं १० वव्रेकृ
तांजलिर्हेलामरणंत्रांकरादृते इत्यंतस्मैवरंदत्त्वाशिवमायाविमोहितं ययावाकाशमार्गेणमयमा
हूयसोसुरः विमानंकारयामाससर्वसंपत्समन्वितं १२ विचित्रसोधजालाढ्यंनानामंदिरमंडितं
नवरत्नप्रभोद्भासंमंदराकारराजितं १३ नानाविचित्रशोभाढ्यंनानारामोपशोभितं एवंस्वनि
र्म्यवैचित्र्यचित्रितंशिल्पिरावमयः १४ दर्शयामासदैत्यायसर्वैश्वर्यप्रदंनृणां दृष्ट्वा विमानंकृत्स्ना
क्षोमुमुदेदैत्यसंसदि १५ मयेनमंत्रयामाससहदैत्यैर्महाबलैः मयःप्रोवाचदैत्येंद्रंसत्याचलविलं
प्रति १६ दैत्येंद्रशृणुमद्वाक्यंसह्यभूधरकंदरे बहुयोजनविस्तारमगम्यंसर्वदेवतैः १७ तत्रे
वदुर्गंकृत्वाद्यवस्तव्यंहित्वयासदा मयवाक्यंसमाकर्ण्य सर्वदैत्यसमन्वितः १८ मयेनकविनामा
र्धययौसह्याद्रिकंदरा दृष्ट्वा महाबिलंतत्रतुतुष्टुः सर्वदानवाः १९ तत्रैववसतिंचक्रुर्दैत्यदानवरा

ज्ञात्वा यमस्तन्निकटोभूत्वाकृतांजलिरभाषत ७० स्वागतंतेमुनिश्रेष्ठ स्वासनेचाप्युपाविश त्वा यमस्त
न्निकटोभूत्वाकृतांजलिरभाषत ७१ त्वत्किंकरंमांयोगींद्राधिकिंकरवाणिते यमवाक्यमितिश्रुत्वा
नारदःप्रत्यभाषत ७२ कैलासादागतोत्यस्मिन्वार्तीचैकाश्रुतामया डुर्नयंशिवभक्तंचयमः क्षिप्रंक
रोतिच ७३ त्वंविरूपाक्षगच्छाद्ययमंबध्नागणैर्दृढं समानयशिवद्रोहकरंतद्भक्तत्रासनात् इतिवीरे
शागदितेवाक्यंश्रुत्वात्वरान्वितः त्वत्सकाशमिहायातोयमेतद्दितंतव नारदस्यवचःश्रुत्वायमोति
भयकातरः शीघ्रमेचसमाहूयपाशबंधंविमुच्यच ७७ इत्यनुज्ञांददौदेवोनारदस्यचसन्निधौ डु
र्नयश्रृणुमद्वाक्यादृत्वाभूमितलंसदा ७८ दाशपुत्रत्वमासाद्यवरदायास्तटेशुभे भारद्वाजाश्रमा
भ्याशेतिष्ठत्वंममज्ञासनात् ७९ कदाचिन्माधवेमासिप्रातःस्नानपरान्जनान् पुराणंश्रावयेषभा
रद्वाजोमहामुनिः ८० श्रोष्यसित्वंमहापुण्यं कैटभेश्वरसन्निधौ तवपूर्वस्मृतिस्तत्रभविष्यतिमदा

दृष्टंयथापुरा॥दैत्येंद्र शृणुमद्वाक्यंलोकान्यर्यटतामया॥३०॥दृष्टाकाचित्कचार्वंगीमनोनयननंदि
नी॥नैवदेवीनगंधर्वीनागीनचदानवी॥३१॥दृष्टपूर्वाक्वचिन्नैवश्रुतपूर्वानकर्हिचित्॥अतीवजा
रठस्तस्याःपतिरेकोनिवेद्यतां॥३२॥त्रायतेतांमहारत्नंकेलासेदेत्यपुंगव॥स्मोनिवसितुंतोचत्रां
कमानःक्षणंमृषा॥३३॥तस्यामेवमतिंकृत्वाआस्तेजरठएरुषः॥नस्नातिनैवभुंक्तेसोननिद्रातिन
गच्छति॥३४॥तामेवरक्षतिसदास्त्रीचित्तंचपलंस्मृतं॥सूत उवाच॥इत्यमरस्यवचःश्रुत्वाकृत्साक्षोभ
दनातुरः॥३५॥सेनान्यंप्रेषयामासशंबरंनयकोविदं॥कैलासेगच्छसेनानिरुद्ध्वाहिमदीरितं
३६॥यथांगीकुरुतेवाक्यंजरठस्तवशंबर॥तथावदसमाश्वास्यबहुभिर्नीतिवाक्यकैः
॥३७॥तद्वार्यमानयक्षिप्रमन्यथातांबलान्नय॥कृत्साक्षवचनंश्रुत्वानीतिज्ञःशंबरस्तरा
॥सुसैन्येर्बहुभिर्युक्तःप्रययौरजताचलं॥३९॥संगत्वादृष्टवांश्चैलेपार्वत्यासहितंशिवं॥

दृष्ट्वोवाचतदागर्वीदृढोयमितिशंबरः ४० भोवृद्धविप्रजरठमद्वाक्यंशृणुपंडित कुस्राक्षोनामदै
त्येंद्रोहिरण्याक्षसुतोबली ४१ विजित्यसकलान्देवान्विद्राव्यचपुनः पुनः त्रैलोक्याधिपतिर्भू
त्वाभुंक्तेभोगाननेकशः ४२ तद्गेहेसर्वरत्नानिसदातिष्ठंतिभूसुराः स्त्रीरत्नभूतोवेभार्योयोग्यातस्यै
वनान्यतः ४३ तथापितस्यतद्भार्यामतिरस्यामभूद्दृढा देयात्तवांगनावृद्धतवदासंसहस्रकं ४४
ग्रामाणांविंशतिंचैवगवांपंचशतंतथा दापयाम्यहमेतानिदृश्यमेकाप्रदीयतां ४५ अतीववृ
द्धस्त्वंविप्रदृश्यसेऽद्यावार्षिकी युवयोः संगमेकालेपरिहासायकेवलं ४६ कुस्राक्षोदृढसर्वांगोन
वान्नवयौवनः तस्मात्तस्यैवयोग्येयंनान्यस्येतिमतिर्मम ४७ राष्ट्रस्यविषमन्यायोनिर्धं
नस्यविषंकृषिः अविद्यस्यविषंवादोवृद्धस्यतरुणीविषं ४८ कुमुदस्यविषंभानुः कमलस्य
विषंविधुः बुद्धेर्विषंचदुःसंगोवृद्धस्यतरुणीविषं ४९ राज्ञोविषंकुमित्रंचसौंदर्यस्यविषंजरा॥

तपोविघ्नं च जनता वृद्ध०॥५०॥विघ्नभूतामिमां विप्रदत्वास्माकं सुखीभव॥इंगीतद्वचनेश्रुत्वाहुंकृ
त्यचपुनःपुनः॥५१॥गृहीत्वाचरणौतस्यभ्रामयित्वाविचक्षणः॥क्षिप्तोत्यर्थंसोपतत्सद्म
मूर्धनि॥५२॥दंडेनाहत्यतत्सैन्यमनयद्यममंदिरं॥पतित्वोत्थायवेगेनकृत्साक्षायन्यवेदयत्त
५३॥ईश्वरस्यवचःश्रुत्वादैत्येंद्रःसोत्यमर्षणः॥युद्धोद्योगंततश्चक्रेदैत्यदानवरक्षसां॥५४॥त
दाज्ञयादैत्यसंघाःसंनद्धायुधपाणयः॥अहंपूर्वमहंपूर्वमित्येवंयुद्धलालसाः॥५५॥तर्जयंतोगर्ज
यंतश्चक्रुःकोलाहलंरवं॥तैरक्षितोमहादैत्यःकृत्साक्षःक्रोधमूर्छितः॥५६॥विमानवरमारुह्यगत्वा
चाकाशमार्गतः॥तामेवसंस्मरन्दैत्योमदनाविष्टचेतनः॥५७॥रुरोधदक्षिणंकैलासंमहाबलपराक्र
मः॥छित्वावनानिचित्राणिभित्वाशृंगाणिदैत्यराट्॥५८॥चकारगर्जनंतत्रप्रलयांबुदनिःस्वनः॥
ज्ञात्वाकरिंसहसागत्यशंभवेतन्न्यवेदयत्॥५९॥शंकरोवचनंश्रुत्वारिवःक्रोधाग्निनाज्वलन्

क्षसाः ॥ मयोपि दैत्यवर्यैभ्यस्त्वायुधानि बहून्यदात् ॥ २७ ॥ तस्मिन्गिरिबिलेगोदयेणाख्ये सर्वसुंदरे
पुण्येमुहूर्तेदैत्यायअभिषेकंचभार्गवः ॥ २८ ॥ चकारविधिवत्तत्रसर्वदैत्याधिपत्यतां ॥ अभिषिक्त
स्तदादैत्योभार्गवेणमहामनाः ॥ २९ ॥ मंत्रयित्वाचतैः सार्धंस्वर्जेतायमतिंव्यधात् ॥ विमानवरमारु
ह्यदैत्यसेनासमन्वितः ॥ ३० ॥ गत्वायुधाचदितिजैर्जित्वाविद्रावयत्सुरान् ॥ स्वर्लोकंचवशेमानीयपु
नरायान्महीधरान् ॥ ३१ ॥ हृत्वाक्षभयसंविग्नादेवावैमेरुकंदरं ॥ छन्नरूपानिवविभुस्तत्राप्यस्य
भयातुराः ॥ ३२ ॥ एवंनिर्जित्यदैत्येंद्रोलोकांस्त्रीन्बुभुजेबलः ॥ कदाचिद्वयस्मरोनामदूतस्तस्यम
हात्मनः ॥ ३३ ॥ लोकानटतिवेलायांदृष्ट्वाचात्रजनान्बहून् ॥ ददर्शतत्रदेवेशंपार्वत्यासहशंकरं ॥
सदृष्ट्वापार्वतींतत्रसर्वावयवसुंदरीं ॥ भासयंतींदिशःसर्वादेहभासातदासुरः ॥ ३५ ॥ शिघ्रमभ्याय
योऽतःकक्षाक्षंविनिवेदितुं ॥ गत्वाचैणपुरंवेगादृष्ट्वादैत्यपतिंतदा ॥ ३६ ॥ जगादसर्ववृत्तांतंस्वेन

विप्रैः समन्वितं ॥७०॥ गंतव्यं भैरवक्षेत्रं ज्ञापमोचनलिप्सुभिः अन्यथा दुर्गतिस्तेषां कृतं कर्म वृथा भवेत्
पुरा त्रिपुरसंहारे दग्धं घ्राणाग्निनेशितुः पुरं दृष्ट्वा शुचा विष्टस्तारकाक्षः कुधाश्रसन् ॥७२॥ मनोरमं म
हाक्षेत्रं भैरवं शंकरप्रियं दग्धुकामस्तदादैत्योदत्यमानं पुरं स्वयं ॥७३॥ गृहीत्वा तत्र विक्षेपस्त्याद्रौ भै
रवस्थले पौराजिरेतामरहसुरीवैमानसंज्ञितां ॥७४॥ तदाशिवाज्ञयाजग्मुः समुद्राः सरितस्तथा स
रांसिदेवाऋषयोमनुजाभूतनायकाः ॥७५॥ चंडिकाद्यामातृगणानदीभूताः शिवाज्ञया गत्वाचरामं
यामासुस्तमग्निंजलवृष्टिभिः ॥७६॥ समागतास्तत्रसर्वेसंभूयशिवसंनिधौ चक्रुस्तीर्थानिसर्वाणितत्रस्थे
महागिरौ ॥७७॥ अद्यापिदृश्यतेशंभोर्जटाजूटविनिःसृता गंगाचंडीनदींप्राप्यलवणाब्धिंसमेत्यच ॥७८॥ पश्चिमाभिं
गतापुण्यास्नातानांमुक्तिदायिनी इदंक्षेत्रवरंपुण्यंसर्वौघविनाशनं ॥७९॥ सर्वकामप्रदंनृणांसर्वयागफलप्रदं सि
द्धिक्षेत्रमिदंपुण्यंदेवर्षिगणसेवितं ॥८०॥ मुक्तिमुक्तिप्रदंह्येतदिहामुत्रफलप्रदं इत्यादिमहासप्तविंशोध्यायः ॥२७॥

९७

ऋषय ऊचुः सूतसर्वकथासारसर्वज्ञमहामते॥ व्यासप्रसादात्त्वंवेत्सिभगवन्मुनिपुंगव॥१
वयंत्वद्वाक्यपीयूषपात्रोत्सादितचेतनाः॥ नतृप्तिमधिगच्छामः श्रुत्वाश्रुत्वाकथाःशुभाः॥२
सह्यप्रत्यक्समुद्रस्यतीरक्षेत्रंनिगद्यतां गोकर्णमितियत्प्रोक्तंत्वयावैसूतनंदन॥३तस्यक्षे
त्रस्यवैसूतगोकर्णाख्याकथंवद॥ तत्रत्यलिंगतीर्थानांमहिमानंवदस्वनः॥४॥तत्रकेमु
नयः संतिसिद्धिंकांप्राप्तिपेदिरे॥एतत्सर्वंमहाबुद्धेविस्तराद्वक्तुमर्हसि॥५॥श्रूयतांमुनिशा
र्दूलसहेभिर्मुनिपुंगवैः॥व्यासप्रसादाद्वक्ष्यामिसर्वंप्रत्यक्षदर्शिवान्॥६॥सिद्धिक्षेत्राणि
त्रीण्याहूरहस्यानिसुरैरपि॥अहंतेवर्णयिष्यामितानिसर्वाणिबोधमे॥७॥शालग्रामंपुष्क
रंचगोकर्णंचमुनीश्वर॥सत्त्वंरजस्तमश्चैवगुणाःसंकीर्तितास्त्रयः॥८॥विष्णुर्ब्रह्माचरुद्र
श्चगुणानामधिदेवता॥ऋग्वेदश्चयजुर्वेदः सामवेदस्तथैवच॥९॥त्रिधाभूतंजगत्सर्वमिदं

संपरिवर्तते सिद्धिक्षेत्राणियोगींद्रत्रीणितानिनिबोधमे १० ब्राह्मेचवैष्णवंचैवरौद्रंचैव
द्विजोत्तमाः शौनक० सिद्धिक्षेत्रमिदंप्रोक्तंत्वयेदानींमहामते ११ किमुच्यतेसिद्धिरिति
सिद्धिःकावामहामते सिद्धेतिलक्षणंब्रूहिब्रूहितस्याःप्रयोजनं १२ सिद्धिक्षेत्रेषुसिद्धिं
चप्राप्तास्तान्ब्रूहिसत्तम सूत० संवर्तकोनाममुनिरग्निपुत्रोमहायशाः १३ अवसत्सु
चिरंकालंगोकर्णेतीर्थसत्तमे तपोघोरंसमास्थायत्रेतायांमुनिसत्तमः १४ निर्द्वंद्वोनिर
हंकारःसिद्धिमेछन्परांद्विजः अथाजगामभगवान्नारदोमुनिसत्तमः १५ यदृछयातत्स
कार्यंसर्वत्रसमदर्शनिः तमागतमभिप्रेक्ष्यनारदंमुनिसत्तमं १६ अभ्युछायार्घ्यमादाय
शिरसातमवंदत आसनंचददौतस्मैमुनयेपावकात्मजः १७ कुशलंपरिपप्रछभगवा
न्नारदोमुनिः संवर्तकंमहात्मानंयोगिनामीश्वरंप्रभुं १८ सुखासीनोमुनिवरोनारदस्तु

आविर्बभूवसहसातत्रोपिपुरुषोमहान् ॥६०॥सर्वायुधधरोरक्तोमहाकाल्यासमन्वितः॥हुंकार
गर्जनैस्तीव्रैर्भीषयन्भुवनानितैः॥६१॥भीषणंभैरवंदृष्ट्वादेवीनुज्ञांचकारह॥गच्छभैरववेगेनब
हुभिर्गणैर्वृतः॥६२॥रक्षाक्षंजहिभूतेशासर्व्यबलवाहनं॥देवाज्ञयाभैरवोपिभूतसंघैःसम
यभक्तार्तिहानौसततोद्यताय॥५॥सहस्रनेत्रायहरिप्रियायसहस्रनेत्रारिहरायतुभ्यं॥सहस्रपाय
त्रिगुणागुणायसहस्ररूपायनमोनमस्ते॥६॥संमोहसर्वत्रसहस्रनेत्रंत्वांदेवगुह्यप्रवदंतिसूरयः॥
प्रसीदप्रभूणामपिदेवदेवंजगत्त्रयक्षोभकरंसुरेश्वर॥७॥शरण्यमाद्यंशरणंप्रपद्यविश्वेश्वरंभूतिनम
स्यमेयं॥योगिध्येयंयोगिनामप्यगम्ययोगीश्वरानंदितंत्वांप्रजामि॥८॥वेदाअपिहिकांक्षंतेतव
संदर्शनंविभो॥तेषामपिसुदूरस्थंदृष्टवानस्मिशंकरं॥९॥गुह्याद्गुह्यतमंलोकज्ञानगम्यंनिरा

चंद्रतीर्थमितिख्यातंसूर्यतीर्थंतथापरं॥५॥अनंततीर्थंविख्यातंतीर्थंसुरगणार्चितं॥मालि
नीनामभद्रंतेनदीपुण्यजनप्रिया॥६॥तीर्थकोट्यःपरंतत्रतीर्थंवैसारितांपतेः॥अशक्यः
परिसंख्यातुंपृथक्तीर्थवराणिच॥७॥अयोच्यमानंसततंतथान्येननिबोधतत्॥श्रात
शृंगगिरिर्वरंश्रातधातुवर्णाभसि॥८॥तथामग्ननिपतितंक्षेत्रस्योपरिसंस्थितं॥तदावतारि
तमभूद्ब्रह्मणाकुंभयोनिना॥९॥सार्धयोजनाविस्तीर्णःशिवक्षेत्रेमहागिरिः॥आस्तेवैश्रात
शृंगाख्यःसर्वदेवर्षिपूजितः॥१०॥गोकर्णमितितत्क्षेत्रमाहुरासाद्विजोत्तम॥मुख्यत्वात्तस्यती
र्थस्यतन्नामाख्याचदर्शनात्॥११॥दक्षिणोत्तरतस्तस्यक्षेत्रस्यद्विजसत्तम॥ततःशृंगस्यशृंगाणि
गोकर्णमभितोपतन्॥१२॥अस्तव्यस्तोयभूतस्यभागःशृंगस्यतत्रवै॥तेषुसर्वेषुशृंगेषुअसंख्यानि
द्विजोत्तम॥१३॥न मानितस्यात्मकथानिवक्तुंवर्षशतैरपि॥यथाप्रधानतोवक्ष्येसंक्षेपात्तवसुव्रत॥

द्विक्रोशमात्रादुत्तरतश्चक्रतीर्थं प्रशस्यते तत्रैव कपिलातीर्थमारण्यंतीर्थमेवच १५ वैनायकं
नामतीर्थंक्रोशमात्रेतिपावनं त्रैलोक्येयानितीर्थानितानितीर्थानिपावके १६ वसंतिसिद्धि
भागानिदृश्यादृश्यानिभागशः अत्रस्थाऋषयःसर्वेतपस्तप्यंतिदुश्चरं १७ देवताश्चम
हाभागगंधर्वाप्सरसस्तथा असुराःकिंनरायक्षानागाश्चद्विजसत्तम १८ येयेसिद्धिमभी
प्संतितेप्यत्रस्थानसंशयः त्रिवर्त्मेत्रमिदंदिव्यमित्येतत्सद्भिरुच्यते १९ कामक्रोधविनिर्मु
क्ताब्रह्मचर्यव्रतेस्थिताः हंतान्नविनिर्मुक्ताः सर्वदोषविवर्जिताः २० कृच्छ्रव्रतधरायेवनि
यतानियताशनाः जपयज्ञपरायेतुवसंतिपरिवत्सरं २१ अष्टांगसिद्धिमतुलांलभंतेनात्र
संशयः वर्षाणांहिसहस्रेणसिद्धिः कृतयुगेद्विज २२ वर्षैः सप्तशतैःसिद्धिस्त्रेतायामपिषो
डशे द्वापरेत्रिशतैर्वर्षैर्नरोयातिसिद्धिमुत्तमां २३ पश्चिमंयुगमासाद्यसिद्धिःसक्तस्यहि

धर्मश्च भगवांस्तत्र सिद्धिं प्राप्तोत्यसंशयः ॥२४॥ सिद्धिस्थानानि चोत्तेव असंख्यानि द्विजोत्तम ।
अदृश्यानि भविष्यंति सिद्धास्तेचकलौयुगे ॥२५॥ पश्चिमंयुगमासाद्य धर्मः संक्षीयतेयदा ॥ भ
वेत्यदृश्यादृश्यानि सर्वतीर्थानि सत्तम ॥२६॥ लिंगकोटित्रयंतत्र रुद्रयोन्यभितः स्थितं ॥ वालुको
तहितंतत्र नदृश्यंतिकलौयुगे ॥२७॥ ऋषयेपिमहात्मानोह्यव्यक्ताविचरंत्युत ॥ आश्रमेषुमहाभा
गाः पुण्येष्वेषुसत्तम ॥२८॥ संवर्तक० ॥ एकबिंदोश्चभगवंछतबिंदोश्चसत्तम ॥ सहस्रबिंदोर
पिचदृश्याबिंदास्तथैवच ॥२९॥ उत्पत्तिंश्रोतुमिच्छामितेषांवदमहामुने ॥ प्रभावंचमहाभागप्रस
न्नोवक्तुमर्हसि ॥३०॥ नारद० ॥ शृणुष्वैकमनास्तातकथांतेषांमहात्मनां ॥ अत्रिर्वसिष्ठोद्वासितुत्रा
तरोमुनिपुंगवाः ॥३१॥ आत्रिश्छंतः परांसिद्धिंतपिरेपरमंतपः ॥ ततश्शृंगंसमासाद्यब्रह्मादिवसतिं
परां ॥३२॥ मुक्तस्पृहामुक्तकामामहात्मानो द्विजोत्तमाः ॥ तेतत्रस्थाश्रमपदंदृष्ट्वाकेचित्तथाकरुः

तामहानदी॥३८॥विलेनतेननिर्गत्यताभ्यांसहमहानदी॥उन्मज्जनेतिविख्याताताभ्यांसह
महानदी॥३९॥ह्रावयित्वातुतंदेशंकोटितीर्थविवेशवे॥पुराहरिहराद्विप्रउत्तारणमहानदी॥४०
संगत्यसर्वतीर्थैः सातीर्थराजंसमभ्यगात्॥तस्यांस्नातःसर्वतीर्थस्नातोभवतिमानवः॥४१॥
गोसहस्रप्रदानस्यफलंविंदतिचद्विज॥यावत्सत्यंप्रवर्तेततावत्सादृश्यतेनदी॥४२॥यदासत्यं
नदादृश्याभविष्यतिनसंशयः॥४३॥इत्यादि०त्रिपंचाशत्तमोध्यायः॥५३॥संवर्तक०॥तस्य
तीर्थस्यभगवन्परेपार्श्वेस्थितानिच॥तीर्थान्याचक्ष्वसर्वाणिप्रसादसुमुखप्रभो॥१॥नारद०॥शृणु
चापरपार्श्वस्थतीर्थानिद्विजसत्तम॥स्नातशृंगस्यभद्रंतेसर्वपापहराणिच॥२॥एकबिंदुरितिख्या
तंतीर्थंत्रैलोक्यविश्रुतं॥द्वाबिंदुश्चभद्रंतेस्नातबिंदुस्तथापरं॥३॥सहस्रबिंदुरितिचत्रिषुलोकेषु
विश्रुतं॥अंतरिक्षचराण्येवगिरौतस्मिन्पतंतिच॥४॥तेनमार्गेणचपुनःपातालेप्रपतंतिच॥

श्वराः॥ आगच्छत्सहितोदेवैः शातशृंगं महागिरिं॥४४॥ तानब्रवीन्महादेवोवरंब्रूहियथेप्सितं॥
निर्जीविस्तमहाभागाः शुष्ककाष्ठा इवद्विजाः॥४५॥ शरीरमात्रशेषास्तेनकिंचित्प्रतिभाषिरे॥
ततोपिबिंदुभिश्चद्रोधारामात्रैर्द्विजोत्तमं॥४६॥ पूरयामासभगवानंतरिक्षगतः प्रभुः॥ सदेवाना
देवभूतइंदुर्बिंदुभिरव्ययः॥४७॥ जीवयामासभगवान्ब्रह्मात्मस्तथाग्नेः॥ अथामृतस्यधा
राभिर्जीवितास्तेदिव्यदेहिनः॥४८॥ द्विजास्तेभ्रातरः सर्वेदृष्ट्वादेवमुमापतिं॥ समस्तदेवसहितमागतं
तंववंदिरे॥४९॥ सिद्धिमिच्छामदेवेशत्वयिनिर्वृतिरागताः॥ ततस्तानाहदेवेशः सर्वसंमंत्र्यदे
वतैः॥५०॥ सिद्धायूयंमहाभागास्तपसाचदमेनच॥ भूयोपिमत्प्रसादेनसिद्धिर्भवतुमद्वि
जाः॥५१॥ युष्माभिरमृतंपीतंतपसादग्धकिल्बिषैः॥ अभिगम्यपरंब्रह्मयथाकामंचरिष्य
थ॥५२॥ ततोपिचात्रिपुत्रास्तेप्रणिपत्यमहेश्वरं॥ प्रत्यूचुस्तपसासिद्धादेवंदेवमुमापतिं॥५३॥

तीर्थान्येतानिदेवेशनान्यस्माकंसुरोत्तम अब्रवीत्तदिदंवाक्यंहर्षयन्प्रभुरुवत्सलः ५३ युष्माकं
जीवनार्थायचोद्योवैबिंदुधारया हृतान्येतानितीर्थानिपावनानिद्विजोत्तमाः ५४ सहस्रपाप
हारीणिभविष्यंतिनसंशयः आस्थलेकिंद्विजश्रेष्ठसहदेवैरुमापतिः यथागतंजगामाशुभगवा
न्भूतभावनः ५५ इत्यादि॰ चतुःपंचाशत्तमोध्यायः ५४ नारद॰ एकबिंदोर्नरःस्नात्वादश
बिंदोसहस्रके अश्वमेधफलंसर्वतीर्थस्नानफलंलभेत् तेषांप्रभावःकथितः किमन्यच्छ्रोतुमिच्छ
सि २ संवर्तक॰ अग्नितीर्थस्यचरितमुत्पत्तिंवक्तुमर्हसि प्रभावंतस्यतीर्थस्यश्रोतुमिच्छामिसु
व्रत ३ नारद॰ तीर्थस्यतस्यभद्रंतेप्रभावंशृणुपावके भृगुवंशोद्भवःपूर्वंमौर्वीनाममहामुनिः ४
क्रोधाविष्टस्तपस्तेपेदग्धुकामश्चराचरं गोकर्णंसमुपागम्यवाय्वंबुकृतभोजनः ५ घोरेणतपसा
चैवदमाराधयच्चिरं पंचाग्निमध्यतोभत्वादित्यवर्त्मनांद्विज ६ ततस्तत्तपसासंवंसंदग्धंसच

राचरं सदेवासुरगंधर्वसयक्षोरगराक्षसं ७ सर्वमुद्विग्नमभवत्तपसातस्यमोहितं तस्याग्नेतोम
वोदेवः सहदेवैः पिनाकधृक् ८ वरंब्रूहीतिभगवानाहतंद्विजसत्तमं ततः क्रोधसमाविष्टः प्रणम्य
त्रिपुरांतकं ९ वरंददासिचेद्देववरोहयदिचाप्यहं त्रैलोक्यदाहकोवन्हिस्त्वत्प्रसादाद्भवेन्मम १०
तथास्तितिचतेनोक्तस्तदाभूद्बडवानलः लेलिहानोजगत्सर्वंज्वालामालीविभावसुः ११ अ
वर्धतमहावन्हिर्धूमकाभ्यरांचरं ततोब्रह्माजगत्सर्वंसहरुद्रेणविश्वसृट् १२ तैःसमेत्य
जगन्नाथोज्ञात्वालोच्यसतंप्रभुः सहतैर्विबुधैर्विप्रक्षीराब्धेस्तटमभ्यगात् १३ तत्राराध्यहरिं ते
हिदृष्ट्वाचक्रगदाधरं तेनसंमंत्र्यविबुधोगाकर्णंपुनरागमन् १४ चक्रंसुदर्शनंदेवः क्षिप्तवां
स्तद्विभावसौ वेष्टयामासतद्वन्हिंविष्णुचक्रंसुदर्शनं १५ सचक्रांतर्नियत्नाभूद्दूर्धाग्निः समव
र्तत ततस्तमिंदुर्धाराभिः शमयामासचोपरि १६ अथाभिगम्यतंविप्रंशतरुद्रनिवासिनं १६८

थक ॥३३॥ अदृश्याः सर्वभूतानांदुर्गदेशंसमाश्रिताः॥मौनव्रतधरायेतुतपोघोरंप्रचक्रमुः
३४॥ महाव्रतमितिख्यातंव्रतमन्यैः सुदुश्चरं॥दिव्यवर्षसहस्रांतेकाष्ठभूतावनेवसन्॥३५
निराहारानिर्विचेष्टाऊर्ध्वोद्धृतकराद्विज॥वल्मीकभूताश्चान्यत्रलतागुल्मसमावृताः॥३६॥
तेषांतपः प्रभावेनऋषीणांभावितात्मनां॥सज्वालाकवलोधूमस्त्रैलोक्यंसमुपावृणोत्॥३७
ततोदेवाः सगंधर्वाऋषयश्चतपोधनाः॥ब्रह्माणमूचुर्भगवन्त्रक्षस्वेतिपुनः पुनः॥३८॥ततो
ऽभिगम्यविप्रेंद्रभयंब्रह्मापिनामहः॥सुरानाहततोब्रह्मन्गच्छध्वंत्रिपुरांतकं॥३९॥अत्रिपुत्रा
स्तपस्यंतिमुक्तिकामामहाबलाः॥तस्माद्याचध्वममराःसंत्रिभुवनेश्वरं॥४०॥यदाप्रसन्नस्ते
षांवैमूलधृक्सहकेनवः॥तदामुक्ताभविष्यंतिभात्रेयामुनिपुंगवाः॥४१॥ततस्तेत्रिदशाः सर्वे
रिंचिक्वनात्तदा॥विश्वमाराधयामासुरुद्रंवद्विजसत्तमाः॥४२॥ततःप्रसन्नास्तेदेवाब्रह्मविश्वमहे

तःसुदर्शनेविष्णोश्चंद्रमाःपतितोपरि॥२७॥एतैर्हिरक्षितश्चान्यैरुद्दंडोभवत्पुरा॥अश्वानग्रस्यपुराविप्रमे
त्राह्वानेनचैवहि॥२८॥मंत्रेणतन्मुखेपूर्वंतस्मात्सवडवामुखः॥यदासन्नस्तदावन्हिस्तपसातस्यधीमतः
२९॥तदग्नितीर्थंविख्यातंत्रिषुलोकेषुसत्तम॥तस्मिन्स्नातःसर्वतीर्थस्नातोभवतिमानवः॥३०॥अश्वमेध
स्ययज्ञस्यफलंप्राप्नोत्यसंशयः॥सूर्यतीर्थंचतत्रैवचंद्रतीर्थंचसत्तम॥३१॥अनंततीर्थंचविप्राकिमन्यद्भो
तुमिच्छसि॥इत्यादि०पंचपंचाशत्तमोध्यायः॥५५॥सवर्तक०॥चंद्रतीर्थस्यचोत्पत्तिंसूर्यतीर्थस्यचोभयो:
प्रभावंचद्विजश्रेष्ठयथावद्वक्तुमर्हसि॥१॥नारद०॥शृणुविप्रकथामेनांसर्वपापप्रणाशिनीं॥मातदास्यप्रमो
क्षार्थंगरुडःपतगेश्वरः॥२॥जित्वासुरासुरांस्तत्रसुधामाहृतवान्पुरा॥आनीयेदंवैनतेयःस्थितवान्यत्रपक्षि
राट्॥३॥तदाव्रजन्कादृवेयाःस्थितास्तत्रमहाबलाः॥रोषाद्यानागराजानःपातुकामाःसुधांद्विज॥४॥
अधस्ताद्विजशार्दूलमुहूर्तंपन्नगाननः॥विधायसोमंगरुडःशचीपतिमुवाचह॥५॥समस्तदेवैःसहि

तमनुयातंमहेश्वरं अद्यप्रभृतिदेवेशमाज्ञाममतपस्विनी दिदासोमाचाद्विप्रमुत्कारत्नंशुल्केनवा
मृतं ७ एतद्वत्तंसुरश्रेष्ठादानीतममृतंमया क्षंतुमर्हसितंदेवब्रूहिकिंकरवाणितं ८ ततस्तदमृतंत
स्यभगवान्पाकशासनः तदनंतायभगवानददौकिंचित्सुरेश्वरः ९ गृहीत्वासोममगराद्दनमरुत्
त्यमहेश्वरं पपौतत्रैवभद्रंतेब्राह्मणैःसहितोविराट् पीत्वाप्रसादोद्देवानाममरत्वमवाप्तवान् १० नि
क्षिप्तंयत्रवैसोमंगरेणमहात्मना तस्मिन्नोषधयोजाताजज्ञिरेत्रीणिसत्तम ११ सोमप्राप्यनुमा
लीचसुमालीचैवसत्तम अमृतोद्भवत्वाद्ब्रह्मन्नमरत्वप्रदानिच १२ महतातपसालक्ष्यान्यलभ्यानिच
पापिना तत्सोमतीर्थंविख्यातंसर्वतीर्थोत्तमोत्तमं १३ सोमनिष्यंदजानितमृषिदेवार्चितंसदा सर्व
पापहरंनृणांतपोवर्धनमुत्तमं १४ सोमकुंडमितिख्यातंतीर्थानांप्रवरंमहत् यस्मिन्सोमस्तपस्ते
पेसिद्धिकामःपुराद्विज १५ तत्रोत्तोर्यमहादेवंतपसामहतामुना संसिद्धिमाप्यमहतीमन्यांसंप्राप्य

संपदः ॥ १६ ॥ मूर्ध्निस्थानमवाप्याग्र्यंदेवदेवस्यसत्तम ॥ देवानामभवच्छ्रेष्ठस्तत्रस्थश्चेंद्रमाद्विज ॥ १७
सोमतीर्थेनरः स्नात्वाविंदद्धहुसुवर्णकं ॥ सर्वपापैः प्रमुच्येतसत्यजन्मकृतैरपि ॥ १८ ॥ सूर्यतीर्थंचतत्रै
वश्रूणुद्विगदतोमम ॥ त्वष्टुः प्रजापतेःकन्यासार्यसूर्यस्यसत्तम ॥ १९ ॥ सासहत्यथतत्तेजः पितुर्वरमावा
जसुनः ॥ ततस्तदनुसूर्योपित्वष्टुर्गृहमुपागमत ॥ २० ॥ समाजस्तत्रदेवानांसदाह्यासीद्विजोत्तम ॥ त
तस्त्वष्टामहातेजाः संमंत्र्यसहदेवतैः ॥ २१ ॥ तेजोविश्रामयामासयंत्रमारोप्यतेजनैः ॥ सूर्याद्विश्रा
मयामासद्वितीयांशंसुरोत्तमः ॥ २२ ॥ तदंशमगमत्पुत्रसमुद्रेवरुणालये ॥ गिरेः शृंगवतस्तस्मिंस्तटे
नागात्मयोनिधेः ॥ २३ ॥ ततस्तंगृह्यभगवान्त्रिवः सुरगणान्वितः ॥ तपसामहताविश्वचक्रेचक्रंसु
दर्शनं ॥ २४ ॥ सुदर्शनमितिख्यातंपूर्वंतद्विजसत्तम ॥ ततः सुदर्शनंजातंदेवानांतद्विशेषतः ॥ २५ ॥
ततः सूर्यस्यैवतेजः संवृतंसद्तेजसा ॥ सर्वदेवमयस्तातवरुणोयादसांपतिः ॥ २६ ॥ तपसातस्यद

और्वमाहजगन्नाथः शंखचक्रगदाधरः ॥ १७ ॥ कोपः संह्रियतांब्रह्मन्रक्षस्वभुवनत्रयं निरागस
मकालेतुक्रोधंसंहर्तुमर्हसि १८ तमेववह्निंविप्रेंद्र संस्तंभयितुमर्हसि कोऽहिसर्वभूतानिस
क्षानिपरमेष्ठिना १९ संह्रियंतेधुनानानिवह्निनाननसुव्रत इत्युक्तः सहसातेनविष्णुनाप्रभवि
ष्णुना २० हतांजलिपुटोभूत्वाक्षम्यतामितिचाब्रवीत् यथेष्टंसिजगन्नाथतथासंहर्तुमर्हसि २१
कालग्रासेदेववरयदिवह्निश्चराचरं दहन्मदीयोभगवन्यथेष्टंसितथाकुरु २२ मन्नाम्नाग्निरयं
लोकेख्यातोभवितुमर्हति तपोहानि र्नमेदेवलसप्तसादाद्भवन्मम २३ तीर्थमेतत्सुरश्रेष्ठलोक
पूज्यतमंमहत् इत्युक्तः सविष्णुस्तनदीतस्मैवरंतथा २४ अ मेरोर्वस्यभगवन्सर्वदेवैः सहप्र
भुः विधायरक्षांविधिवत्तत्रैवांतरधीयत २५ संवर्तक० केवैरंतिविप्रेंद्रऔर्वाग्निंवरुणालयं
वडवाख्याहिभगवन्कथंतत्कथयस्वमे २६ नारद० अधस्ताद्वरुणोदेवोरक्षितावडवामुखं अग्नि

त्युत्पत्त्येतकरणाःसर्वेषांप्रपितामहाः ३७ पृथङ्नामप्रवाहाश्चशिवश्चवृषभध्वजः ऋग्यजुःसा
विहिताःपद्मोद्भवनोकसः ३८ मुक्तिमुक्त्यपवर्गाणांदातारःपरमेश्वराः नमस्तेब्रह्मणेशाय्यविष्
वेचनमोनमः ३९ नारायणेनमस्तेस्तुकेशवायनमोनमः विरिंचायनमस्तेस्तुसर्वेषांवेदमोनमः ४०
त्रिभिर्व्यसिमिदंविश्वंदृश्यादृश्यंमहेश्वराः त्रिभिर्गुणमयैर्यैर्यैस्त्रैलोक्यंव्याप्यनिष्ठिताः ४१ एकस्य
निनामीत्याःपृथगज्ञानिनोस्थिताः उपसंहृत्यवेदैकमेकमूर्तिमुपागताः ४२ क्षणेनतस्यतुष्ट
वरंब्रूहीतिचोचिरे यथावत्तेवरंनागः शृणुधाद्विजसत्तम ४३ प्रणिपत्याहतांमूर्तिंब्रह्मविष्णुशिवा
कोऽद्वैतभावनामेस्तुयथावैत्वज्जरामरः ४४ परंब्रह्ममयंज्ञानंप्रतीतस्यसदामम मत्समोनभ
लोकेप्राण्यप्राणिबलेनच ४५ स्थानमेतत्सुरश्रेष्ठनाकपृष्ठसमंभवेत् तीर्थमेतन्मदीयंतुनृणामेह
दायकं ४६ भवेदेतत्सुरश्रेष्ठयदिमत्प्रियमिच्छसि तथास्त्वितिचतैरुक्तोनागराजः प्रतापवान् ४

वस्यत्वष्टुःशिक्षाबलेनहिरक्षार्थंसर्वदेवानांनिर्ममेशंकरःस्वयं २७ तद्धतेवैभगवताविष्णुना
प्रभविष्णुना तपसाराध्यरौद्रेणभगवंतंत्रिलोचनं २८ तत्सूर्यतीर्थंविख्यातंयत्रकीर्णंमहोरवैः
तत्रस्नातःसर्वतीर्थस्नातोभवतिमानवः २९ पापकंचुकमुत्सृज्यसूर्यलोकंगमिष्यति अग्निष्टो
मस्ययज्ञस्यफलंप्राप्नोत्यखंडितं ३० अतःपरमनंतस्यशृणुतीर्थंवदामितं पीत्वामृतमनंतस्तुत
त्रेतेपमहत्तपः ३१ दिव्ययुगत्रयंतत्रदेवमुद्दिश्यसनातनं कृतयुगेयुगश्रेष्ठंविष्णुमाराधयत्प्रभुः
३२ ब्रह्माणमथत्रेतायांद्वापरेचमहेश्वरं युगंपश्चिममासाद्यध्यायंन्नास्तसंशयं ३३ तेषुत
भगवाननंतःपन्नगेश्वरः दृष्ट्वादृष्टिपथंतंवैरुद्रंवचनमब्रवीत ३४ सहस्रसंख्यैर्विप्रैर्द्विजैरा
भिःप्रणिपत्यचनमःकर्त्रेचहर्त्रेचभेत्रेचजगतांनमः ३५ कार्यंविष्णुःक्रियाब्रह्माकारणंतुमहेश्व
रः भुक्तिमुक्त्यपवर्गार्थंजनायंविबुधेश्वराः ३६ एकमूर्तेस्त्रयोभागाब्रह्मविष्णुमहेश्वराः स्थि

चरमिदं शृणुष्वावहितो वरं ॥ त्वदधीनासिद्धिरियं तत्किं सिद्धिमभीप्सासि ॥११॥ शिशुमारउ०॥ क्षेत्रं त्वहं हि देवानां मदुत्पन्ना हि देवताः ॥ तथापि सिद्धिमिच्छामि क्षेत्रेस्मिन्नेवशंकर १२ सप्रभुः सर्वलोकानामस्माकं चसुरोत्तम ॥ त्वयाकृतानि चैतानि स्थितिकृत्यान्यनेकधा १३ त्वयाकृतमिदं विश्वं त्वय्येवाहं त्रिलोचन ॥ त्वदधीनापरासिद्धिर्नात्रकार्याविचारणा १४ शंकरउ० व्यक्तमुक्तं त्वयाब्रह्मन्शिशुमारमहामते तस्मात्सिद्धिर्भवतुतेमत्प्रसादात्सुरारणे १५ येद्रक्ष्यंत्याश्रमंमिदं तेपिसिद्धाभवंतुवै ॥ त्वयाकृतमिदंतीर्थं त्वन्नाम्नाख्यातिमेष्यति १६ इतितस्मैवरंदत्वाभगवानूभूतभावनः ॥ तत्रैवादर्शनंयातः किंन्यच्छ्रोतुमिच्छसि १७ संवर्तकउ० कोसौदेवऋषेब्रूहिशिशुमारः प्रजापतिः प्रभावंतस्यमेशंस जन्मकर्मचवैमुने १८ नारदउ० एकादशेपुराविप्रकल्पादौभगवान जः स्रष्टुकामः प्रजाः सर्वाज्जलादूर्ध्वमुपागतः १९ चित्ररूपंददर्शाथछायारूपमिवांबरे ॥ तंदृष्ट्वाचिंतयन्ब्रह्माकिमेतादृशं सुव्रत २० ततोदध्यौचिरंब्रह्मा ज्ञातुंतद्भूतभावनः ॥ ज्ञात्वाज्ञानेनततद्भूतं ब्रह्मालोकपितामहः २१ ततोददर्शविश्वात्मापीयमानंपयोनिधिं ॥ क्षणान्निस्तोयभूतंतद्विष्ण्यानिदृष्टप्रभुः २२ ततःस्वक्षेत्रमितितं ज्ञात्वाब्रह्मायुयोजच ॥ यद्रूपधरःसोथब्रह्माणमुपचक्रमे ॥ २३ ॥ तस्मादुत्थत्यजीवांश्च देवादीनांपितामहः ॥ देवादितृणपर्यंतमसृजत्सचराचरं २४ सृष्ट्वाहिसर्वभूतानिब्रह्मालोकगुरुःस्वयं ॥ पुनस्तस्मिंछिशुमारे अज्ञान्यादायसुव्रत २५ क्षिप्तेसर्वभूतेश्वराचरकृतेछ या यक्षाहिकषकः पुत्रसिद्धेर्व्रीहिषुबुद्धिमान् २६ बीजान्युत्थत्यमिदधेतदेवाक्षयमिच्छया ॥ तथासोभूतकर्तृत्वं शिशुमारेन्यधापयत् ॥ २७ ॥ । तस्मान्नित्यशरीरोसौदेवानांचप्रजापतिः ॥ सएवपूर्वाहिसृष्टथकृततस्तस्मादजायत २८ तत्राग्निमचलामाकुः परांसिद्धिंद्विजोत्तम ॥ सोप्यत्रागत्यभगवान्शिशुमारःप्रजापतिः २९ ॥ सिद्धिमापमहाक्षेत्रेगो

कर्णेब्राह्मणोत्तम ॥ [illegible] सर्वदेवमयंक्षेत्रंगोकर्णमभिधीयते ३० भुक्तिंमुक्तिंपरांसिद्धिमिच्छंत्यत्रसुरासुराः ॥ गंधर्वाप्सरसश्चैवसुपर्णायक्षराक्षसः ३१ सिद्धविद्याधरगणाः पशुपक्षिसरीसृपाः ॥ नगानागामनुष्याश्चतीर्थानिचसरांसिच ३२ नद्योनदाश्चतरवः सर्वेचाद्विजसत्तम । गोकर्णक्षेत्रमासाद्यसिद्धिंप्राप्ताःपरात्परं ३३ तस्मात्क्षेत्रवरंत्वेतद्गोकर्णंपावकात्मज ॥ नारदउ० ॥ पुराकैलासशिखरेपार्वत्येप्राहशंकरः ॥ गोकर्णक्षेत्रमाहात्म्यं देवीश्रुत्वामुदान्विता ३४ उवाचशंकरंप्रीत्यागोकर्णंदर्शयस्वभो ॥ सतीर्थसेवनंदेवसर्वसिद्धिप्रदंनृणां ॥ ३५ ॥ तच्छ्रुत्वाशंकरःप्रीतोवृषारूढःप्रियान्वितः ॥ प्रययौप्रमथैःसार्धंगोकर्णंभरतर्षभ ३६ दर्शयामासतत्क्षेत्रंदेव्येतेभ्यश्चशंकरः ॥ वनानिसरितश्चैवतीर्थान्यायतनानिच ३७ गोकर्णस्थानिलिंगानि त्रातश्रृंगंमहागिरिं ॥ दृष्ट्वासर्वमशेषेणगोकर्णंविस्मयान्विता ३८ विश्वरूपधरादेवीशंकरंप्रत्यभाषत ॥ पार्वत्युवाच ॥ वत्स्यामिकाम्यहंचात्रतवक्षेत्रेमहेश्वर ॥ रमणीयंशिवंगुह्यंश्रेष्ठंस्थानंविधीयतां ॥ ३९ ॥ तच्छ्रुत्वाहप्रियांशंभुः पार्वत्यासहितस्तदा ॥ त्रातश्रृंगगिरेस्तस्यपार्श्वेदक्षिणपश्चिमे ॥ ४१ ॥ * देवःस्मितपूर्वंकुरूद्वह ॥ रुद्रभानिसर्वेस्थानानिगोकर्णेवरवर्णिनि ४० एवमुक्त्वाप्रियां*) उवासप्रिययासार्धंपार्षदैः सहशंकरः ॥ उमावनमितिख्यातमाश्रमंतदभून्महत् ॥ ४२ ॥ तत्रतौदंपतीराजन्सहभूतैरधिष्ठितौ ॥ तदाश्रमंनपश्यंतिपापिष्ठानास्तिकाःप्रभो ॥ ४३ ॥ मालिन्यादक्षिणेभागेगिरेरुपरिसंस्थितं ॥ तदाश्रमंपालयंतिप्रमथास्तत्रसंस्थिताः ॥ ४४ ॥ नानावर्णशिलास्तत्रदृश्यंतेद्विजपुंगव ॥ तत्रसंतित्यसंख्यानितीर्थानिमुनिसत्तम ॥ शिलातुकुंडिकाकारासमुद्रोपरिवर्तते ॥ क्रीडार्थंतत्समानीतंकैलासाद्भृंगमुत्तमं ॥ ४६ ॥ पृथिव्यांयानितीर्थानियानिस्वर्गेवसंतिहि ॥ तानिसर्वाणितत्रैववसंतिभरतर्षभ ॥ ४७ ॥ शैलार्थंगिरिजादेव्यास्तद्दूनस्यचदक्षिणे ॥ तेषांद्रवमभूत्तीर्थमुमाद्रव

मितिप्रभो ॥४८॥ तत्रस्नात्वानरोभक्त्यागौरीवाभ्यांस्थापितंशुभं ॥ उमामहेश्वरंनामलिंगंत्रैलोक्यविश्रुतं ॥४९॥ कार्तिकेशुक्लपक्षेतु
दशम्यांयःपूजयतिभक्तितः ॥ पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं ॥५०॥ कन्यार्थीलभतेकन्यां मोक्षार्थीमोक्षमाप्नुयात् ॥
सप्तजन्मकृतात्पापात्स्नात्वातत्रप्रमुच्यते ॥५१॥ तस्मिन्वनेस्फुरत्तरुः सर्वकामफलप्रदः ॥ तत्रछायाकरोह्यास्तेछायापाद
पउच्यते ॥५२॥ सदापुष्पफलोपेतः सप्तहस्तोद्धृतश्वसः ॥ पत्रंपुष्पंफलंचास्य येखादंतिनराध्रुवं ॥ ५३॥ तेषांनमृत्युर्नज
राथावन्मब्रुवंतरंद्विज ॥ तंनपश्यंतिविप्रेंद्रविषयाकृष्टचेतसः ॥ ५४॥ तस्मात्तीर्थाद्दुत्तरतस्तीर्थंतत्कुंडिकास्थं ॥ आस्तेपुण्यत
विप्रदृष्टमात्राघनाशनं ॥ ५५॥ संवर्तउ०॥ मालिनीनामनत्तीर्थंकथमासीच्छुभंभुवितस्यतीर्थस्यचोत्पत्तिंवदमेमुनिपुंगव
॥५६॥ नारदउ०॥ शृणुविप्रप्रवक्ष्यामि मालिनीतीर्थसंभवं ॥ क्रीडागिरेरधोभागे मालिनीनामनिम्नगा ॥५७॥ आस्तेपुण्योदकाराज
नूत्तमांपुण्यविवर्धिनी ॥ स्वायंभुवांतरेविप्रराजासीत्पृथिवीपतिः ॥५८॥ चंद्रदेवइतिख्यातः साक्षात्चंद्रइवापरः ॥ मालिनीना
मतस्यासीद्भार्यापरमशोभना ॥५९॥ तयासार्धंनृपवरःसिद्धिमिछन्पराद्विज ॥ गोकर्णक्षेत्रमासाद्यक्रीडशैलादधस्तले ॥६०
तपस्तेपेनिराहारः सपत्नीकःशिवंयजन् ॥ दिव्यवर्षसहस्रंतुब्रह्मचर्यपरायणः ॥६१॥ ततःप्रसन्नोभगवानुमयासहितःशिवः
प्रत्यक्षमगमत्तस्यवरंब्रूहीत्युवाचत ॥ ६२॥ इतितद्वचनंश्रुत्वानत्वास्कृत्वाऽञ्जलिं ॥ हर्षगद्गदयावाचाशंकरंवाक्यमब्रवीत् ॥६३॥
चंद्रदेवउवाच ॥ त्वयिसायुज्यमिछामि तथास्त्वितिचसोब्रवीत् ॥ त्यक्त्वाकलेवरंतौतुतत्क्षणाद्विजपुंगव ॥ ६४॥ वायुभूतोविधि

शतुर्देवंदेवींद्विजोत्तम ॥ चंद्रदेवाश्रमंनामख्यातंमुक्तिप्रदंनृणां ॥ ६५॥ तयोस्तपःप्रभावेणकामार्तौतौबभूवतुः ॥ संगमंचक्रतु

ततोनंतः प्रविश्याब्धिं जलमार्गेण वह्निज ॥ संस्तूयमानो नागेंद्रैर्गंधर्वाप्सरसांगणैः ४८ स्वस्थानमगमद्विप्र अनंतः पन्नगा
धिपः ॥ तत्रानंतह्रदंनामपाषाणंलोकविश्रुतं ४९ शिलायांदृश्यतेमार्गः समुद्रेचतथाविधः ॥ तन्मार्गंयेप्रपश्यंति शिलायांवरु
णालये ५० आजन्मचरितंपापंदर्शनादेवनश्यति ॥ तच्छिलायाश्चसविधेउत्तरेनागशासितुः ५१ सर्वपापहरंपुण्यंतीर्थम
स्तिमहोदयं ॥ तस्मिन्स्नातःसर्वतीर्थेस्नातोभवतिमानवः ५२ इत्यादि० षट्पंचाशत्तमोध्यायः ५६ नारदउवाच शिशु
मारमितिख्यातंतीर्थंत्रैलोक्यविश्रुतं ॥ एकविंदोर्दक्षिणतस्तीर्थमस्तिमहोदयं १ सर्वदेवमयःसाक्षाच्छिशुमारः
प्रजापतिः ॥ तपस्तेपेनिराहारः सिद्धिमिच्छन्पुराद्विज २ घोरेणतपसातस्यतुतोषभगवान्हरः ॥ प्रत्यक्षमग
मत्तस्य साक्षाद्विश्वेश्वरः शिवः ३ प्रजापतिस्तुतंदृष्ट्वादेवदेवमुमापतिं ॥ दंडवत्पतितोभूमौम्यांननामशिरस
विभुं ४ उत्थापयामासतदाप्रणतंपिनाकधृक् ॥ उवाचचैनंगौरीशोवरंब्रूहीतिसादरं ५ क्षेत्रंभवान्ममाधिभो
देवानांचप्रजापते ॥ मत्तःकिमिच्छसिविभोब्रूहितन्नेददाम्यहं ६ तच्छ्रुत्वाभाषितंशंभोर्नत्वास्तुत्वाप्रजापतिः
कृतांजलिपुटोभूत्वावरंवव्रेप्रजेश्वरः ७ सिद्धिमिच्छामिभगवन्परांसिद्धिंचदेहिमे ॥ येचात्रागत्यभगवन्
स्नांतितीर्थेममप्रभो ८ तेपिसिद्धाभवंत्वत्रप्रसादाद्भक्तवत्सल ॥ मन्नामपार्वतीकांततीर्थं तीर्थख्यातिंचयच्छ
तु ९ श्रीशंकरउ० सिद्धोसियेपूर्वमेवस्वभावात्त्वंसुराग्रणे ॥ त्वदंशभूताहिवयंसर्वेचैवसुरासुराः १० चरा

हमितिद्विज ॥ मयाविनाक्षेत्रमिदं मुहूर्तंनावतिष्ठते ॥१२॥ एवंपरस्परंदेवास्तद्वचुर्वह्निनंदन ॥ तत्रसर्वेदेवगणास्त्यक्त्वास्वंस्वंकलेवरं
॥१३॥ वायुभूताश्चरंतिस्मतत्क्षेत्रंपूर्ववात्स्थितं ॥ चंद्रमाधिष्ठितत्वाच्चनित्यत्वाच्चद्विजोत्तम ॥१४॥ ननाशमगमत्सोपिशिरुमारः
प्रजापतिः ॥ चंद्रमाः सर्वभूतानांश्रेष्ठइत्यवगम्यते ॥ १५॥ शरीरार्थंततः सर्वैस्त्यास्वांयोनिमपागमन् ॥ धर्मोपिभगवान्देवः स्वांयोनिंसमचि
तयत् ॥१६॥ ज्ञात्वासूर्यं विशेषाच्चवायुभूतः सनातनः॥ तस्मिकालेसभगवान्विवस्वान्लोकभावनः ॥ १७॥ तपस्तेपेसगोकर्णे सिद्धि
कामः सुरोत्तमः॥ संज्ञयासहविप्रेंद्र त्वष्टृपुत्र्यासमन्वितः॥१८॥ सोम्यमूर्तिधरोलिंगंज्ञांभवंस्थाप्यपूजयन् ॥ दिव्यवर्षसहस्रांते
भगवानोदृषध्वजः॥ १९॥ प्रत्यक्षमागमत्तस्मिन्लिंगेसूर्यस्यसत्तम ॥ तमाहदेवदेवेशोवरंब्रूहीतिसादरं ॥ २०॥ ततःप्रणम्य
भगवान् आदित्यस्तपतांवरः॥ कृतांजलिपुटोभूत्वास्तोतुंसमुपचक्रमे ॥२१॥ सूर्यउ०॥ विश्वमूर्तेनमस्तुभ्यंमूर्तमूर्तेनमोस्तुते ॥
ज्ञानगम्यनमस्तेस्तुनमस्तेज्ञानदायिने ॥ २२ ॥ अध्यात्ममूर्तयेतुभ्यंलोकांतकनमोस्तुते ॥ नमस्तेकालदहनविष्णुप्रियनमोस्तु
ते॥ २३॥ पूष्णोदंतविनाशायभगनेत्रहरायच ॥ नमःकर्त्रेचभर्त्रेचहर्त्रेचहरयेनमः॥ २४ ॥ नमःशिवायशांताय त्र्यंबकायनमोनमः
॥शूलपाणयेतुभ्यं पूर्णानंदायतेनमः ॥ २५ ॥ सामगम्यनमस्तेस्तुनमस्तेसर्वसाक्षिणे॥ जयदेवजगन्नाथजयसर्वसुरार्चित ॥ २६॥
जयविश्ववादिनमितजयनित्यनिरंजन ॥ शरणंभवभूतेशजन्ममृत्युजरापह ॥ २७॥ परांसिद्धिंप्रदित्वामे नमस्तेसर्वरूपिणे ॥ इति
स्तुतः सभगवान् सूर्येणसुरनायकः ॥२८॥ प्रीतिमानाहसर्वज्ञः शिवः सूर्यमिदंवचः॥ सिद्धोसिवेत्स्वभावेनसिद्धिस्त्वय्येववर्तते ॥
त्वय्येवभगवान्ब्रह्मात्वयिसर्वंचराचरं ॥ येत्वांस्मरंतिद्युमणेतेपश्यंतिपरंपदं ॥ २९॥ तथापिमत्प्रसादेनसिद्धोभवमहाद्युते ॥
त्वय्येवाहंसुरश्रेष्ठ विष्णुस्त्वय्येववर्तते ॥ ३०॥ तेजसासर्वभूतानांश्रेष्ठोभवसुरार्चित ॥ त्वयाकृतमिदंतीर्थं लिंगंस्थानंसु

हाधिप ॥३४॥ श्रेष्ठंभवतुसर्वत्रमत्प्रसादाद्विभावसो ॥ इतितस्मैवरंदत्वालिंगेतस्मिन्व्यलीयत ॥३५॥ अदृश्यमानेदेवेशेसूर्यःसंज्ञामुपाविशत्
धर्मस्तदाससमुत्पन्नः सूर्यात्तस्याद्विजोत्तम ॥३६॥ तदेतद्दृश्यतेविप्रआश्रमंपुरतस्तव ॥ सूर्याश्रममितिख्यातंक्षिप्रंसिद्धिकरंनृणां॥३७
पुण्याश्रममितिख्यातंनृणांपुण्यविवर्धनं ॥ उत्पाद्यधर्मंसूर्यश्चयथास्थानमगात्प्रभुः॥३८॥ धर्मोपितत्रभगवान्सूर्याश्रमसमीपतः ॥ के
त्वाश्रमपदंब्रह्मन्तपस्तेपेसुदुश्चरं ॥ ३९॥ सिद्धिकामःपुराविप्रवर्षाणामयुतंप्रभुः॥तस्यतुष्टास्त्रयोदेवाब्रह्मविष्णुमहेश्वराः॥४०
प्रत्यक्षमगमन्तस्यधर्मस्यमुनिपुंगव ॥ वरंब्रूहीतितंब्रह्माप्रथमंचाहपावके ॥४१॥ ततःप्रणम्यधर्मोपि पितामहमुवाचह ॥ सिद्धि
मिच्छामिभगवंस्तांमे देहिजगद्गुरो ॥ ४२॥ परंज्ञानंचदेवेशाविततस्वपितामह ॥ तथास्त्वितिचतेनोक्तेविष्णुर्धर्ममुवाचह ॥ ४३॥ यु
ष्माणमन्तोपिवरंमनसायद्यदिच्छसि ॥ततः प्रणम्यधर्मोपिवरंवव्रेद्विजोत्तम ॥ ४४॥ बलेनमत्तोदेवेशानकश्चिदधिकोभवेत् ॥ लोक
पालत्वमपिचवरंदेहिजनार्दन ॥४५॥ तथेतिविष्णुनाप्रोक्तेरुद्रोधर्ममुवाचह ॥ मत्तोपित्वंवरंदेव गृणीष्वयदिमन्यसे ॥ ४६॥ इत्युक्तः
शूलिनाधर्मः प्रणिपत्यमहेश्वरं ॥ममाश्रमेपुण्यतमेमच्छ्वुर्नभवेत्प्रभो ॥ ४७॥ अत्रस्थोयस्त्यजेत्प्राणान्सोक्षयंस्वर्गमाप्नुयात् ॥ अत्रा
गत्यभजंतेवांतेषांपापंविनश्यतु ॥४८॥ सप्तजन्मार्जितंयावद्वरमेतद्वृणोम्यहं ॥ तथास्त्वितिचतंविप्रप्रोवाचभगवान्शिवः॥ ४९॥ एवं
लब्धवरःसोथकृतकृत्योबभूवह ॥ इतिदत्वावरंतस्मैब्रह्मविष्णुमहेश्वराः॥५०॥ तत्रैवांतर्दधुर्लिंगेधर्मस्यमुनिपुंगव ॥ तन्नास्तेमु
निशार्दूलतीर्थंधर्मकृतंमहत् ॥५१॥ पापनाशनसंज्ञंतु पुण्यंदेवर्षिसेवितं ॥ तत्रस्नात्वानरोभक्त्याधर्मेशंपरिपूजयेत् ॥ ५२॥
जपेत्पंचाक्षरंमंत्रंसर्वपापैः प्रमुच्यते॥ सूर्यतीर्थमितिख्यातंतत्रैवाद्विजसत्तम ॥५३॥ सर्वपापहरंपुण्यंसर्वकामफलप्रदं ॥ तत्र
स्नात्वानरोभक्त्याविराजतियथारविः॥ ५४॥ पापकंचुकमुत्सृज्यत्वचंजीर्णमिवोरगः॥ गोसहस्रप्रदानस्य फलंचलभतेनरः॥ ५५॥

एतत्पवित्रंपरमंद्विजोत्तम सिद्धिप्रदंसर्वविपत्प्रमोचनं ॥ सुरासुराद्यत्रमहानुभावाःस्नात्वाऽभवन्नार्थाः सुखिनोबभूवुः ॥ ५६॥ ॥इत्यादि० अष्टपंचाशत्तमोध्यायः ॥ ॥ नारदउ०॥ सनत्कुमारोभगवान्तत्रसिद्धः सनातनः ॥ तपसामहतांविप्र क्षेत्रेवैपार्वतीसुत ॥ १॥ संवर्तऊ उ०॥ कथंसभगवान्सिद्धः क्षेत्रेस्मिन्ब्रह्मनंदनः ॥ सनत्कुमारस्यकथांब्रूहिमेमुनिपुंगव ॥ २॥ नारदउ०॥ सनत्कुमारोभगवान्ब्रह्मणोमानसःसुतः ॥ कृत्वाश्रमंतपस्तेपेगोकर्णेमुनिपुंगवः ॥ ३॥ वत्सपद्मासनोमौनीनिराहारोजितेंद्रियः ॥ ध्यानमास्थेनिरालंबो वर्षाणामयुतंप्रभुः ॥ ४॥ अंतर्निरुध्यसर्वाणिनिरालंबोमहामनाः ॥ प्राणापानौचभगवान्ध्यानोदानौचसत्तम ॥ ९॥ निरुध्यतान्समानेतुवायोर्वियत्तिसंस्थितः ॥ निरुध्यसर्वद्वाराणिविषयेभ्यःपरंतपाः ॥ ६॥ परमार्थंपरंब्रह्मशिवंशांतमकल्मषं ॥ मन्येवेतिमहायोगीध्यात्वाब्रह्माद्वितीयकं ॥ ७॥ योगैश्वर्यबलाद्ब्रह्मन्परंमनसिधिष्ठितं ॥ तपतस्तस्यभगवान् आविरासीत्सदाशिवः ॥ ८॥ पुरतोवृषभारूढोवरयेत्याहतंमुनिं ॥ दृष्ट्वादेवमुमाकांतंशरण्यंभक्तवत्सलं ॥ ९॥ प्रणम्यदंडवद्भूमौयोगीवाक्यमुवाचह ॥ यदितुष्टोसिदेवेशशाश्वतीसिद्धिरस्तुमे ॥ १०॥ तमुवाचाथदेवेशःस्निग्धगंभीरयागिरा ॥ सिद्धोसिवैपूर्वमेवस्वभावादेवसत्तम ॥ ११॥ तथापिमत्प्रसादेनसिद्धिस्तवभविष्यति ॥ ददामितवभूयोपिवरंवरय पुत्रक ॥ १२॥ तपसानियमेनाथतुष्टोस्मिनितरामुने ॥ सनत्कुमारउ०॥ यदितुष्टोसिदेवेशवरमन्यद्ददासिचेत् ॥ इदंमयाकृतंलिंगंत्रैलोक्येतिलकं भवेत् ॥ १३॥ योगेश्वराभिधानेनस्पर्शनात्स्वर्गदंनृणां ॥ पापिनामपिसर्वेषांभवत्विहसुरेश्वर ॥ १४॥ तच्छ्रुत्वावचनंशंभुर्योगींद्रस्यद्विजोत्तम ॥ तथास्तितिवरंदत्वालिंगेतस्मिन्व्यलीयत ॥ १५॥ नारदउ०॥ सनत्कुमारोभगवान्सिद्धिंप्राप्यमहेश्वरात् ॥ ययौब्रह्माश्रियायुक्तोरोदसीदापयन्प्रभुः ॥ ॥ १६॥ सत्यलोकंप्रतितदा योगींद्रोहृष्टमानसः ॥ तद्दिदृक्षयातेविप्रआश्रमंश्रमनाशनं ॥ १७॥ आश्रमात्तवरंक्षेत्रंक्रोशमात्रेस्थितंमहत् ॥ लिंगंयोगेश्वरंनामस्पर्शनात्स्वर्गदंनृणां ॥ १८॥ स्पृश्यतत्सर्वभूतानि स्वर्गंगच्छंत्यहर्निशं ॥ महापातकयुक्ताश्चक्षुपपातकिनस्तथा ॥ १९॥ तिर्यग्योनिगताश्चा

स्तत्रस्थ्वा चिरं मुनिपुंगव ॥६६॥ तयोः संभोगजनिता ऋक्षभूता महानदी ॥ शुद्धस्फटिकसंकाशा निर्मला पापहारिणी ॥ ६७॥ तयोः
कलेवरंगृह्यबभ्राम द्विजसत्तम ॥ मालाकारेव तच्छृंगं वेष्टयामास पाविनी ॥ ६८ ॥ मालिनी नाम विख्याता नदी सर्वरसाश्रया ॥
तदंभः पीतमात्रेण दिव्यदेहसमन्विताः ॥ ६९ ॥ देवतुल्याश्चरिष्यंति प्राणिनः सर्वएवाहि ॥ द्वादशेद्वादशेवर्षे फाल्गुनेमासिसव्रत ॥
फल्गुनीषु द्विजश्रेष्ठ तदादर्शनमेष्यति ॥ देवानांचऋषीणांच सिद्धानांच द्विजोत्तम ॥ नेतांस्तनघाः पश्यंति ननृशंसाननास्तिकाः ७२
तस्मिन्काले नरोयस्तु तस्मिन्स्नातिद्विजोत्तम ॥ सोमरत्वमवाप्नोति सत्यंसत्यं मयोदितं ॥ ७३॥ ॥इत्यादि० सप्तपंचाशत्तमो
ध्यायः॥ ॥संवर्तक उ०॥ धर्मस्यचरितंब्रूहि तस्यतीर्थस्यचप्रभो ॥ आश्रमस्यास्यपुण्यस्य नित्यस्यपरमेष्ठिनः ॥ १ ॥ नारदउवाच॥
प्रजाःसिसृक्षतापूर्वं ब्रह्मणापरमेष्ठिना ॥ सृष्टश्चभगवान्देवोमनसःपद्मजन्मना ॥ २ ॥ चतुष्पादोगवांधर्मो बभूवद्विजसत्तम ॥ ऋक्षस्थः
स्फटिकसंकाशः शुद्धबुद्धिसमुद्भवः ॥ ३ ॥ तस्मिन्जातेभगवतिब्रह्मालोकपितामहः ॥ भारार्तः पुरुषोयद्वदवरोप्य लघुधर्मवेत् ॥ ४ ॥
तद्वदासीज्जगत्स्रष्टासस्रष्टाधर्मसनातनं ॥ सृष्टानि सर्वभूतानि ब्रह्मणाब्राह्मणोत्तम ॥ ५ ॥ दधारधर्मोभगवान्प्रजाःसर्वास्तदामुने
प्रजयाधार्यतेधर्मः सततंस्रष्टुमिच्छता ॥ ६ ॥ धर्मोधाताप्रिताचैवलोकानांप्रभुरव्ययः ॥ तस्मात्त्रिमाऊर्ध्वधर्मज्ञाः सिद्धिंपावकनंदन ॥ ७
स्वर्गोनिर्वाणमपिच धर्माद्भवतिनान्यथा ॥ सृष्ट्वातंभगवान्ब्रह्माऋणमुक्तोबभूवह ॥ ८ ॥ सत्पुत्रेणापितायद्वदृणमुक्तोभविष्यति ॥ तथाधर्मेणभगवान्ब्रह्मालोकपितामहः ॥ ९ ॥ प्रीत्यातमाहभगवन्मत्प्रजाःपरिपालय ॥ तथेत्युक्त्वाप्रणम्याथधर्मो
ब्रह्माणमब्रुत ॥ १० ॥ पितुराज्ञांपुरस्कृत्यपालयामासयैप्रजाः ॥ ततोविवादमभवद्देवानांवैपरस्परं ॥ ११ ॥ अहंश्रेष्ठः शरीरेस्मिन्स्तत्रज्ञा

माराधयामासकश्चक्रार्थंत्रिदिवौकसः॥४२॥ तेषांप्रसन्नश्चैवासीद्भगवान्वृषभध्वजः॥ अवतारयामासविभुस्तद्भागंभवभंगकृत् ॥४३॥ततो
वतार्यतद्भागं पातालेसंन्यवेशयत्॥ पूजितंनागकन्याभिर्नागैश्चापिद्विजोत्तम ॥४४॥ ततस्मात्पुनश्चक्रमुत्तारद्विजोत्तम॥ तच्चक्रतीर्थंविख्यातं
सर्वपापप्रणाशनं ॥४५॥ स्नातानांतत्रविप्रेंद्रतीर्थेचक्रस्यपुण्यदे॥ राजसूयाश्वमेधाभ्यांफलंभवतिनिश्चितं॥४६॥ योगैश्वर्यमवाप्याशुब्रह्मज्ञा
नंसविंदति॥ तदारभ्यतुतल्लिंगं पुण्ययोगेश्वरंद्विज ॥४७॥ चक्रेणखंडितत्वाच्चचक्रखंडेश्वरामिधं॥ ख्यातंबभूवलोकेषुसर्वेषुद्विजसत्तम ॥४८॥
इतिश्रीसह्याद्रिखंडे० अध्यायः॥ ॥सूतउवाच इत्युक्त्वानारदोराजन्पुनः संवर्तमब्रवीत्॥ किमिच्छसिमहाभागतद्ब्रूहि वितरामितें॥ १॥ अमो
घंदर्शनंविद्धिमदीयंब्राह्मणोत्तम॥ अशक्यंनाक्षिहिममदातुंदेवत्वमप्युत ॥२॥ संवर्तकउ०॥ सनत्कुमारोभगवान्यथासिद्धः सनातनः॥ त
थासिद्धिर्भवतुमेप्रसादात्तवसव्रत ॥३॥ वापीयंममदेवर्षेतीर्थेषुप्रवराभवेत्॥ आश्रमंचममब्रह्मन्नाम्नालिंगंचेदंद्विजोत्तम॥४॥ नारदउवा०॥
सिद्धिर्भवतुतेविप्रमत्प्रसादान्महामते॥ सनत्कुमारोभगवान्यथासिद्धिमुपागतः॥५॥ संवर्तकमहाबुद्धेतथाभवतुतेध्रुवं॥ पापंचिंतयमाभद्रं
तेत्वन्नाम्नाख्यातिमेतुवै ॥६॥ संवर्तकस्यवापीतुतीर्थेषुप्रवराभवेत्॥ सप्तजन्मकृतंपापंअल्पंवायदिवाबहु॥७॥ तत्सर्वस्नानमात्रेणनाशंया
तुन्नृणांमुने॥ सहस्रकपिलानांचगवांदानेनयत्फलं ॥८॥ तत्फलंकोटिगुणितंभवत्विहनृणांमुने॥ संवर्तकाश्रममितिआश्रमंख्यातिमे
तुच॥ ९॥ पुण्यंभवतुसर्वत्रत्रिषुलोकेषुसव्रत॥ अत्रदत्तंहुतंवापिएककोटीर्भविष्यति॥१०॥ लिंगंचतत्रविप्रेंद्रसंवर्तेश्वरसंज्ञया॥ख्या
तंभवतुत्रैलोक्ये क्षिप्रंसिद्धिप्रदंनृणां॥११॥ फाल्गुनेमासिविप्रेंद्रसिद्धस्त्वंफल्गुनीयुत॥तस्मात्सरएवदिवसस्तवतीर्थस्यसेवने॥१२॥
श्रेष्ठोभवतुविप्रेंद्रस्नानदानादिकर्मणि॥ अत्रागत्यनरोयस्तुतस्मिन्काले द्विजोत्तम॥१३॥ स्नानंवापिजलंवापिदानंवायजनंतुवा॥क १७६
रोतितत्कोटिगुणं मत्प्रसादाद्भवेद्ध्रुवं॥१४॥ सूतउ०॥ इत्युक्त्वानारदोराजन्देवलोकमगात्प्रभुः॥ संवर्तकोपिभगवान्सिद्धस्तस्मिन्द्विजोत्तम

स्वर्गलोकमगात्क्षिप्रं योगैश्वर्यसमन्वितः॥ नारदोपिगवांगत्वा समाजंत्रिदिवौकसां॥१६॥ कथामकथयत्तेषां गोकर्णाधिकृतां नृप॥ आदि
त्यासर्वतीर्थानि पुराहंराजसत्तम॥१७॥ गोकर्णमगमंपश्चात्तस्मिन्मासत्रयंस्थितः॥ तत्रस्थितेषुतीर्थेषुस्नानंकृत्वाविधानतः॥१८॥
संवर्तकंमुनिंदृष्ट्वासर्वश्चमुनिसत्तमान्॥ स्थित्वाक्षेत्रेनृपवरमाघांतेपुनरागतः॥१९॥ मासमेकंनृपश्रेष्ठगोकर्णेयोवसेन्नरः॥ तीर्थसे
वीजितक्रोधोमौनव्रतपरायणः॥२०॥ नियमेनविशेषेणतस्यपुण्यफलंशृणु॥ जन्मायुतेःकृतंपापंनश्यत्येवनसंशयः॥२१॥ परत्रचपरां
सिद्धिंसप्राप्नोतिद्विजोत्तम॥ तच्छ्रुत्वातत्रवसतिंकृतवान्मुनिभिःसह॥२२॥ तेषांकथाविचित्रार्थाःश्रुताःश्रुतिमनोहराः॥ व्यासपुत्रः शु
कस्तत्रतपस्यतिमहामनाः॥२३॥ बहवस्तत्रमुनयःकृत्वाश्रमपदंशुभं॥ तपोवनेपुण्यतमेतपःकुर्वंतिनित्यशः॥२४॥ आश्रमेषुचस
र्वेषुमुनीनांभावितात्मनां॥ एकैकरात्रंराजेंद्रतत्रतत्रास्थितंमया॥२५॥ तत्रासन्यानिलिंगानितेषांपूजाकृतामया॥ समाप्यनियमंतस्मिन्
त्रैमासिकमरिंदम॥२६॥ अभिनंद्यमुनीन्सर्वाननुज्ञाप्यचशंकरं॥ तस्मात्क्षेत्रेवसंद्राजन्नागतोहंतवांतिकं॥२७॥ भवंतंकृतसन्यासं
द्रष्टुकामःस्मरन्प्रभो॥ शौनकादीन्नृपश्रेष्ठकिमन्यच्छ्रोतुमिच्छसि॥२८॥ शौनकउ०॥ केनदृष्टस्तुदेवर्षेर्कथामकथयद्दिवि॥ गोकर्णा
धिकृतांसूतकिंतद्वदममानघ॥२९॥ भूयोपिमेमहाप्राज्ञ तत्क्षेत्रस्यमहामते॥ माहात्म्यंकथ्यतांसूतश्रोतुमिच्छाप्रवर्तते॥३०॥ तत्रास्थि
तानांतीर्थानामाश्रमाणांचकृत्स्नशः॥ देवतायतनानांचविस्तरेणवदस्वनः॥३१॥ महिमानंऋषीणांच संस्थानंभुवनस्यच॥ पूर्वमुक्त्वया
सूतअस्माकंक्षेत्रविस्तरात्॥३२॥ सृष्टराद्यमिमंक्षेत्रंतत्कथंसूतनंदन॥ यथानिःसंशयंसूतभवेन्ममतथावद॥३३॥ शौनकेनैवमुक्त
स्तुसूतःपौराणिकोत्तमः॥ कथामकथयद्दिव्यांगोकर्णाधिकृतांद्विज॥३४॥ सूतउ०॥ शृणुशौनकवक्ष्यामिनृपेणऋषिभिःसह॥ पुराब्रु
वोनिनासृष्टं गोकर्णाद्विजसत्तम॥३५॥ यत्रमाप्रकृतीराजन्रमतेपुरुषेणहि॥ क्षेत्रंतत्परमंप्रोक्तंनात्रकार्याविचारणा॥३६॥तत्रास्थि

नेशः क्षेत्रज्ञइतिवेदविदोविदुः॥ यइदंपठतेनित्यंश्रृणोतिश्रद्धयानरः॥ सर्वपापविनिर्मुक्तः शिवलोकेमहीयते॥३७॥ ॥इत्यादि० अध्यायः॥
सूतउ०॥ गोकर्णान्नारदोराजन्ययौकैलासपर्वतं॥ दृष्ट्वातत्रमहेशानंनत्वास्तुत्वाजगद्गुरुं॥१॥ स्थित्वातत्रमुहूर्तंतु शंभोराज्ञांप्रगृह्यच॥ त्रि
विष्टपंततोगंतुंप्रास्थितोभरतर्षभ॥ २॥ एतस्मिन्नंतरेसामगानंश्रुत्वातंतोमुनिः॥ दिशोविलोकयामासपरितःकुरुसत्तम॥ ३॥ नृत्यंतंदृष्ट
वान्तत्रदशास्यंनारदोऽस्फरं॥ एवलंकाधिपोराजन्दृष्ट्वाकरतलेमुदा॥४॥ वादयन्स्वकरायेस्तुगानैः सामसमुद्भवैः॥ एतादृशंकुरुश्रेष्ठ
रावणंराक्षसाधिपं॥ ५॥ शिवस्यानिकटेदृष्ट्वाज्ञात्वातस्यमनोगतं॥ विस्मयंपरमंगत्वानारदोभरतर्षभ॥ ६॥ ततःकैलासशिखराज्जगा
मत्रिदशालयं॥ सकाशंदेवराजस्यत्रैलोक्याटनतत्परः॥ ७॥ दूरादायांतमालोक्यनारदंदेवराट्तदा॥ अभ्युत्थायासनंदत्वानारदायमहात्म
ने॥ ८॥ पूजयामासदेवेंद्रो अर्घ्यपाद्यादिभिर्नृप॥ देवैः समंमुनिश्रेष्ठं मुदापरमयायुतः॥ ९॥ नारदोपिकुरुश्रेष्ठ आत्मीभिरभिनंदितं॥
उपविष्टस्ततस्तस्यांसभायांमुनिसत्तमः॥ १०॥ वासवोथमुनिंदृष्ट्वाविश्रांतंभरतर्षभ॥ तमुवाचततः शक्रः कुत आगम्यते द्विज॥ ११॥ अ
वारितागतिस्त्वंहि सर्वलोकेषुसत्तम॥ किमाश्चर्यंत्वयादृष्टं तत्सर्वंवदमेमुने॥ १२॥ सूतउ०॥ इत्युक्तोदेवराजेननारदः प्रत्युवाचह॥ गोकर्णादा
गतंविद्धिइदानींसुरसत्तम॥१३॥ अटित्वासर्वलोकांश्चभवंतंद्रष्टुमागतः॥ आगच्छतामयादृष्टःपथिरक्षोगणाधिपः॥ १४॥ कैलासशि
खरेरम्येतपश्चरतिरावणः॥ मृगशृंगंनेतुकामः शृंगंयुष्माभिरर्चितं॥ १५॥ तपसामहतादेवसामगानेननर्तनैः॥ वीणास्वनेनगिरिशं सं
तोष्यत्रिदिवेश्वर॥ १६॥ लब्ध्वाशंभोः सकाशात्तुलिंगंनेष्यतिरावणः॥ लिंगेनीतेरावणेनलंकांप्रतिसुरेश्वर॥ १७॥ नष्टैश्वर्योभविष्यं
तिविबुधाऋषिभिःसह॥ तस्माच्चलंकुरुष्वाद्यविघ्नार्थंरावणस्यहि॥ १८॥ यथानदीयतेशंभुर्लिंगंयत्नेतथाकुरु॥ इत्युक्तानारदस्तस्मा
द्ब्रह्मलोकंमगान्मुनिः॥ १९॥ गतेतुनारदेशक्रोबृहस्पतिमुवाचह॥ मृगशृंगमितिख्यातंकिंतद्बृहस्पते॥ २०॥ कथंनुलिंगमभव

पिसर्वेचद्विजसत्तम ॥ पूर्णआसीद्दिवलोकः प्राणिभिर्लोकवासिभिः ॥ २० ॥ नावकाशमभूद्विप्रदेवानांभवनेतदा ॥ ततोदेवाः समागम्यसर्वएवद्विजोत्तम ॥ २१ ॥ ऊचुर्ब्रह्माणमागत्यऋषिभिः सहदेवताः ॥ भगवन्प्राणिनः सर्वेदिवमायांत्यवारिताः ॥ २२ ॥ अधर्मज्ञाश्चपापिष्ठादिवंगत्वानिरामयाः ॥ अस्मानुच्चाटयंत्यस्माद्वह्मन्कुत्वात्मरसत्तम ॥ २३ ॥ अधर्मस्तैर्बलोद्विप्रैः संपूर्णंभवनंहिनः ॥ नविघ्नकारणंदेवविपरीतंप्रवर्तते ॥ २४ ॥ इत्युक्तस्तैर्हिरण्यगर्भस्तानाहद्विजसत्तम ॥ लिंगंयोगेश्वरंनाम गोकर्णेस्थापितंसुरैः ॥ २५ ॥ मत्पुत्रेणमहाभागास्तपसामहता बलात् ॥ तस्मिन्लिंगेशिवः साक्षात्प्रतिष्ठाप्रिययासदा ॥ २६ ॥ स्पर्शसिद्धिकरंनृणांतल्लिंगंसुरसत्तमाः ॥ स्पृष्ट्वायांतीहभूतानि सर्वाणिविबुधेश्वराः ॥ २७ ॥ तस्माद्व्रजतदेवेशंविष्णुंत्रिभुवनेश्वरं ॥ प्रसादयध्वंविबुधाः सवः कार्यंकरिष्यति ॥ २८ ॥ तच्छ्रुत्वासहितास्तेनविष्णुंजग्मुर्दिवौकसः ॥ क्षीराब्धेरुत्तरंतीरं ऋषिसंघैः समावृतं ॥ २९ ॥ तत्राराध्यजगन्नाथंतपसामहतासुराः ॥ प्रत्यक्षीकृत्यविष्णुंतेदृदंवचनमब्रुवन् ॥ ३० ॥ त्राह्यस्मान्देवदेवेशशंखचक्रगदाधर ॥ येभूताभूतलगताजंगमाधरणीधर ॥ ३१ ॥ स्थावराश्चजगन्नाथ दिवमायांत्यवारिताः ॥ अहन्यहन्देवदेवस्पृष्ट्वायोगेश्वरंशिवं ॥ ३२ ॥ सर्वस्वमयंलिंगं गोकर्णेतीर्थसत्तमे ॥ सनत्कुमारेणविभोस्थापितंकमलापते ॥ ३३ ॥ संस्पृष्ट्वाप्राणिनः सर्वेसशरीरादिवंगताः ॥ तैर्वयंभगवन्त्सर्वेबाधिताःस्मजगत्पते ॥ ३४ ॥ अमार्गगैर्दुराचारैर्हतानस्मान्समुद्धर ॥ ततस्तानाहभगवान्चक्रपाणिः सुरोत्तमः ॥ ३५ ॥ गच्छध्वंसहितादेवायथास्थानंयथासुखं ॥ छेदयिष्येयोगेश्वरंलिंगंचक्रेणसुरसत्तमाः ॥ ३६ ॥ इत्युक्तास्तान्जगन्नाथश्चक्रंसंतोद्यपाणिना ॥ मुमोचलिंगमुद्दिश्यदेवदेवःसुदर्शनं ॥ ३७ ॥ सर्वायुधमहामात्रं विष्णोश्चक्रंसुदर्शनं ॥ द्वादशादित्यसदृशंजज्वलंस्वेनतेजसा ॥ ३८ ॥ गोकर्णप्रतिगर्छंतं दृष्ट्वाजर्हर्षिरेसुराः ॥ समागत्यद्विधाचक्रे विष्णुचक्रंसुदर्शनं ॥ ३९ ॥ अधोभागस्थितंभूमौचक्रोपरि तथापरं ॥ मग्नमासीद्विजश्रेष्ठभारेणमहतातदा ॥ ४० ॥ तद्भारपीडितंचक्रं ममज्जतुरसातले ॥ ततोदेवाःसगंधर्वाऋषयश्चतपोधनाः ॥ ४१ ॥ विष्णुनासहिताः सर्वेगोकर्णंसमुपागमन् ॥ रुद्र

तपसाऽनंकरं तोष्यमविष्यध्वं निरामयाः॥ ददातिरुद्रः संतुष्टो युष्मत्सत्वंच नान्यथा॥ ४२॥ इतितद्वचनंश्रुत्वा देवाविष्णुसमन्विताः॥ कैलासमगमन्सर्वे द्रष्टुं देवं महेश्वरं॥ गत्वातेतपसारुद्रंभक्त्याचाराधयन्क्षराः॥ ह्येतेषांतुष्टोमहादेवो भक्त्याचनियमेनच॥ ४४॥ प्रत्यक्षत्वमगात्क्षंभुर्देवान्प्राहशचीपते॥ तुष्टोस्मितपसात्यंतंयुष्माकंदेवतागणाः॥ ४५॥ यथाचित्तेभिलषितंवरंब्रूतंतथापरं॥ देवाऊचुः॥ सत्वहीनावयंशंभोत्यक्तास्मत्सत्वंचदेहिनः॥ ४६॥ तल्लुत्वावचनंशंभुस्तेषांसत्वंमहात्तदा॥ ४६॥ यत्रुतंसत्वरूपंतुतंमृगंचददौशिवः॥ गृहीत्वाचात्मनोभागंसर्वेतेभ्यःप्रदत्तवान्॥ ४७॥ हिमाद्रौनिर्मितःपूर्वं सर्वसत्वमयोमृगः॥ अत्यद्भुतोमहेशेन कुपितेनक्षरेश्वर॥ ४९॥ मृगःसकांचनोदिव्यो वज्रस्फटिकमौक्तिकैः॥ समन्वितोदेवराज सर्वलक्षणलक्षितः॥ ४९॥ चतुष्पादस्त्रिनेत्रश्चत्रिशृंगश्चारुदर्शनः॥ तस्यैकशृंगेभगवान्ब्रह्मालोकपितामहः॥ ५०॥ वामंचवैष्णवंप्राहुर्मध्यमंशैवमुच्यते॥ एतादृशंसत्वभूतंमृगंप्राप्यमहेश्वरात्॥ ५१॥ देवाक्षरनराः सर्वे मुदिताश्चाभवन्तदा॥ खंडयित्वामृगंसर्वैर्गृहीतंसत्वमात्मनां॥ ५२॥ स्वशृंगंब्रह्मणातातगृहीतंविष्णुनास्वकं॥ रुद्रेणचस्वशृंगंतु पूजांचक्रुःक्षरेश्वराः॥ ५३॥ तस्यमांसंहुतमभूद्यदाविद्याधरैःप्रभो॥ मेदस्तस्यगृहीतश्च अप्सरोभिःक्षरेश्वर॥ ५५॥ कैलासेपूजयन्नास्ते स्वशृंगंपरमेश्वरः॥ यस्ययस्ययदृष्टंस्यात्तत्तत्प्राप्नोतिपूजकः॥ ५५॥ चर्मनागैर्गृहीतंच रक्षोभिश्चास्थिसंचयं॥ राक्षसैश्चतथारक्तंभूम्याश्चुक्रुसमाहृतं॥ ५६॥ यक्षैःपित्तंकफंदेवैर्वातंयैर्यातुधानकैः॥ पित्ताच्चैश्चहृतंमूत्रंपुरीषंपक्षभिर्हृतं॥ ५७॥ रोमाणिऋषयोगृह्यन्मज्जामर्त्यैर्हृतात्यभूत्॥ एवंसर्वाणिचांगानि गृहीतानि क्षरादिभिः॥ ५८॥ उत्तमाधममध्यानि उत्तमाधममध्यमैः॥ एवंचांगानिचादायसत्ववंतोबभूविरे॥ ५९॥ सूतउ०॥ पुराविवादोत्यभवत्त्रैलोक्यार्थेक्षरासुरैः॥ देवान्दैत्याःपराजित्ययुद्धेतिबलिनःप्रभो॥ ६०॥ अपहृत्यक्षरैश्वर्यं बुभुजुर्विषयान्प्रियान्॥ तदादेवैःशिवंप्रार्थ्यलब्ध्वालिंगंमहेश्वरात्॥ ६१॥ आराध्यचाक्षरान्निता त्यैश्वर्यंचपुनःक्षराः॥ अवापुःपूजनात्तस्यलिंगंतस्मैपुनर्ददुः॥ तस्मात्तदेवलिंगंतु देवैःसंपूजितंपुरा॥ य

स्मिन्वसति तल्लिंगं तस्मिन्वैविजयो ध्रुवं ॥ एवंभूतंतु तल्लिंगं यत्प्रष्टं कथितंतुवां ॥ ६३॥ ॥ इत्यादि० गोकर्णमाहात्म्ये० अध्यायः॥ ॥ सूत
वाच ॥ तस्यतद्वचनंश्रुत्वादेवराजसहस्यती ॥ शिरसाकश्यपंनत्वा जग्मतुस्तौ मुदान्वितौ ॥ १॥ मेरुपृष्ठेसुरश्रेष्ठैः सुरानासापयत्तदा ॥ इंद्रउ
देवाःशृणुतमद्वाक्यं कैलासंगच्छताधुना ॥ मृगभृंगंनेतुकामोलंकेशस्तत्रतप्स्यति ॥ २॥ तद्विघ्नंकुरुतक्षिप्रंतच्छ्रुत्वात्रिदिवौकसः॥ सगणाः
सबलाराजन्जग्मुःकैलासमंजसा ॥ ३॥ इंद्रेणसहराजेंद्रनापश्यन्तत्रराघवं॥ एतस्मिन्नंतरेपूर्वंरावणोराक्षसाधिपः॥ ४॥ महतासामगानेन
तेनविविधेनच ॥ तपसानियमेनैव घोरेणभरतर्षभ ॥ ५॥ तोषयित्वामहेशानंस्तुत्वातंविविधैःस्तवैः ॥ इदमाहदशग्रीवोभक्तिनम्रात्मकंध
॥६॥ देहिप्राणसमंलिंगंमृगभृंगमयंशिव ॥ तच्छ्रुत्वासमहादेवश्चिंतयित्वानृपोत्तम॥ ७॥ मृगभृंगमयंलिंगंसमादायमहेश्वरः॥ सद्योजातादि
मंत्रेणपूजयामासभक्तितः॥ ८॥ ददौदशाननंकरेभविष्यत्कार्यगौरवात् ॥ दशाननमुवाचेदंप्रीत्यापरमयाशिवः॥ ९॥ दशाननमिबो
दृंगंतव्यंपादचारतः॥ लिंगंधृत्वापुरींलंकांनमिधेयंचविश्वजित् ॥ १०॥ यत्रैतत्क्षिपसेलिंगंतत्रैवासंनसंशयः॥ इत्युक्त्वांतर्दधेभूभु
वःस्योप्यायययौततः॥ कैलासादतिवेगेनपादचारेणरावणः॥ दक्षिणांदिशमुद्दिश्यसप्तकोटीश्वरंययौ ॥ १२॥ तत्रदृष्ट्वामहालिंगंर
भकोटीश्वरंनृप॥ माध्याह्निकंकर्मकुर्वन्तत्रैवासतदानृप ॥ १३॥ सूतउ०॥ ततोदेवगणाः सर्वेकैलासेरावणंनृप ॥ मृगयित्वानदृ
तेत्रांभोरंतिकमागमन्॥ अपृच्छन्देवताःशंभुं प्रहसन्तीरावणस्यतु ॥ तानुवाचमहादेवोरावणोराक्षसाधिपः॥ १५॥ लिंगंगृहीत्वात्रिदश
दक्षिणाशिमुखोययौ ॥ पादचारेणवैयाति गृहीत्वालिंगमुत्तमं॥ १६॥ तद्यतध्वंसुरश्रेष्ठायथास्यास्यातिभूतले ॥ तल्लिंगरत्नंदुष्टात्म
मावित्रंबतदेवताः॥ १७॥ इतिश्रुत्वाततोदेवानमस्कृत्वामहेश्वरं ॥ कैलासान्निर्ययुर्वेगान्मार्गयंतोदशाननं ॥ १८॥ नदृष्ट्वारावणंका
म्लानमुखपंकजाः॥ दुःखेनमहतायुक्ताः सागरंप्रतिपेदिरे ॥ १९॥ पश्चिमस्योदधेस्तीरेविविष्णुस्तत्रदेवताः॥ तदुपायंविचिन्वंत

दर्शनेरावणस्यहि ॥२०॥ एतस्मिन्नंतरेकालेनारदस्तत्रचागतः॥ दृष्वामुनिर्देवगणान्यप्रच्छेदंतदानृप ॥ २१ ॥ पुरुहूत किमर्थंत्वंस्थित
वानत्रदुःखितः॥सर्वैर्देवगणैः सार्धंतवचिंतांवदाधुना॥ २२ ॥ इंद्रउ०॥ श्रूयतांमुनिशार्दूलममचिंतांवदामिते ॥ दशाननोलिंगरत्नंतपसातो
ष्यशंकरं॥२३॥ लब्ध्वाशंभोः सकाशात्तुलंकांप्रतिगतोऽधुना ॥ तंमार्गयंतः कैलासाद्वयं सर्वेसमागताः॥ २४॥ सर्वान्देवानतिक्रम्यनदृष्वाका
पिरावणं॥ दुःखेनमहतायुक्तावयंचात्रसमागताः॥ २५ ॥ तस्यप्रवृत्तिंजानासिकथ्यतांयदिनोद्विज ॥ सूतउ०॥ तच्छ्रुत्वानारदोवाक्यं इंद्रस्य
भरतर्षभ॥ पुरंदरंपुनः प्राहवाक्यंविनयपूर्वकं॥ २६॥ नारदउ०॥ रावणस्यवदाम्यद्यप्रवृत्तिंशृणुवासव॥ त्यजचिंतांमहाबाहोदृष्टोलंका
धिपोमया॥ २७॥ सप्तकोटीश्वरंनामलिंगंवैदक्षिणापथे॥ आस्तेतमर्चयन्भक्त्यातत्रायंदशकंधरः॥ २८ ॥ मध्याह्नसमयेदृष्टोमयातत्र
रुरेश्वर॥ उपायंतस्यवक्ष्यामिशृणुविघ्नार्थमप्युत॥ २९॥ लिंगप्रदानसमयेरावणंचेदमुक्तवान्॥ ननिधेयंत्वयालिंगंभूमौपथिकसंचन
॥३०॥ यत्रेमंक्षिपसेलिंगंतत्रैवास्तेनसंशयः॥ इतिश्रुतंमयापूर्वंतद्यतस्वसुरेश्वर ॥ ३१॥ यथाविनिक्षिपेद्भूमौ मृगशृंगंदशाननः॥ तथा
कुरुष्वदेवेंद्र ततोदुःखाद्विमोक्ष्यसे ॥३२॥ नारदस्यवचःश्रुत्वासर्वेदेवाःसवासवाः॥ हर्षेणमहतायुक्ताःसंभाष्यचपरस्परं॥ ३३॥ ब्रह्म
विष्ण्वादयःसर्वेसप्तकोटीश्वरंययुः॥ तत्रदृष्ट्वादशग्रीवं हृष्टात्मासन्दिवौकसः॥ ३४॥ रावणोपिसुरान्दृष्ट्वाजगर्जजलदोयथा ॥ ता
न्तृणीकृत्यलंकेशोगोकर्णाभिमुखोययौ॥ ३५॥ तमन्वयुर्देवगणाब्रह्मविष्णुशिवादिवौकसः॥ चिंतयंतोत्युपायंतेलिंगस्यस्थापने
भुवि ॥ ३६॥ गोकर्णेराजशार्दूलगोकर्णेपर्वतेविशन्॥ ततोविष्णुःस्वमनसिध्यात्वातत्स्थापनेभुवि॥ उपायंभरतश्रेष्ठज्ञातवान १७९
चिराद्धरिः॥३७॥तस्यव्रतमिदंचास्तित्रैलोक्येविश्रुतंमहत्॥ संध्यामुपास्तेतत्काले नातिक्रमतिशत्रुहा॥ ३९॥ इत्येवंचिंतयित्वासो

देवैः संपूजितंकुतः॥ तमाहांगिरसोराजन्नजानेतस्यसंभवं॥ २१॥ काश्यपोवेत्तितत्सर्वंपितातवसुरेश्वर॥ तत्रगत्वावभद्रंतेसचसर्वंवदिष्यति
॥२२॥ इत्युक्तोगुरुणाशक्रोजगामपितरंतदा॥ काश्यपंमुनिशार्दूलंगुरुणासहभारत॥ २३॥ पितरंसर्वलोकानांननामेदमुवाचतं॥ मृगश्रं
गस्यमेतातसंभवंवक्तुमर्हसि॥ माहात्म्यंतस्यकथयलिंगस्यमुनिसत्तम॥ २४॥ कश्यपउवाच॥ शृणुपुत्रपरंगुह्यंमृगशृंगस्यसंभवं
॥पातालस्थःपुरारुद्रस्तपस्तीव्रमतप्यत॥ २५॥ स्रष्टुकामःप्रजाःशक्रसात्विकेनपिनाकधृक्॥ तस्मिन्तप्यावर्तमानेसृष्टलोकाःस्वयंभु
वा॥ २६॥ त्रिभिर्गुणैःसुरश्रेष्ठप्रजाःसर्वाश्चतुर्विधाः॥ ततश्चुकोपभगवान्तेषांदृष्वासमुद्भवं॥ २७॥ सत्वमादायसर्वेषांभूतानांभुवनाधिपः॥
पिंडीकृत्वातुतत्सत्वंदेवदेवोमहेश्वरः॥ २८॥ अणुमात्रेषुभूतेषुयत्सत्वंपरिवर्तते॥ तदादायसुरश्रेष्ठोनिर्ममेमृगमुत्तमं॥ २९॥ तंन्नजानं
तिदेवेंद्रब्रह्माद्यादेवतागणाः॥ ऋतेनारायणाद्देवात्सर्वभूताज्जनार्दनात्॥ ३०॥ तन्मृगेणजगत्स्वामीसहकैलासमास्थितः॥ ततःप्रजाःप्र
जापालोसर्वेसत्वविवर्जिताः॥ ३१॥समाद्यासन्सुरश्रेष्ठनोत्तमाधममध्यमाः॥ तत्कारणमविज्ञाय ऋषयोदेवतागणाः॥ ३२॥ गत्वासर्वे
ब्रह्मलोकंतत्रदृष्वाप्रजापतिं॥ नत्वास्तुत्वाजगन्नाथंसवृत्तांतमथाब्रुवन्॥ ३३॥ तच्छ्रुत्वावचनंतेषांब्रह्मालोकपितामहः॥ सर्वेशृणुत
मद्वाक्यंसत्वहीनोस्म्यहंसुराः॥ ३४॥नारायणोजगद्योनिःपरात्परतरोव्ययः॥ सवेत्तिसर्ववृत्तांतंतस्माद्यास्यामतंसुराः॥ ३५॥ इत्यु
क्त्वाजगतांनाथःसर्वैर्देवर्षिभिःसह॥ क्षीरोदशय्याशयनंशंखचक्रगदाधरं॥ ३६॥ गत्वाप्रणेमुःसहिताब्रह्माद्याश्चसुरासुराः॥
प्रणम्यश्रीधरंभक्त्याइदमूचुस्तदाहरिं॥ ३७॥ हरेवयंसत्वहीनाःसर्वेस्थावरजंगमाः॥ नविघ्नकारणंचात्रयथापूर्वंकुरुष्वनः॥ ३८॥
लोकेपूज्याभविष्यामःसत्वाद्यास्तद्दनुग्रहात्॥ सतेषांवचनंश्रुत्वाजातकारुण्यमब्रवीत्॥ ३९॥ विष्णुरु०॥ सत्वंहृतंवोरुद्रेणकुपितेना
दृश्यकसः॥ सत्वेनभगवान्रुद्रोमृगादित्यंविनिर्ममे॥ ४०॥ समृगेणमहादेवःकैलासेवर्ततेधुना॥ तंगत्वाविबुधश्रेष्ठागृह्णीध्वंसत्वमात्म

इत्युक्तोगणनाथेन तथेतिदशकंधरः॥ ५८॥ दत्वातस्यकरे लिंगं संध्योपासनमारभत्॥ कृत्वाजजापगायत्रींपापस्थाल्यांकुरूद्वह॥ ५९॥ अपध्या
नविधानेन विष्ण्वाद्यादेवतागणाः॥ स्थितेतस्मिन्नि शाचरे॥ ततस्मिन्नंतरे कालेविष्ण्वाद्यादेवतागणाः॥ ६०॥ परस्परमथामंत्र्यविलंबंन भवेदिति
॥भारंसमस्तलोकस्यनिक्षिपुर्लिंगमूर्धनि॥६१॥ धृत्वाराजनगणाध्यक्षोहस्तेलिंगं समाददत्॥ दशाननंत्रिवारंतु शीघ्रमागम्यतामिति॥ ६२॥
महद्भारमभूल्लिंगंनवोढास्मिकथंचन॥ इत्युक्त्वाभूतलेलिंगंस्थापयामास विघ्नराट्॥ ६३॥ सूतउ०॥ वैवस्वतेंतरेराजन्त्रयोविंशतिमेशुभे॥ त्रेता
युगेत्वीश्वरादैशरत्कालेनृपोत्तम॥ ६४॥ ऊर्जेशुक्लप्रतिपदि व्यतीपातेरवेर्दिने॥ तुलामासेमीनलग्नेविशाखायां प्रतिष्ठितं॥ ६५॥ ततोहरिःस्वकंच
क्रमुपसंहृतवान्रवेः॥ ततोदेवगणाः सर्वे हर्षेणमहतायुताः॥ ६६॥ लिंगस्योपरिराजेंद्र पुष्पवृष्टिंववर्षिरे॥ वीणावेणुमृदंगांश्चवादयंतः सुरोत्तमाः
॥६७॥ गिरोतास्रतलेतस्मिन्ननृतुर्गीतनिःस्वनैः॥ शंभोर्लिंगस्थापनंयेपठंतिश्रृण्वंतिचानन्यधियोमनुष्याः॥ चिंतेहभोगाननुभूयचेप्सितान्
प्रयांतिचांतेपदमीश्वरस्य॥६९॥ ॥इत्यादि० शोकर्णमाहा० अध्यायः॥ ॥ ज्ञातानीकउ०॥ ततःकिमकरोद्ब्रह्मन्रावणोराक्षसेश्वरः
॥लिंगेप्रतिष्ठितेभूम्यांगजास्येनशिवात्मके॥ १॥ तन्मेविस्तरतोब्रूहिसूतपौराणिकोत्तम॥ सूतउ०॥ यदाहरिःस्वयंचक्रमुपसंहृतवान्रवेः॥
तदादद्दर्शचाकाशेभास्करंदीप्ततेजसं॥ २॥ भूम्यांप्रतिष्ठितंलिंगंगजास्येनददर्शच॥ कोपेनमहताविष्णोर्लज्जयाचद्दशाननः॥ ३॥ ज्ञा
त्वात्मवंचनं राजन्मन्वानोदैवतैःकृतं॥ प्रतिकर्तास्मितेषांवैइतिमत्वापराक्रमी॥ ४॥ दत्वार्घ्यंजपकर्मादिसमाप्यनियमंनृप॥ पितस्थाल्यां
दशग्रीवस्ततोलिंगांतिकंययौ॥ ५॥ गत्वाप्रतिष्ठितंलिंगंदृष्ट्वाराजन्निशाचराः॥ लिंगंबलाद्विशिष्येइतिमत्वातदासुरः॥ ६॥ दोर्भ्यांलिं
गंप्रगृह्याशुजानुभ्यामवनिंगतः॥ चकर्षसर्वबलतोरावणोराक्षसाधिपः॥ ७॥ तदाचचालपृथिवी सशैलवनकानना॥ यदाप्रतिष्ठितंभू

दृज्ञास्येनभुविनृप ॥८॥ तद्देवतलिंगरत्नंसप्तपातालमाक्रमत् ॥ कूर्मपृष्ठावधिगतंततोराक्षसपुंगवः ॥९॥ नशशाकोद्धर्तुमेनंजानुभ्यामपि
तत्भुवि ॥ वमन्रुधिरमत्यंतंत्रिदशादृश्यतं ॥ १०॥ पतितं मूर्ध्नितंदृष्ट्वाजहसूक्रषिभिःसह ॥ ततःशब्दः कलकलस्तत्रात्यंतमभून्नृप ११
ततोववर्षपर्जन्यः पुष्पवृष्टिं गिरोतदा ॥ तत्र देवैश्चऋषिभिः स्थापितंलिंगमुत्तमं ॥ १२॥ कलंकलेश्वरं नामसर्वलोकेषुविश्रुतं ॥ देवर्षिभिःपू
जितंतत्पुण्यंसाक्षाच्छिवात्मकं ॥ १३॥ तस्यदर्शनमात्रेणनृणांभरतसत्तम ॥ ब्रह्महत्यादिपापानिनाशमायांतितत्क्षणात् ॥१४॥ तस्यलिं
गस्यसविधेउदीच्यांदिशिसंस्थितः ॥ वैवाहिकोनामगिरिः सर्वसिध्दनिषेवितः ॥ १५॥ तस्यदर्शनमात्रेणात्रिवर्गलभतेनरः ॥ तत्रगत्वानरो
राजन्दक्षिणाशांविलोकयन् ॥ १६॥ प्रदक्षिणीकृत्यचतंत्रिवारंयत्नभारत ॥ स्थित्वातस्यतलेलिंगंप्रणम्यप्रयतेंद्रियः ॥ १७॥ अष्टा
क्षरंजपन्मंत्रं ऋषिछंदंसदेवतं ॥ उच्चैःशब्दंप्रकुर्वीतहरिरित्यथवाहरः ॥ १८॥ तच्छ्रुत्वाकाशगंगावैदेवीत्रिपथगामिनी ॥ अभिषिंचति
राजेंद्रसाद्यापिकुरुनंदन ॥ १९॥ कृतत्रेताद्वापरेषुविपरीतंकलौयुगे ॥ एवंकरोतिचेद्राजन्नमृतत्वंसगछति ॥ २०॥ सूतउ०॥ लब्धसंज्ञो
मुहूर्ताद्वैरावणोलोककंटकः ॥ दृष्ट्वानंदीवोकसोदृष्ट्वालज्जयोत्थायवेगवान् ॥ २१॥ गणेशानिकटंगत्वाकोपेनमहतायुतः ॥ मुष्टिंबध्वा
दृढंसोथताडयामासमस्तके ॥ २२॥ एवंसंताडितोमूर्ध्निरावणेनगजाननः ॥ अग्नेय्यांदिशिलिंगस्यदृष्ठतस्थितवान्नृप ॥ २३॥ पश्चिमा
भिमुखोभूत्वाचत्वारिंशत्यदेनृप ॥ बटुरूपीगणाध्यक्षः सर्वसिद्धिप्रदायकः ॥ २४॥ रावणोपिकुरुश्रेष्ठताडयित्वागजाननं ॥ कोपेनमहता
विष्टोलज्जयाचासुरेश्वरः ॥ २५॥ किंचिन्नम्राननोभूत्वागोकर्णान्निर्ययौनृप ॥ लंकामुद्दिश्यतद्दृष्टोशतशृंगस्यमूर्धनि ॥ २६॥ गुहांप्र
विश्यसतदाप्रविश्यलवणांबुधिं ॥ विवेशस्वपुरींलंकांवंचितोदेवतागणैः ॥ २७॥ गत्वास्वभवनंराजन्यथापूर्वमतिष्ठत ॥ शतानीकउ०

रावणेतुगतेब्रह्मन्लंकांभग्नमनोरथे ॥ किमकुर्वंस्तदादेवास्तन्मेविस्तरतोवद ॥२८॥ सूतउ०॥ शृणुवक्ष्यामिवृत्तांतंरावणेतुगतेसति ॥
लिंगस्यसंनिधिंजग्मुः सर्वेदेवाःसवासवाः॥२९॥उपविश्यश्चपरितोलिंगंसर्वेदिदृक्षवः॥ विश्वकर्माणमाहूयदेवेंद्रोथादिवस्पतिः॥३०
गंडकींप्रेषयामासपीठमानेतुमुत्तमं॥सगत्वातत्रमुदितःश्लक्ष्णंपीठमनुत्तमं॥३१॥समानीयतदालिंगेयाजयामासतत्त्ववित्॥देवदुंदुभयो
नेदुर्गंधर्वाललितंजगुः॥३२॥उर्वश्याद्यप्सरःसंघाननृतुस्तत्रभारत॥ततोब्रह्मादयोदेवाभविष्यत्कार्यगौरवं॥३३॥अन्योन्यालोक्यमनसि
हर्षेणमहतायुताः॥नभस्तंसमाहूयलिंगवृत्तांतमादितः॥३४॥वक्तुंसंप्रेषयामासुःकैलासंप्रतिचेश्वरं॥ततोवायुर्देववाक्यादुत्वाचेश्व
रसंनिधिं॥३५॥कथयामासतत्सर्वंलिंगवृत्तांतमादितः॥ ततःशिवेनचाज्ञातोगोकर्णंप्रययौक्षणात्॥३६॥ततोमहेश्वरःप्रीतःपार्वत्या
प्रमथैर्युतः॥वृषारूढोययौक्षिप्रंगोकर्णंपार्थिवोत्तम॥३७॥शाल्मलिनींसमासाद्यपार्वतीमिदमब्रवीत्॥इयंशाल्मलिनीदेवीसर्वपाप
हराशुभा॥३८॥आद्यगंगापुण्यनदीस्नातानांभुक्तिमुक्तिदा॥नदानांसरितांचैवत्र्याद्यासेयंप्रकीर्तिता॥३९॥सीम्नःसोवर्ततेयम
स्मात्प्रथमांसरितंविदुः॥आश्वयुज्यसितेपक्षेत्वष्टम्यामरुणोदये॥४०॥आविर्भवतिशाल्मल्यांगंगापूर्णकलान्विता॥तस्मिन्काले ऽ
त्रयःस्नातितस्यपुण्यफलंप्रिये॥४१॥अशक्यंहिमयावक्तुंब्रह्मणापिनशक्यते॥गोकर्णक्षेत्रसीमेयंकौबेर्यादिशिपार्वति॥४२
इत्युक्त्वागिरिजादेवीतीर्त्वाशाल्मलिनींतदा॥लिंगस्यसंनिधिंगत्वादृष्ट्वातत्रसुरान्विभुः॥४३॥वृषभादवरुह्याशुतदागिरिजया
समं॥प्रमुखैःसहराजेंद्रलिंगरत्नंददर्शह॥४४॥भूम्योंप्रतिष्ठितंतत्ररुद्रयोन्यांबिदूरतः॥ननामंदंडवद्भूमौपार्वत्यासहपार्षदैः॥
४५ स्तुत्वालिंगंमहासत्वंशंकरोभरतर्षभ॥नमस्तेराजलिंगायलिंगरत्नायतेनमः॥४६॥नमस्तेराजभुजगगर्वसर्वस्वहारिणे॥

भास्करंदीप्ततेजसं ॥ प्राच्छादयदमेयात्माचक्रेणगरुडध्वजः ॥ ३९ ॥ ततोगजास्यमाहूयवचनंचेदमब्रवीत् ॥ गजानन महाबाहोवचनान्ममसंप्रति ॥४०॥ बटुरूपधरस्त्वंहियाहिरावणसंनिधिं ॥ रावणोराक्षसवरोमृगशृंगमयंशिवं ॥ ४१ ॥ गत्वासंध्याक्रियांकर्तुंपितृस्थालींसमेष्यति ॥ यदियास्यसिचेत्त्वंवैअधुनारावणांतिकं ॥ ४२ ॥ सदास्यतिमहालिंगंत्वत्करेगणनायक ॥ लिंगंतस्माद्गृहीत्वात्वंतंब्रूहिवचनंत्विदं ॥४३॥ दत्तानन महाबाहोत्वल्लिंगंचवदाम्यहं ॥ मय्यास्तिशक्तिर्यावच्चतावत्कालंनसंशयः ॥४४॥ नोचेल्लिंगंक्षिपाम्येवत्रिः समाहूयवैभुवि ॥ कर्तुंनार्हसिकोपंत्वंमय्येवंब्रूहिविघ्नराट् ॥ ४५ ॥ तथेतिदत्वालिंगंतुत्वत्करेगणनायक ॥ संध्यार्घ्यंनियमंकर्तुंततोयास्यतिरावणः ॥ ४६ ॥ तदात्वंत्रिः समाहूयरावणंगणनायक ॥ मृगशृंगंस्थापयस्वतत्रश्लेष्मातकेवने ॥ ४७ ॥ ततस्त्वंकीर्तिमतुलांभवाप्स्यसिनसंशयः ॥ इत्युक्त्वागणनाथंतुसांत्वयित्वाजनार्दनः ॥ ४८ ॥ प्रेषयामासराजेंद्रविघ्नार्थंरावणस्यहि ॥ गजास्योपिबटोरूपंधृत्वा प्रायाद्धरेर्गिरा ॥ रावणस्यांतिकेराजन्नरूपेणतत्रचचारह ॥ रावणोपि पितृस्थालींगत्वातत्रददर्शह ॥ ५० ॥ भास्करंकुरुशार्दूलपुष्करेहृतरश्मिकं ॥ अस्तंगतोर्कइत्येवंमन्यमानोनिशाचरः ॥ ५१ ॥ कथंसंध्यामुपासिष्येधृत्वालिंगंकरेधुना ॥ इत्येवंचिंतयानस्तदिशोदशविलोकयन् ॥ ५२ ॥ ततोपश्यद्गणाध्यक्षंबटुरूपधरंनृप ॥ तंदृष्ट्वारावणोमोहाद्गजाननमुवाचह ॥ ५३ ॥ रावणउ० ॥ मुनिपुत्रनमस्तेस्तुश्रृणुष्ववचनंमम ॥ लिंगमेतद्धिकैलासादानीतंरावणोस्म्यहं ॥ ५४ ॥ गृहाणत्वंमत्प्रसादाद्गोक्षितंतलभसेफलं ॥ यावत्संध्यार्घ्यंनियमंकृत्वायास्यामितंतिकं ॥ ५५ ॥ तावद्गृहाणमल्लिंगमादास्येहंपुनर्बटो ॥ इत्युक्तोगणनाथस्तु रावणेनतमब्रवीत् ॥ ५६ ॥ विनायकउवाच ॥ ॥ वोढुंममास्तिचेच्छक्तिः करिष्येवचनंतव ॥ अशक्तंचेत्क्षिपाम्येनं भूमौ माक्रुधरावण ॥ ५७ ॥ त्रिः समाहूयवचसा लिंगमेतन्नसंशयः ॥

आत्तयाममवैसुराः॥ ६६॥ तस्मिन्काले नरोयस्तु अत्रागत्यसमाहितः॥ प्रातःस्नात्वाकोटितीर्थेलिंगरत्नंसपूजयेत्॥ ६७॥ ददातिकिं
चित्सनरःकर्मबंधाद्विमुच्यते॥ यद्दत्तंयद्धुतंजप्तंकृतंकर्मसुरोत्तमाः॥ ६८॥ तदनंतफलंचास्तु नराणांमत्प्रसादतः॥ तस्माद्गोकर्णयात्रा
यांविषुयुक्कार्तिकोवरः॥ ६९॥ माघेवाप्यासितेपक्षेयाभवेच्चचतुर्दशी॥ तस्यांनिशीथसमये लिंगरत्नंमहाबलं॥ ७०॥ एकेनाबिल्व
पत्रेण अणुमात्रजलेनवा॥ द्रोणपुष्पेणगंधेनयःपूजतिनरोत्तमः॥ ७१॥ तस्यपुण्यफलंवक्तुं ब्रह्मणापिनशक्यते॥ गोकर्णबिल्व
पत्रंच लिंगरत्नंमहाबलं॥ ७२॥ शिवरात्रिस्तथादेवादुर्लभंहिचतुष्टयं॥ तस्मिन्काले चयद्दत्तमेककोटिर्भविष्यति॥ ७३॥ इदंममप्रि
यंक्षेत्रंसर्वेषांहृद्यमेवहि॥ अत्रागत्यनरोयस्तु लिंगस्थापनमाचरेत्॥ ७४॥ वापीकूपतटाकंच प्रपांवाप्यक्षि भावतः॥ तेषांमध्ये
ववासःस्यान्नात्रकार्याविचारणा॥ ७५॥ यथाकैलासशिखरेयथामंदरमूर्धनि॥ तथात्रनिश्चितंवासंकरोम्येवनसंशयः॥ ७६
सूत उ॰॥ इत्युक्त्वाभगवान्देवःपार्वत्याप्रमथैःसह॥ ययौकैलासशिखरंसर्वदेवसमन्वितः॥ ७७॥ ततोदेवासुरगणागंधर्वाःसिद्ध
चारणाः॥ महाबलमितिप्राहुर्लिंगंत्रिभुवनेश्वरं॥ ७८॥ तदाप्रभृतिगोकर्णेवासंचक्रुर्दिवौकसः॥ रुद्रेणमनसाध्यातः शतशृं
गागमोनृप॥ स्वक्षेत्रंतद्दृढीकर्तुतत्तथैवत्यभूत्प्रभो॥ ८०॥ ॥इत्यादि॰ गोकर्णमाहा॰ अध्यायः॥ ॥ सूत उ॰॥ विष्णु
नास्वस्यशृंगंतुसालग्रामेप्रतिष्ठितं॥ ब्रह्मणास्वस्यशृंगंतु पुष्करेस्थापितंत्यभूत्॥ १॥ स्वेस्वेस्थमेवमात्मानंदृढीकृत्यम
हेश्वराः॥ विज्वरावीतरागाश्चसुखेनासन्नृपोत्तम॥ २॥ क्षिप्रंसिद्धिकरंराजन्गोकर्णंनात्रसंशयः॥ सालग्रामेपुष्करेचचिरात्
सिद्धिर्भविष्यति॥ ३॥ तस्मात्तेपुत्रश्रेष्ठमभूद्गोकर्णकुरुपुंगव॥ देवंमहाबलंराजन्पूजयंतिसुरासुराः॥ ४॥ धर्मार्थकाममोक्षार्थं

१८२

भक्त्यापूतेनचेतसा ॥ पंचामृतेनगंधेनश्रुत्वतोयेनचैवहि ॥ ५ ॥ श्रीगंधैश्चंदनैर्दिव्यैः स्तथावस्त्रैर्मनोहरैः ॥ रत्नैर्माणिक्यमुख्यैश्चसुवर्णाभरणैरपि ॥ ६ ॥ गुग्गुलादिमहाधूपैर्माल्यैर्दिव्यैर्मनोहरैः ॥ प्रत्यक्षैरपिनैवेद्यैर्ब्राह्मणानांचतर्पणैः ॥ ७ ॥ पुराणादिभिरन्यैश्चस्तवाद्यादिभिस्तथा ॥ संपूज्यवांछितार्थांस्तेलभंतेनिश्चमप्युत ॥ ८ ॥ तस्मात्पूज्यतमंलिंगमन्यन्नास्तिजगत्त्रये ॥ अवापुःपूजनात्सिद्धिंदेवासुरमहोरगाः ॥ ९ ॥ मनुष्याश्च महाभागानात्रकार्याविचारणा ॥ गोकर्णसदृशंक्षेत्रंनास्तिनास्तिजगत्त्रये ॥ १० ॥ महाबलसमंलिंगंनभूतंनभविष्यति ॥ कृतेमहाबलःश्वेतस्त्रेतायामतिलोहितः ॥ द्वापरेपीतवर्णश्चकलौश्यामोभविष्यति ॥ ११ ॥ आक्रांतसप्तपातालकुहरोयंमहाबलः ॥ घोरेकलियुगेप्राप्तेमृदुनामुपयास्यति ॥ १२ दृष्ट्वावादिव्यलिंगंचश्रुत्वावासागरध्वनिं ॥ कोतितीर्थेनरः स्नात्वापुनर्जन्मनविंदति ॥ १३ ॥ पंचक्रोशपरीमाणगोकर्णेक्षेत्रमंडले ॥ सर्वाण्यभ्यागतानितीर्थान्यंभासिसर्वशः ॥ १४ ॥ सार्धयोजनविस्तीर्णमर्धयोजनमायतं ॥ क्षेत्रंस्वरूपेणतिष्ठंतंत्रिवेपश्यंतिसूरयः ॥ १५ ॥ नाग्निनानशनाकेनननाराग्रहनामकैः ॥ तमोविशीर्यतेसम्यक्यथासवितृदर्शनात् ॥ तथैवनेनतीर्थेनानाक्षेत्रेमनोरमैः ॥ सद्यःपापविशुद्धिःस्याद्यथागोकर्णदर्शनात् ॥ १७ ॥ अविषायशतंकृत्वाब्रह्महत्यादिमानवः ॥ सकृत्स्नात्वाभगोकर्णेनरोमुच्येतपातकैः ॥ १८ ॥ अत्रैकेनदिनेनापियत्कृतं कर्मचोत्तमं ॥ तदत्रत्राब्दलक्षेणतपोभवतिसंभृतं ॥ १९ ॥ यत्रेंद्रब्रह्मविष्ण्वादिदेवानांप्रीतिकाम्यया ॥ महाबलाभिधानेनशिवःसन्निहितःस्वयं ॥ २० ॥ इंद्रोब्रह्मामुकुंदश्चविश्वेदेवामरुद्गणाः ॥ आदित्यावसवोरुद्राःशशांकश्चसतारकः ॥ २१ ॥ एतेविमानगतयःसोहिताःपार्षदैःस्वकैः ॥ पूर्वद्वारानुषेवंतेदेवदेवंमहाबलं ॥ २२ ॥ कालोमृत्युर्यमःसाक्षाच्चित्रगुप्तश्चपावकः ॥ पितृभिःसहरुद्रैश्चदक्षिणद्वारमाश्रिताः ॥ २३ सेवंतेनृपशार्दूलनित्यंदेवंमहाबलं ॥ २४ ॥ विभावसुश्चित्ररथश्चित्रसेनोमहाबलः ॥ सहगंधर्ववर्गेणगायंतिपरमेश्वरं ॥ २५ ॥ रंभाकृतस्थलीमेनापूर्वचित्तिस्तिलोत्तमा ॥ नृत्यंतिपुरतःशंभोरुर्वशयाद्याःसुरस्त्रियः ॥ २६ ॥ वसिष्ठःकश्यपःकण्वोविश्वामित्रोमहातपाः ॥ जमदग्नि

श्यष्यरद्वाजोजाबालिःऋतुरंगिराः॥ २७॥ गौतमोजमदग्निश्च भार्गवोऽत्रिःपराशरः॥ व्यासःसत्यवतीपुत्रः शुकेनसहकोरव
॥२८॥ एतेचान्येचराजेंद्रसर्वेब्रह्मर्षयोमलाः॥ देवंमहाबलंभक्त्याउत्तरद्वारमाश्रिताः॥२९॥ सेवंतेत्यनिशंराजन्मात्रकार्याविचक्ष
णा॥ नारदोवालखिल्याश्चमरीच्याद्याःप्रजेश्वराः॥ ३०॥ सनकाद्यामहात्मानउपरिष्टादुपासते॥ तथान्येमुनयोऽसंख्याजटि
लावल्कलांबराः॥ ३१॥ दंडिनोव्रतिनोमुंडाःस्नातकाब्रह्मचारिणः॥ सेवंतेपरयाभक्त्यादेवदेवंमहाबलं॥३२॥ एवंदेवाःसगंध
र्वाःपितरःसिद्धचारणाः॥ विद्याधराःकिंपुरुषाःकिंनरायुद्यकाःखगाः॥ ३३॥ नागाःपिशाचावेतालादैतेयाश्चमहाबलाः॥ नानाविधवसं
ज्ञानानावाहनभूषणाः॥३४॥ विमानैःसूर्यसंकाशैरग्निवर्णैःशशिप्रभैः॥ आगत्यमृगशृंगस्यनिकटंभरतर्षभ॥ ३५॥ प्रस्तुवंतिप्रगायं
तिपठंतिप्रणमंतिच॥ प्रनृत्यंतिप्रहृष्यंतिगोकर्णेपृथिवीपते॥ ३६॥ लभंतेभीप्सितान्कामान्रमंतेचयथासुखं॥ तत्रस्थानानिदेवानांसर्वे
षांसंतिपार्थिव॥ ३७॥ विष्णोश्चदेवदेवस्यब्रह्मणःपरमेष्ठिनः॥ कार्तिकेयस्यदुर्गायागजवक्त्रस्यचानघ॥ ३८॥ धर्मस्यक्षेत्रपालस्यऋषीणां
चमहामते॥ अन्यानिशिवलिंगानिविद्यंतेकोटिशःप्रभो॥ ३९॥ असंख्येयानितीर्थानिविद्यंतेतत्रभारत॥ गोकर्णंकोटितीर्थंचतीर्थानांमुख्य
तांगतं॥ ४०॥ सर्वेषांशिवलिंगानांसार्वभौमोमहाबलः॥ येमातृपितृहंतारोयेवाभूतद्रुहःशठाः॥ ४१॥ गोघ्नाश्चैवकृतघ्नाश्चपरदाररताश्च
ये॥ येदुर्वृत्तादुराचारादुःशीलास्तेषिनश्चये॥ ४२॥ तेसर्वेप्राप्यगोकर्णंस्नात्वाचैवजलेशुचौ॥ देवंमहाबलंपूज्यप्रयांतिशिवमंदिरं॥ ४३॥
तत्रपुण्यासुतिथिषुपुण्यर्क्षेपुण्यवासरे॥ येर्चयंतिमहालिंगंतेरुद्राःस्युर्नसंशयः॥ ४४॥ रवींदुसौम्यवारेषुयदादर्शोभविष्यति॥ तदाज
लनिधौस्नानंदानंचपितृतर्पणं॥ ४५॥ शिवपूजाजपोहोमोव्रतचर्यादिजार्चनं॥ यत्किंचिद्दासुनंकर्मतदनंतफलप्रदं॥ ४६॥ अतीपाता

नमोस्मद्भागधेयायनमस्तेत्रिगुणात्मने ॥ ४७ ॥ दंतावलाननकृतप्रतिष्ठायमहात्मने ॥ नमोवेदशिरोवेद्यज्योतिरानंदमूर्तये ॥ ४८ ॥
नमस्त्रिशिरसेतुभ्यंभवरोगभयच्छिदे ॥ गोकर्णक्षेत्रवासायमहाबलनमोनमः ॥ ४९ ॥ इतिस्तुत्वामुदाशंभुर्लिंगस्यांतिकमागयत्यौ ॥ रावणस्यांगुलिहतिं दृष्ट्वाशंभुः रुशोचह ॥ ५० ॥ लिंगरत्नमहेशानक्षमस्वकरुणानिधे ॥ मयापराधोहिकृतोरावणस्यकरेऽर्पणात् ॥ ५१ ॥ इति
स्तुत्वासभगवान्लिंगरत्नंकुरूद्वह ॥ दृष्ट्वाविष्णुमुखान्देवान्जगादवचनंतदा ॥ ५२ ॥ दिष्ट्यादेवोगजास्येनगोकर्णेस्थापितंभुवि ॥ तस्मात्करगतंमेद्यलिंगरत्नंनसंशयः ॥ ५३ ॥ गोकर्णेजन्मभूमिर्मेतत्रस्थंमत्करेस्थितं ॥ इत्युदीर्यसलिंगस्यत्यभिधानमथाकरोत् ॥ ५४ ॥ त्रिद
शारावणोनामराक्षसोबलवत्तरः ॥ सर्वलोकंस्वयंजिग्येस्वबलेनपराक्रमी ॥ ५५ ॥ तंजित्वास्वबलेनादौलिंगरत्नमतिष्ठत ॥ आक्रांतसप्त
पातालकुहरोयंवचनः सुराः ॥ ५६ ॥ अपकृष्टमशक्योभूद्दक्षसारावणेनहि ॥ तस्मान्महाबलइतित्रैलोक्येविश्रुतंभवेत् ॥ ५७ ॥ इत्युक्त्वाशंकरः
प्रीत्या गणनाथांतिकंययौ ॥ मूर्धानंतस्यचप्रापदृष्ट्वातन्नसकेव्रणं ॥ ५८ ॥ उक्त्वाचवचनंपुत्रं गजास्यंबटुरूपिणं ॥ रावणस्यकराघातात्
पुत्रखिन्नोसिसांप्रतं ॥ ५९ ॥ माकुरुष्वपुनःखेदंशृणुमेपरमंवचः ॥ लिंगरत्नंप्रतिष्ठाप्यमहत्कार्यंकृतंत्वया ॥ ६० ॥ पूजांकृत्वाप्रथम
तश्चवपुत्रगजानन ॥ ततोमहाबलस्यैवपूजनंयःसमाचरेत् ॥ ६१ ॥ वांछितार्थंसलभतांमत्प्रसादान्नसंशयः ॥ यःपूजयतिमल्लिंगं
मकृत्वातवपूजनं ॥ ६२ ॥ वांछितार्थफलंतस्यनकदाचिद्भविष्यति ॥ इत्युक्त्वास्वात्मजंशंभुः सर्वदेवगणैः सह ॥ ६३ ॥ पूजयित्वास्व
तनयंविघ्नेशंविधिपूर्वकं ॥ ततोमहाबलंराजन्पूजयामासशंकरः ॥ ६४ ॥ पुनर्देवानुवाचेदंशंकरोभक्तवत्सलः ॥ कार्तिके पुण्यमा
सेतुलिंगरत्नंप्रतिष्ठितं ॥ तस्मादहंकार्तिकेतुपार्वत्यासहपार्षदैः ॥ चराचरेणजगतावित्रोषेणवसामिवै ॥ भवंतोत्रैवातिष्ठंतु

तस्यदुर्मतेः ॥१३॥ प्रजाक्षोभकरोनित्यंसदादुर्मन्त्रिसंगतः॥ क्रूरमंत्रिणः परित्यक्ता क्रुद्धाश्चैवपुराविदः॥ १४॥ तेनचाकृतपापानि
संतिधरणीतले॥एवंपातकिनस्तस्यबभूवर्षोत्यगान्नृप ॥१५॥ अतीवपापसंदोहाद्राजयक्ष्माभवत्ततः॥ अतीतेदशमेमासिव्याधिरुत्कृ
ष्टतांगतः॥ १६॥ नभिषङ्मन्त्रवाबंधुर्नमातजनकोपिवा ॥नदैवंनन्यवाराज्यं राक्षास्तेतंनिवारितुं ॥१७॥ तस्मिन्नेवंविधेराज्ञि राजयक्ष्मो
व्यथातुरे॥ दैवयोगात्तदाप्राप्तः सनकोब्रह्मनंदनः॥१९॥ तत्पुरंप्रविवेशासौ ब्रह्मज्ञानपरायणः॥ दांतोजितेंद्रियः शांतो ह्यक्षमाला
धरोमुनिः॥ १९॥ तत्पुरंसंप्रविष्टेतु सनकेयोगवित्तमे॥ नृपभार्यापुण्यशीलातद्वृत्तांतंनिशाम्यच॥ २०॥ सयोगीयत्रचास्तेवैतत्रागत्य
पतिव्रता॥ पादयोः पतितातस्यइदमूचेपतिव्रता॥ २१॥ स्वामिन्ननाथांमांपाहि पतिदानप्रदानतः॥ इत्युक्त्वासातदादेवी निन्ये
तंराजमंदिरं॥ २२॥ तमागतमभिप्रेक्ष्यविष्णुवर्मामहीपतिः॥अभ्युत्थायासनंदत्वा मधुपर्कादिभिर्नृपः॥ २३॥ पूजयामासविधि
वत्सुखासीनंमहामुनिं॥ तमूचेयोगिनंराजासनकंविनयान्वितः॥२४॥ कृतार्थोस्मिमहाभाग भवद्दर्शनमात्रतः॥ अद्यमेसफलं
जन्मजीवितंचसुजीवितं॥ २५॥ अद्यमेपितरस्तुष्टाभवदागमनेनवै॥ अनाथंपापकर्माणंविमुखंपुण्यकर्मणि ॥२६॥दुराचा
ररतंकामलोलुपंत्राहिमांमुने॥जन्मांतरार्जितात्पुण्यलेशात्त्वांमहात्मनः॥ २७॥ भवतोदर्शनंजातंनलभ्यंपापकर्मिणां॥ इत्यु
क्तस्तेनयोगींद्रश्चिरंदध्यौसमाहितः॥ २८॥ मुहूर्तध्यानमास्थायज्ञात्वातत्कर्मपापिनः॥ उवाचमधुरंवाक्यं राजानंव्यथितंतदा॥
॥२९॥ राजन्वक्ष्यामितेकर्मकृतंश्रृणुपुरातनं॥ यत्रवृंदावनंनास्तिशालिग्रामशिलार्चनं॥ ३०॥ यत्रवेदध्वनिर्नास्तिपुराणपठनं
तथा॥ यत्रशास्त्रविवादोवानास्तिसज्जनसंगतिः॥३१॥ तत्रस्युः सकलारोगादुर्भिक्षंभयमेवच॥ यत्रानिष्टरवचनंसदाक्रोधो

वसेन्नृप ॥३२॥ यत्रारूक्षतरावाणी मलिनांबरधारणं॥ स्वाचारस्यपरित्यागः परधर्मपरिग्रहः॥ ३३॥ स्नानसंध्यादिकंनास्तितथादानक्रियानृप॥ औ
पासनंवैश्वदेवंनास्तिगोभूजनंतथा॥ ३४॥ देवब्राह्मणपूजावानास्तिचाश्वत्थसेवनं॥ परोपकरणंनास्तितत्रस्थुः सकलारुजः॥ ३५॥ गोषुविप्रेषुनारी
षुदेवेषुपरवस्तुषु॥ द्वेहंनकारयेद्विद्वान्छलाचेन्नारकीभवेत्॥ ३६॥ विश्वासघातिनश्चापिकृतघ्नस्यापिमायिनः॥ परस्त्रीसंगिनश्चापिनिष्कृतिर्नास्तिकुत्रचित्॥३७॥पूर्वजन्मकृतंपापंमिहजन्मनिवातथा॥तत्सर्वंव्याधिरूपेणपीड्यतेतंनराधमं॥ ३८॥ त्वंतुपूर्वभवेजातोवेश्यायांशूद्रभूरुहात्॥ धर्म
ध्वजइतिख्यातोलुब्धकःप्राणिहिंसकः॥ ३९॥ पापकर्मरतोनित्यंदेवब्रह्मस्वहारकः॥ दृष्ट्वाद्देशमनुप्राप्तः कामपीडारतःसदा॥ ४०॥ धैर्यबुद्धिरतःक्रूरःसरस्ती
रमुपास्थितः॥ स्थितेत्वयिनृपश्रेष्ठकस्यचिद्विजवल्लभा॥४१॥ भर्त्रासहैवस्नानकैर्गंगास्नानार्थमागता॥ विलोकयंतीभर्तारंनपश्यंतीदृशाश्वसा॥ ४२॥
साक्षात्कंदर्पदर्पघ्यमथवाजडुनंदना॥ तांविलोक्यतदात्वंतु स्नातेगंगाजलेशुभे॥ ४३॥ स्नानदानादिकंकर्मचक्रेविप्रस्तयासह॥तत्सर्वंदृष्टवान्त्वंतु
मदाविह्वलितोभृशं॥४४॥ततःस्वभवनंयातःसविप्रोभार्ययासह॥ गतेतस्मिन्द्विजाग्र्येतुत्वयातत्पदमीक्षितं॥ ४५॥ अनुसृत्यततः पश्चाद्रात्रौवेलांचदृ
ष्टवान्॥ अर्धरात्रव्यतीतायांकुड्येमलविकारिच॥ ४६॥ तद्बिलद्वारमार्गेणगतस्त्वंविप्रभामिनीं॥ निद्रालुः स्वामिनासार्धं दृष्टवान्करमूलतः॥ ४७॥
त्वत्करस्पर्शमात्रेणबुबोधद्विजवल्लभा॥ कुड्येद्वारंतदालोक्यचोरोयमितिचाब्रवीत्॥ ४८॥ बिलद्वारंपुनर्गत्वानिर्गतस्त्वंपुनर्बहिः॥ पुरचारास्त
दागत्यबध्वात्वांराजसंनिधिं॥ ४९॥ निन्युर्विज्ञापिताःसर्वेराज्ञेचोरंव्याजित्तपत्॥ राजासोधर्मशास्त्रज्ञश्छित्वाहस्तपदंनृप॥५०॥निर्वासयामा
सपुरात्बहिर्गिरौन्यपातयत्॥ तेनदुःखेनमहतामृतस्त्वंपर्वतोपरि॥५१॥ पूर्वजन्मार्जितेनैवदोषेणमहतानृप॥ जातेयंचेदृशीबुद्धिर्बुद्धुपापरता
सदा॥ ५२॥ प्रातःस्नानान्माघमासेपार्थिवत्वमवाप्तवान्॥ द्विजस्यस्नानसंध्यादिदर्शनान्नृपसत्तम॥ ५३॥ ममेहदर्शनंजातमलभ्यंपापकर्मि
णां॥ तस्मात्पूर्वार्जितंपापमिहजन्मार्जितंतथा॥ ५४॥ रोगपीडाकरंनित्यंभवत्येवनसंशयः॥ पापंनिरयभोगाय पुण्यंस्वर्गायपार्थिव॥ ५५॥

पापेन क्लिश्यतेजंतुर्यमलोकेभयंकरे:॥ कुंभीपाकादिषुनृपनरकेषुबहुष्वपि॥५६॥ ताड्यमानोयमभटैर्यातनाभनुभूयच॥ मृगादियोनि
मासाद्यअंतेगोयोनिमाश्रित:॥ पश्चान्मनुष्ययोनौतुजायतेपापकृन्नर:॥ ५७॥ एतत्तेकथितंसर्वं पूर्वजन्मार्जितंतथा॥ इतःपरंत्वंभूपा
ल किमन्यत्श्रोतुमिछसि॥५८॥ ॥इत्यादि० गोकर्ण० अध्याय:॥ ॥ सूतउवाच॥ सनकेनेरितंश्रुत्वाविष्णुवर्मातिहृ
ष्टवान्॥ पुनःप्रोवाचतमृषिंकृतांजलिपुटस्तदा॥१॥ विष्णुवर्मोवाच॥ स्वामिन्ननुगृहीतोस्मिभवताकरुणानिधे॥ त्वन्मुखान्निःस्रु
तांवाक्यसुधांपीत्वाविहृष्टवान्॥२॥ मयाकृतानिपापानिनाविद्यंतेहिकुत्रचित्॥ तेषांमत्कृतपापानांनिष्कृतिश्चकथंभवेत्॥ ३॥ म
च्छरीरस्थितोरोगःकथंनश्येततद्वद॥ भवत्प्रसादाद्योगींद्रनिरोगश्चभवाम्यहं॥४॥ दानंहोमोथवायात्रापूजावातद्वदस्वमे॥ इति त
द्वचनंश्रुत्वायोगीवचनमब्रवीत्॥ ५॥ सनक उ०॥ श्रूयतांभोनृपश्रेष्ठयेनत्वंनिरुजोभवेः॥ भवताकृतपापानामसंख्यानांनृपोत्त
म॥६॥ एतत्पापविशुध्यर्थंतवरोगनिवारणे॥ नहिदानंनहोमश्चनपूजाविद्यतेक्वचित्॥७॥ पश्चिमांबुधितीरस्थेगोकर्णेक्षेत्रसत्त
मे॥ कोटितीर्थमितिख्यातंविद्यतेविमलंसरः॥ ८॥ कोटिद्वयुतंपुण्यंमुनिदेवनिषेवितं॥ स्नानमात्रेणतत्तीर्थेमहापातककोट्यः
॥९॥ नष्टमेवनसंदेहोनात्रकार्याविचारणा॥ दिनमेकंकोटितीर्थेस्नात्वाभक्तियुतोनरः॥ १०॥ प्रभातसमयेराजन्पूजयेच्चमहाबलं
॥ब्रह्महत्यादियुक्तोवासंयुक्तोप्युपपातकैः॥ ११॥ सर्वपापविनिर्मुक्तोनरकान्नैवपश्यति॥ पश्चिमेबुधितीरस्थंगोकर्णक्षेत्रमुत्तमं॥१२
ब्रह्महत्यादिपापानिदहत्येवनसंशयः॥ महाबलाभिधानेनआस्तेतत्रवृषध्वजः॥१३॥ पुरातुविद्यतेमामब्राह्मणोमध्यदेशजः॥
ब्रह्महत्यादिपापानिकृतवान्चबहूनृप॥१४॥ तेनचाकृतपापानिसंतिधरणीतले॥ भ्रांतोबभ्रामजगतींभृगुवाक्यात्ततोद्विजः॥ १५॥

दियोगेषु रविसंक्रमणेषुच ॥ महाप्रदोषवेलासु शिवपूजाविमुक्तिदा ॥ ४७ ॥ सदाकृतयुगश्चात्र सदाचैवोत्तरायणं ॥ महाबलालयेपुण्येपुण्यंपुण्यसमृद्धिकृत् ॥ ४८ ॥ गोकर्णरामसेतुश्च काशीतित्रिस्थलीस्मृता ॥ त्रिस्थलीषु कृतं कर्मशेषेणाप्निगण्यते ॥ ४९ ॥ पृथिव्यांयानितीर्थानिसागरंप्रविशंतिहि ॥ गंगादिसरितोयस्माद्गोकर्णंतद्विशिष्यते ॥ ५० ॥ गोकर्णसामहाकाशी विश्वनाथोमहाबलः ॥ कोटितीर्थमथोगंगा समुद्रोऽयंविशिष्यते ॥ ५१ ॥ गुंजामात्राधिकंकाश्यागोकर्णमभिधीयते ॥ अत्रदत्तं कृतं जप्तं तदनंत्याय कल्पते ॥ ५२ ॥ ॥ इत्यादि० गो० अध्यायः ॥ शौनक उ० ॥ ॥ सर्वेषामपितीर्थानांकोटितीर्थंविशिष्यते ॥ ब्रह्महत्यादिपापानि नश्यंतिस्नानमात्रतः ॥ १ ॥ इतिप्रोक्तंत्वयासूत तन्मेविस्तरतोवद ॥ सूत उ० ॥ शृणुविप्रप्रवक्ष्यामि सम्यग्दृष्टंत्वयानघ ॥ कोटितीर्थस्यमाहात्म्यं श्रुतमाराधनात्तव ॥ २ ॥ आपपापहरंकृत्वा ब्रह्महत्यादिमानवः ॥ कोटितीर्थेस्नानमात्रान्नरोमुच्येतपातकैः ॥ ३ ॥ कोटितीर्थंनाममुनेकोटिद्वयसमन्वितं ॥ तस्मिन्स्नातोमहापापैर्मुच्यते नात्रसंशयः ॥ ४ ॥ अत्रैवोदाहरंतीममितिहासंपुरातनं ॥ तच्छ्रुत्वासर्वपापानि विलयंयांति तत्क्षणात् ॥ ५ ॥ अवंतिविषयेराजा विष्णुधर्मेतिविश्रुतः ॥ बभूवत् ॥ पुराकृतयुगेसोपिस्वराज्यंपर्यपालयत् ॥ ६ ॥ सदामद्यपशीलोवैगीतवाद्यानुमोदकः ॥ प्रत्यहंसुंदरीश्यामां सुकेशीसुस्तनीमुदा ॥ ७ ॥ रमयेच्चदिवारात्रं परेद्युस्तांत्यजेत्सदा ॥ सुकेशीसुंदरीस्निग्धा नारीयत्रवसेत्क्वचित् ॥ ८ ॥ मानयित्वामौल्येनबलात्कारेणवानृप ॥ रमयेच्चयथासौख्यंप्रातस्तांप्रत्यहंत्यजेत् ॥ ९ ॥ गुरुपत्नींभ्रातृपत्नींसखिपत्नींतथैवच ॥ शरणागतपत्नींच शूद्रपत्नींतथैवच ॥ १० ॥ वेश्यांवारमयेन्नित्यंविधवासंगमाचरेत् ॥ दासीवारमयेन्नित्यंरजकींयापिदोषकृत् ॥ ११ ॥ रजस्वलांवादुष्टांसोरमयेच्चानिशंतरं ॥ ब्रह्मद्वेषीकृतघ्नश्च देवब्राह्मणनिंदकः ॥ १२ ॥ देवब्राह्मणद्रव्याणिबलादपहरंसदा ॥ ब्रह्मद्वेष्यैःकृतघ्नैश्चसखित्वं

आदौ प्राप्ते स्कगोकर्णे यात्रार्थं सूतनंदन ॥ किंकार्यं पुरुषैः स्त्रीभिरेतन्नो वक्तुमर्हसि ॥ ३६ ॥ सूत उ० ॥ गोकर्णयात्राभिरतो नारी वा पुरुषोपि वा ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वापि नरोत्तम ॥ ३७ ॥ उपोषितो मुंडितश्च स्नात्वाश्राद्धं समाचरेत् ॥ यदा प्राप्नोति गोकर्णं यो वाको वापि मानवः
॥ ३८ ॥ मुंडनं चोपवासं च स्नात्वा कुर्वीत भक्तितः ॥ गंगायां भास्करे क्षेत्रे चौले चैवोपनायने ॥ ३९ ॥ श्रीशैले यज्ञदीक्षायां प्रायश्चित्तव्रतेषु च ॥
महागुरुमृते चैव महास्वामिमृतौ तथा ॥ जीवत्पितापि कुर्वीत वपनं श्राद्धमेव च ॥ संवत्सरे हि मासोने पुनः क्षेत्रं विशेद्यदि ॥ ४१ ॥ क्षौरोपो
षणकादीनि कुर्यादेवन संशयः ॥ पश्चिमां बुधिनीरस्थं गोकर्णक्षेत्रमुत्तमं ॥ ४२ ॥ रुद्रैर्याधिष्ठितं पुण्यं भास्करक्षेत्रमुच्यते ॥ पर्वताग्रे नदी
तीरे ब्रह्मविष्णुशिवैः श्रिते ॥ ४३ ॥ दुर्गादिबाहुलेचोद्योत द्भास्करमितीर्यते ॥ काञ्चीपुष्पगिरिः कांची निरुत्तारव्या भलंपुरी ॥ ४४ ॥ श्रीशै
लः श्रीविरूपाक्षः सेतुः केदारएवच ॥ गोकर्णं च दशैतानि भास्कराण्या हुरुत्तमाः ॥ ४५ ॥ आदौ स्नात्वा कोटितीर्थे स्थापयेद्ब्रह्मदंडकं ॥
क्षौरं कृत्वा विधानेन स्नानदानविधिं चरेत् ॥ ४६ ॥ भस्मगोमयमृद्धारिपंचगव्यं तथैवच ॥ मलापकर्षणं चैव स्नानदानविधिं स्मृतं ॥ ४७ ॥
एवं स्नात्वा विधानेन श्राद्धं कृत्वा विधानतः ॥ ततः समुद्रे विधिवत् स्नानं कुर्याद्यथा विधि ॥ ४८ ॥ पृथिव्यां यानि तीर्थानि समुद्रं प्रविशंति
हि ॥ तस्मात्समुद्रोत्यधिकः स्नानमात्राद्विमुक्तिदः ॥ ४९ ॥ सेतोसिंधोः सरस्त्वत्यां गोकर्णे पुरुषोत्तमे ॥ उदन्वदंभसि स्नानं सार्वकालं विधीयते
॥ ५० ॥ अन्येषु सर्वतीर्थेषु पर्वणि स्नानमाचरेत् ॥ प्रातःकालेत्यन्यदिने सागरं संस्मरेत्सकृत् ॥ ५१ ॥ गोकर्णेन्तु पत्राद्यैर्लसिंधुस्नानंस
माचरेत् ॥ पिप्पलादं कविं कण्वं कृतांतं जीवितेश्वरं ॥ ५२ ॥ मन्युं च कालरात्रिं च विद्यादुर्गां गणाधिपं ॥ देवान्ऋषीन्पितॄंश्चैव तर्पयित्वा
विधानतः ॥ ५३ ॥ पुनः स्नानं च कृत्वैव ब्राह्मणेभ्यो यथाविधि ॥ गोभूतिलहिरण्यादि दानं दद्यात्सदक्षिणं ॥ ५४ ॥ पितृस्थालीं समासाद्य

पितॄणांपिंडदोभवेत् ॥ तत्रपिंडप्रदानेनापतरःसर्वएवहि ॥५५॥ सद्यः प्रयांतिवैस्वर्गकुलकोटिसमन्विताः॥ स्नात्वारुद्रपदेसम्यगर्चयित्वा महाबलं ॥ ५६॥ श्रृणुयात्तीर्थमाहात्म्यं कुर्याच्चनिशिजागरं ॥ ब्राह्मणानूभोजयेत्पश्चात्स्वयंभुंजीतवाग्यतः ॥ ५७॥ ततः सर्वेषुतीर्थेषु स्नात्वातल्लिंगमर्चयेत् ॥ त्रयस्त्रिंशात्कृतीर्थेषुत्रयस्त्रिंशाह्निनेषुच ॥५८॥ एकैकंदिवसंस्थित्वाकुर्यादेवंविधिः स्मृतः॥तीर्थानांचत्रयस्त्रिंशत्तेषांनामानिमेश्रृणु॥ ५९॥गोकर्णंगुहतीर्थंचचक्रंकापिलमेवच ॥ अरण्यमुन्नितीर्थंच वैतापकमतःपरं ॥ ६१ ॥ कोबेरंनागतीर्थंच पश्चात्सांवर्तकंशुभं॥ आदित्यतीर्थंचशुभंमार्कंडेयमघापहं ॥ ६२॥ दुर्गाकुंडंनागतीर्थंकोटितीर्थंमतःपरं॥ उन्मज्जनंमहातीर्थंनदी वैतरणीतथा ॥६३॥अशोकपंचकं पश्चाद्गंगाधारमतःपरं ॥ भीमकुंडंतथागस्त्यंवसिष्ठंगारुडंतथा॥ ६४॥ मालेन्द्रारव्यानदीश्रुक्लाशिं शुमारमिहोच्यते॥ एकबिंद्वादिबिंदूनांचतुष्कंत्वेकमुच्यते ॥ ६५॥ एतान्येकैककोटीनांतीर्थानांनायकानितु ॥ ब्रह्मांडोदरतीर्थानिक रेःसृष्टानितेरवे॥ तेनसत्येनगोकर्णे तीर्थेप्रायहितोभव ॥ इमंमंत्रंसमुच्चार्यकुटितीर्थादिषुक्रमात्॥ ६७॥ स्नानंकुर्याद्यथान्यायंस र्वतीर्थाचनिम्नगा॥ गायत्रीकोटितीर्थंच ब्रह्मकुंडमतःपरं ॥ ६९॥ रामतीर्थंसंगमंच अशेतीर्थान्यनुक्रमात्॥ एवंसर्वेषुतीर्थेषुगो कर्णस्थेषुपार्थिव॥ स्नात्वायथाक्रमंमर्त्यो तत्तल्लिंगंसमर्चयेत्॥ एवंगोकर्णमासाद्यक्षेत्रक्षेत्रविध्यादिकंनृप॥७०॥ यःकरोतिन रोभक्त्यास्मपुण्यमनंतकं॥ इहभुक्त्वामहाभोगान्शिवलोकेव्रजेदसौ॥७१॥ ॥ इत्यादि० गोकर्णमाहा० अध्यायः॥ स्नानानीफ३०॥ शंसमेकापिलंतीर्थमुत्पत्तिंचैवशंसमे॥ अरण्यतीर्थंचविभोशंसनादेश्वरंतथा॥ २॥ अशोकस्याश्रमंब्रूहिलिंगं

तीर्थंतथैवच ॥ अन्येषांचैवसर्वेषांतीर्थानांसूतनंदन ॥ २ ॥ उत्पत्तिंचैवमाहात्म्यंविस्तराद्वक्तुमर्हसि ॥ सूतउ० ॥ शृणुराजन्प्रवक्ष्यामि यत्पृष्टोहमिहत्वया ॥ तीर्थानांचैवसर्वेषांस्वभावंजन्मभारत ॥ ३ ॥ कपिलायास्तुतीर्थस्यशृणुपूर्वमरिंदम ॥ पूर्वंकृतयुगेराजन्ग्रहणे भास्करस्यच ॥ ४ ॥ राहुणाराजशार्दूलनक्षत्रेश्रवणाह्वये ॥ पुष्यमासस्यभद्रंतेत्यमायांचाभवन्नृप ॥ ५ ॥ यत्रागुः सर्वलोकास्तुगोकर्णं प्रतिसव्रत ॥ इतस्ततोनुधावंतिप्रजाराजन्चतुर्विधाः ॥ ६ ॥ देवासुरमनुष्याश्चगंधर्वाप्सरसस्तथा ॥ नागाःसिद्धाश्चयक्षाश्चपशुपक्षिसरीसृपाः ॥ ७ ॥ अगमन्सत्रभूतानिसर्वाणिभरतर्षभ ॥ ग्रहणंद्रष्टुकामानिगोकर्णेतीर्थसत्तमे ॥ ८ ॥ तस्मिन्काले हरोदेव्यासहितःखमुपेयिवान् ॥ तांदृष्ट्वासमितिंराजन्गौरीशंकरमब्रवीत् ॥ ९ ॥ किमिदंदेवदेवेशभूतानांसमितिःकृता ॥ किमर्थंवैमहादेवअत्रागच्छंतिवैप्रजाः ॥ १० ॥ तामुवाचमहादेवोवियतिस्थःप्रियांशिवां ॥ अद्यापराण्हेग्रहणंभविष्यतिवरानने ॥ ११ ॥ सूर्यंदेवितंद्रष्टुंआगच्छंतिचवैप्रजाः ॥ स्नात्वात्र पूज्यमांभक्त्यायेपश्यंतिविभावसुं ॥ १२ ॥ प्रसन्नस्वर्भानुनादेविनतेषामस्तिदुर्गतिः ॥ मत्प्रसादेनगच्छंतिमृताःस्वर्गंनसंशयः ॥ १३ ॥ तस्मादितस्ततोभद्रेप्रजादेवि चतुर्विधाः ॥ आगच्छंत्यत्रशांतेषांसमूहमिममत्रवै ॥ १४ ॥ ततोदेवीशिवंनत्वावि स्मितावाक्यमब्रवीत् ॥ एतेस्वर्गंगमिष्यंतिसर्वेयदिमहेश्वर ॥ १५ ॥ नावकाशस्ततःस्वर्गेभवतीतिमतिर्मम ॥ ततःप्रहस्यभगवान्शंकरोभरतर्षभ ॥ १६ ॥ अब्रवीत् गिरिजांदेवोमधुरंवचनंहरः ॥ सर्वेस्वर्गंगमिष्यंतिनात्रकार्याविचारणा ॥ १७ ॥ पर्यायेणयथाकर्मतथाप्राप्स्यंतिसद्गतिं ॥ निरयंवामहाभागेपुण्यपापप्रकर्षणात् ॥ १८ ॥ मध्येतेषांगमिष्यंतित्रयोनिर्याणमद्यहि ॥ नान्येगच्छंतिवैस्वर्गंतामसाभक्तिवर्जिताः ॥ १९ ॥ तेषां मल्पतरासिद्धिः कायक्लेशाद्भविष्यति ॥ तीर्थानिदेवताश्चापिभक्त्यातुष्यंतिनान्यथा ॥ २० ॥ तस्मात्तिद्धिकरांभक्तिंभक्तिहीनस्तुपार्थिव ॥

गोकर्णक्षेत्रमासाद्य माघमासे नृपोत्तम ॥ प्रातःस्नात्वा कोटितीर्थे पूजयित्वा महाबलं ॥ १६॥ ब्राह्मणान्भोजयामास निराहारोद्विजोत्तमः ॥ सर्वपापविनिर्मुक्तो अंतेस्वर्गमवाप्तवान् ॥ १७॥ राजन्भोतवदेहस्य यदित्वंसुखमिछसि ॥ गोकर्णक्षेत्रमासाद्य माघमेकंनरोत्तम ॥ १८॥ प्रातःस्नात्वाकोटितीर्थेपूजयस्वमहाबलं ॥ तवरोगोविनश्येत सर्वपापंविनश्यति ॥ १९॥ स्वस्थःस्वराज्यमासाद्यरंजयस्वस्वकाः प्रजाः ॥ धर्मेणमेदिनीरक्ष वेदशास्त्ररतोभव ॥ २०॥ देवान्द्विजान्समभ्यर्च्यस्वस्थोभवनृपोत्तम ॥ पुत्रैःपौत्रैश्चसहितोभुक्त्वाभोगाननेकशः॥ २१॥ देहांतेसुरलोकंत्वं प्राप्य सेनात्रसंशयः॥ संदेहोनात्रकर्तव्यः सत्यंसत्यंवदाम्यहं ॥ २२॥ सूतउ०॥ इत्युक्त्वासनकोयोगी पूजितस्तेनभूभुजा ॥ यथाकामंजगामासौयोगीत्रैलोक्यपूजितः॥ २३॥ ततःसराजामुदितोगतेयोगिनिभारत ॥ गोकर्णंचतदागंतुंसामात्यःसपुरोहितः॥ २४॥ हस्त्यश्वरथयानादिचतुरंगबलान्वितः॥ गोकर्णाभिमुखोराजाप्रतस्थेत्यतिलालसः॥ २५॥ क्षिप्रंसंप्राप्यगोकर्णंमाघादौक्षेत्रमुत्तमम् ॥ प्रातःस्नात्वाकोटितीर्थेपूजयित्वामहाबलं॥ २६॥ यथोक्तंयोगिनातेनतथैवकृतवान्नृपः॥ आनिशंमाघमासंसगोकर्णेराजकुंजरः॥ २७॥ सर्वतीर्थेषुचस्नात्वासर्वलिंगानिपूज्यच॥ निष्कल्मषश्चनिरुजःस्वपुरंप्राप्यहृष्टधीः॥ २८॥ यथाजीर्णत्वचंत्यक्त्वाराजतेवायुभोजनः॥ शुक्लपक्षेयथाचंद्रोमेघमुक्तोयथारविः॥ २९॥ तथाबभौनृपश्रेष्ठःसर्वरोगविवर्जितः॥ प्रजाःस्वाःस्वाःसधर्मेण धर्मराजइवापरः॥ ३०॥ देवब्राह्मणपूजांचसदासोकृतवान्नृपः॥ सत्पात्रेदानमुख्यैश्चयजेसर्वान्महाक्रतून्॥ ३१॥ पौरावभूवुःसंहृष्टाःपुत्रपौत्रसमन्विताः॥ भोगान्भुक्त्वाबहुविधान्भार्यासहपार्थिवः॥ ३२॥ पुत्रपौत्रैःपरिवृतोदेवब्राह्मणसेवकः॥ अंतेविमानमारुह्यदिव्यस्त्रीगणसेवितः॥ ३३॥ गंधर्वैर्गीयमानस्तुदेवलोकंययौनृपः॥ एतत्तेसर्वमाख्यातंभूपतेपर्यपृछते॥ ३४॥ कोटितीर्थस्यमाहात्म्यंश्रुतमात्राघनाशनं॥ सर्वरोगहरंपुण्यंभूयःकिंश्रोतुमिछसि ॥ ३५॥ शौनकउ०॥

संमृज्यतस्तेचांगानि सांत्वयंतश्चतेद्विजाः॥ हेमातदृतितेविप्राऊचुःपुनरितिद्विजाः॥ ४१॥ तैःसांत्वमानोभगवान्नीलकंठ
उमापतिः॥ प्रत्यक्षमगमत्तेषांदेव्यासार्धंमहामते ॥४२॥ उत्थाप्यतान्द्विजवरान्स्पृष्टवांस्तनोशिवः॥ तेप्रविश्यमहादेवमु
क्तिस्थानमनुत्तमं॥४३॥तस्मिन्निर्वाणमगमन्नीश्वरास्तेबभूविरे॥ यत्रगोमिथुनंलग्नंतीर्थंतत्कापिलंविदुः॥ ४४॥तत्रस्ना
त्वानरोभक्त्याअश्वमेधफलंलभेत्॥ त्रिजन्मचरितंपापमल्पंवायदिवाबहु॥४५॥श्रवणेपुष्यमासस्यस्नातानांतत्रनश्य
ति॥ माघेभाद्रपदेकृष्णेषष्ठीभौमार्कसंयुता॥रोहिणीपातयुक्ताचेत्साषष्ठीकपिलास्मृता॥४६॥तस्मिन्कालेनृपश्रेष्ठतीर्थे
कपिलसंज्ञके॥स्नानंकुर्वंतियेभक्त्यातेभवाब्धेंतरंतिवै॥ ४७॥ ॥इत्यादि० गोकर्णमाहात्म्ये० अध्यायः॥ ॥
सूतउ०॥ ॥अरण्यतीर्थस्यविभोप्रभावंशृणुपार्थिव॥अरण्योनामराजासीत्पुराकृतयुगेमहान्॥ १॥चिरंराज्यश्रियंभु
क्त्वाविषयाननुभूयसः॥ ततोविरक्तोभोगेषुतपसेकृतमानसः॥ २॥ पुत्रेराज्यधुरन्यस्यययौगोकर्णनामकं॥ क्षेत्रंभरतशा
र्दूलअरण्योनृपसत्तमः॥ ३॥ तत्राश्रमपदंकृत्वातपस्तेपेसुदुश्चरं॥तपसामहतातस्यतुतोषभगवान्हरः॥ ४॥ प्रत्यक्षमगम
न्नस्यवचनंचेदमब्रवीत्॥ प्रसन्नंविद्धिमांराजन्ददाम्यभिमतंतव॥ ५॥यत्त्वंनृपवरंब्रूहिवरंमत्तोभिकांक्षसि॥ ततःप्रणम्य
राजर्षिर्देवदेवमुमापतिं॥ ६॥ प्राहेदंतमदीनात्माप्रीतंदृष्ट्वामहेश्वरं॥ सिद्धिमिच्छामिदेवेशादेहितन्मत्यमप्युत॥७॥ तीर्थंचे
दंनृपश्रेष्ठसर्वपापहरंभवेत्॥ इत्युक्तस्तेनतंदेवस्तथास्त्वित्यब्रवीद्वचः॥ ८॥ इतिदत्वावरंतस्मैशंकरोंतरधीयत॥अरण्योरा
जशार्दूलस्तत्रसिद्धः सनातनः॥ ९॥ तन्नाम्नाचाभवत्ख्यातंतीर्थंत्रैलोक्यपावनं॥अरण्यतीर्थंमारण्यमाश्रमंचमहोदयं १०

१८८

कापिलस्यतुतीर्थस्यदक्षिणेनकुरूद्वह ॥ अभवच्छुरपातात्तुपवित्रंपापनाशनं ॥११॥ तत्रस्नात्वानरोराजन्नग्निष्टोमफलंलभेत् ॥
आजन्मचरितंपापंतत्रस्नानाद्विनश्यति ॥१२॥ पितॄनुद्दिश्ययस्तत्रददातिचजुहोतिच ॥ तदक्षयंपितॄणांहिभविष्यतिनसंशयः
॥१३॥ ततःपरंकुरुश्रेष्ठश्रृणुनादेश्वरंपरं ॥ स्कनादोनामविप्रेंद्रःपूर्वस्यारोचिषांतरे ॥१४॥ आसीत्पातालमगमत्स्कतलंनामभारत ॥
समहात्मामहाबुद्धिः कामचारीद्विजोत्तमः ॥१५॥ स्कनलेविचरंस्तोथ ददर्शपरमेश्वरं ॥ लिंगमूर्तिधरंसाक्षाज्ज्वलंतंस्वेनतेजसा ॥१६
सूर्यानलसमंराजन्नमृतस्यंदनंसदा ॥ अंगुष्टमात्रंतल्लिंगंदृष्ट्वाविस्मयमागतः ॥१७॥ माणिनागस्यभद्रंतेतस्यवेश्मनिभारत ॥ सु
नादस्तंनागराजमभ्यगच्छन्महातपाः ॥१८॥ माणिनागोपितंदृष्ट्वाअभ्युत्थायासनंददौ ॥ पूजयामासतंसम्यगर्घ्यपाद्यादिभिर्नृप
१९ उवाचतंद्विजश्रेष्ठंस्वागतंतेद्विजोत्तम ॥ किमागमनकृत्यंतेब्रूहितद्वितराम्यहं ॥२०॥ स्कनादस्तंनागराजमब्रवीत्प्रीतिसंयुतः
किमिदंतेनागराजतेजसाज्वलतेमहान् ॥२१॥ लिंगमूर्तिधरःसाक्षान्नीलकंठइवापरः ॥ तच्छ्रुत्वानागराजस्कवचनंब्राह्मणेहि ॥२२ स्य
तंप्रणम्यमहाभागमिदंवचनमब्रवीत् ॥ श्रूयतांद्विजशार्दूलसर्वदेवमयंह्यिदं ॥२३॥ अमृतेमथ्यमानेतुसंभूतलिंगमुत्तमं ॥ सा
र्धंवस्कभिरन्यैस्कबटुभिर्द्विजसत्तम ॥ २४॥ एकैकंजगृहुस्तस्मात्करासिद्वादयस्तदा ॥ अश्वमप्सरसश्चैवनागराजमतःपरं २५
अगृण्हद्विद्रोभगवान्ब्रह्मोंकारमगृण्हत ॥ लक्ष्मीश्चकौस्कभंदिव्यंरत्नंगृहीतंविष्णुनाप्रभो ॥२६॥ बालेंदुश्चविषंचोग्रंगृहीतं
चात्रशंभुना ॥ एवंसमस्तरत्नानिस्वंस्वंभागमगृण्हत ॥२७॥ ततःपितामेभगवान्कश्यपस्तपसांनिधिः ॥ जग्राहेदंतरादित्यंतं

गंमणिमयंशृंगं ॥२८॥ आराधयामासचिरंपितामहमहातपाः॥ अनन्यदुर्लभांविप्रसिद्धिमापचकश्यपः॥ २९॥ तस्मिन्प्रत्यक्षमग
च्छिवःसाक्षात्सनातनः॥ प्रीतःकश्यपमाहेदंभगवान्वृषभध्वजः॥३०॥ सिद्धिंप्राप्तोसिपरमांकिंभूयस्तेददाम्यहं॥ ततस्तुकश्यपोरा
जन्प्रणिपत्यकृतांजलिः॥३१॥ उवाचवचनंश्लक्ष्णंप्रसन्नंगोवृषध्वजं ॥तस्मिन्लिंगेभवान्देवनित्यंभवितुमर्हसि ॥३२॥ सांनिध्यमेवते
देववरमेतद्वृणोम्यहं ॥ यदिप्रसन्नोभगवानूतन्मत्यंदातुमर्हसि ॥३३॥ तच्छ्रुत्वावचनंतस्यदेवदेवउमापतिः॥तथास्त्वितिवरंदत्वासा
न्निध्यमकरोत्प्रभुः॥ ३४॥ तस्मिन्मणिमयेलिंगेरमतेचमहेश्वरः॥ तन्मत्यमददाद्विप्रपिताप्रीतेनचेतसा ॥३५॥ उक्तंचददता
तेन इदंक्षत्रामहात्मना ॥स्कनादोनामवैविप्रोयदायातिगृहंतव ॥ ३६॥ तदासंमान्यदातव्यमिदंमणिमयंशिवं ॥ यावन्नयाचतेलिं
गंतावन्नुभ्यंमहामते ॥३७॥ससिद्धिंदास्यतिविभोगृहीत्वालिंगमुत्तमं ॥ एवमुक्तंकश्यपेनपित्राममहात्मना ॥ ३८॥ तस्माद्गृहाण
विप्रेंद्रप्रसादस्कमुखोभव ॥ सूतउवा०॥ ततःस्कनादोभगवान्कश्यपस्यात्मसंभवात् ॥ ३९॥ तद्गृहीत्वामहालिंगंदिव्यंमणिमयंशृंगं॥
प्रीतःप्रसन्नमनसाअहीश्वरमभाषत ॥ ४०॥ वरंब्रूहिमहाभाग मनसायद्यदिच्छसि॥ दातास्मतेनागराजयद्यपिस्यात्सुदुर्लभं
॥४१॥ ततःप्रणम्यतंनागइदंवचनमब्रवीत्॥ वरंज्ञानंपरांसिद्धिंपरमार्थंचसत्तम ॥ ४२॥ इच्छामित्वत्प्रसादेनतन्मत्यंदातुम
र्हसि ॥ तच्छ्रुत्वास्कनादोवैनागराजमभाषत ॥ ४३॥ याचितंयत्त्वयानागतत्सर्वंतेभविष्यति॥ इत्युक्त्वातंस्कनादोपियथो
स्थेरगतिर्हृजुः॥ ४४॥ स्कतलान्निर्गतःसोथगोकर्णंसमुपागमत्॥ आगत्यतत्रविप्रेंद्रः कृत्वाश्रमपदंशुभं॥ ४५॥ आराधया
मासयिमोलिंगंतदमृतोद्भवं॥ आराध्यसुचिरंकालं तपसामहतानृप॥ ४६॥ प्रत्यक्षीकृत्यलोकानांमीशानंप्रत्यभाषत ॥

फलंनलभतेदेविनात्रकार्याविचारणा ॥२१॥ स्वर्गापवर्गफलदाभक्तिरेवशुभानने ॥ देवीकुतूहलेनाथत्वयैतच्छंकरंमुदा ॥ २२॥ तन्मे
शंसजगन्नाथमोक्षंगच्छंतियेप्रभो ॥ ततस्तामब्रवीद्देवोदृश्यतामितिसादरं ॥ २३॥ वृषोभूत्वामहादेवोगौरीमिदमुवाचह ॥ भवत्वंकपि
लादेवीएहिभूमिंशुभानने ॥२४॥ इत्युक्त्वातौनृपश्रेष्ठमिथुनंकर्दमांभसि ॥ अर्धमग्नमभूद्राजन्मार्गेतेषांनृपोत्तम ॥ २५॥ तंदेश
मगमत्कश्चित्पुरुकुत्सइतिद्विजः॥ सार्धंजनैर्बहुविधैर्मिथुनंतद्ददर्शह ॥२६॥ दृष्वातत्साहतान्विप्रः कृपयातिपरिप्लुतः ॥ इदंगोमि
थुनंमग्नंपंकेमहतिपश्यत ॥ २७॥ उत्सृज्येदंवयंसर्वेपश्चाद्यास्यामहेजनाः ॥ गतायथेच्छंराजेंद्र कालातिक्रमशंकया॥ २८॥ गता
स्तेराजशार्दूल पुरुकुत्संविनाचवै ॥ पुरुकुत्सोपिमतिमान्कर्दमंतंवियेशह ॥ प्रविष्योद्धर्तुकामस्तन्महद्यत्नंसमारभत् ॥ शक्तेनतस्मा
द्राजेंद्र यत्नेवानपिसद्विजः॥ ३०॥ उद्धर्तुंचलितुंवापितातोदुःखमुपागमत् ॥ तस्मिन्तथावर्तमानेआत्रेयोनामवैद्विजः॥ ३१॥ सार्थे
नमहतासार्धंततस्तंदेशमागमत् ॥ तंदृष्वापुरुकुत्सस्तु आहूयेदमभाषत ॥ ३२॥ इदंगोमिथुनंलग्नंपंकेमहतिपश्यत ॥ इदमु
त्सृज्यवेगेन यास्यामः सहितावयं ॥ ३३॥ आत्रेयस्तुतथेत्युक्त्वात्यन्येनेच्छंतितद्वचः॥ यथेच्छंवैगतास्तेहि आत्रेयः प्रविवेशह ॥
ततस्तौद्विजशार्दूलौयत्नवंतौबभूवतुः॥ अशक्नुवंतौराजेंद्र ततोदुःखमुपागतौ ॥३५॥ ततःपुनरमेयात्मा सुहोत्रोनामवैद्विजः॥ ध
र्मज्ञशीलवान्राजन्स्तंदेशमुपागमत् ॥ ३६॥ महत्यात्वरयायुक्तोद्रष्टुंत्रस्तंविभावसुं ॥ सैहिकेयेनभद्रंते राक्षसेनराजसत्तम ॥३७
रंदैः परिवृतःसोथ ददर्शमहदद्भुतं ॥ पंकलग्नंगोमिथुनं तदुद्धारोद्विजोत्तमो ॥ ३८॥ कृपयापरयाविष्टस्तस्मिन्नेवपपातह ॥ सुहो
त्रः पुरुकुत्सश्चआत्रेयश्चमहायशाः॥ ३९॥ तेवैगोमिथुनंतस्मादुत्सृज्यनृपपुंगव ॥ अपंकेदेशमानीयविससर्जुर्द्विजोत्तमाः॥४०॥

दंभरतर्षभ ॥ ९ ॥ अग्नेः प्रसादाल्लब्धंतुरम्यंकामगमंपुरा ॥ वायुवेगंमहासत्वंवायोस्तुल्यबलंमहत् ॥ १० ॥ तेनाश्वेनागतोराजाजं
बूद्वीपंप्रतिप्रभो ॥ वर्षाण्यस्मिन्नवविभोजंबुद्वीपेकुरूद्वह ॥ ११ ॥ विहायतानिवर्षाणिभारतंखंडमागमत् ॥ कर्मभूमिरियंराजन्तदन्या
भोगभूःस्मृता ॥ १२ ॥ श्रेष्ठंतत्रापिगोकर्णइतिमत्वातदागमत् ॥ ज्ञातश्रृंगगिरिंप्राप्यदेवगंधर्वसेवितं ॥ १३ ॥ पितामहानांराजेंद्रतत्रदृ
ष्ट्वाश्रमंशुभं ॥ चतुर्णामात्मनश्चैवतत्रदृष्ट्वापितामहान् ॥ १४ ॥ अग्नियुतिंचाग्निबाहुंमेधाश्वंचतथापुरुं ॥ अवरुह्यहयात्तूर्णंववंदे
स्वपितामहान् ॥ प्रियव्रतस्यपुत्रास्तेअशोकस्यापितामहाः ॥ मुक्तिकामास्तपस्यंतोभ्रातरस्तेनृपोत्तम ॥ १६ ॥ दृष्ट्वातेभ्रातरःपौत्र
मात्मीभिरभिनंदितं ॥ तैःपूजितःसराजर्षिःसवृत्तांतंन्यवेदयत् ॥ १७ ॥ तच्छ्रुत्वातेकृपाविष्टाः पौत्रस्यवचनंतदा ॥ तमूचुस्तपसापुत्र
आराधयमहेश्वरं ॥ १८ ॥ अत्रस्थत्वंनृपश्रेष्ठसतेशोकंप्रहास्यति ॥ व्रतैर्बहुविधैराजन्रुद्रोक्तैःसर्वकामदैः ॥ १९ ॥ सतेमनोरथंराजन्
प्रदास्यतिनसंशयः ॥ अस्माकंतपसापुत्रक्षिप्रंद्रक्ष्यसिशंकरं ॥ २० ॥ सूतउ० ॥ अशोकस्तुकृतथेत्युक्त्वा कृत्वाश्रमपदंशुभं ॥ व्रतोप
वासनियतोयथोक्तंचपितामहैः ॥ २१ ॥ तथाचकारसतपःशिवध्यानपरायणः ॥ ततोदशवर्षाणितैःसार्धंपृथिवीपतिः ॥ २२ ॥ त
पोग्निनादह्यमानःशिवमाराधयत्परं ॥ तुतोषतपसातस्यतेषांचापेक्षयाहरः ॥ २३ ॥ प्रत्यक्षमगमत्तेषांसान्निध्येतस्यपार्थिव ॥
तेदृष्ट्वादेवदेवेशंशूलपाणिमुमापतिं ॥ २४ ॥ द्वादशादित्यसंकाशंज्वलंततेजसाविभुं ॥ शिरोभिरवनिंगत्वा प्रणेमुस्तेमहर्षयः ॥ २५
शरणंभवदेवेशेत्वाअशोकस्यतिसत्तम ॥ ततस्तेषांवचःश्रुत्वाताना ह्भगवान्शिवः ॥ २६ ॥ वरंब्रूतमहाभागास्तद्दाम्यविलंबि
तं ॥ इत्युक्तेशूलिनाराजाप्रणम्येनंवचोब्रवीत् ॥ २७ ॥ अशोकइतिमेनामप्रथितंवृषभध्वज ॥ पुत्रैःपौत्रैःपरिवृतोदौहित्रैरपिशंकर

॥२८॥ मोदमानः स्थितोराज्येदुःखानामविशारदः॥ मृतास्तेद्यमहादेवहृतंराज्यंपरैर्मम ॥२९॥ स्फीतंसर्वधनंदेवविहायैकास्त्रिलोचन॥
शोकेनमहतादेवआविष्टःपार्वतीपते ॥ ३०॥ इहागतोस्मिदेवेशत्वामहंशरणंगतः॥ पितामहैर्ममविभो संगत्यसुरसत्तम॥ ३१॥ तेषामे
वप्रभावेणत्वामहंदृष्टवानज॥ अतःपरंममविभोयत्कृत्यंतत्प्रयच्छनः॥ ३२॥ ततस्तमाहराजानंशंकरःप्रणयादिदं॥जीवंतुसुहृदस्तेवैये
मृतानृपतेयुधि॥३३॥ मत्प्रसादादरीन्सर्वान्त्वंजेष्यसिनसंशयः॥ शोकोनभवितातात अद्यप्रभृतिसुव्रत॥ ३४॥ प्रसादान्ममग
जेंद्रसिद्धिर्भवतुशाश्वती॥ आश्रमंतवराजेंद्रलोकेख्यातंगमिष्यति ॥३५॥ तीर्थंचतवनाम्नेदंख्यातंभवतुपार्थिव॥ पूर्वेषांतवराजें
द्रआश्रमाणिमहांतिच॥३६॥ तीर्थानितेषांराजेंद्रनन्तसंज्ञाभिरप्युत॥ भवंतुमत्प्रसादेनसर्वपापहराणिवै॥ ३७॥ वैशाखेवैशाखवा
यामेषुस्नात्वानरोत्तमाः॥ अशोकेशंपूजयंतिगंधपुष्पाक्षतादिभिः॥ ३८॥मत्प्रसादेनतेशोकंसप्तजन्मनिनाप्नुयुः॥ सप्तजन्मकृ
तात्पापात्स्नात्वाशुध्यंतितेनराः॥ ३९॥ गच्छत्वंपालयावन्मोराज्यंनिहतकंटकं॥ पुत्रैःपौत्रैःपरिवृतोदौहित्रैर्ज्ञातिबांधवैः॥४०॥ सहि
तःसर्वभूतेस्त्वंचिरंपालयमेदिनीं॥ इतिदत्वावरंशंभुरशोकायनृपोत्तम॥ ४१॥ अनुमान्यचराजर्षीन्तत्रैवांतरधीयत॥ अग्नि
र्युतेस्तथातीर्थमग्निवाहोस्तथैवच॥ अशोकतीर्थमन्यच्च सर्वशोकविनाशनं॥ अशोकपंचकमिति सर्वलोकेषुविश्रुतं॥ ४२॥
अशोकपंचकेस्नात्वा अशोकेशंसमर्चयेत्॥ सर्वेषामेवदुःखानांध्वंसोभवतिनिश्चयात्॥ ४४॥ अशोकेशस्यमाहात्म्ययेशृण्व
तिनराभुवि॥ तेषांनृपसुखध्वंसोजायतेनकदाचन॥ ४५॥ ॥ इत्यादि० गोकर्ण० अध्यायः॥ ॥ सूतउवाच॥ तस्मा
दाग्नेयदिग्भागेक्रोशमध्येतिनिम्नगा॥ कामाघनाशिनीनामा सर्वपापहराशुभा॥१॥ तस्यांस्नात्वापुराकामोगोकर्णक्षेत्रमागमत्

हरेकृतमहद्रोहाद्विमुक्तोमन्मथोनृप ॥ २ ॥ शौनकउवाच ॥ ईश्वरेतुकथंद्रोहोमन्मथेनकृतोविभो ॥ कामाघनाशिनीनाम्नीकथंख्यातानदी
रुग्मा ॥ ३ ॥ कथंस्नानंसमकरोत्कथंक्षेत्रंगतःप्रभो ॥ सूतउ० ॥ शृणुशौनकवक्ष्यामियत्पृष्टोहंत्वयानघ ॥ हरकोपाग्निनादग्धः पूर्वकामः
रुचान्वितः ॥ ४ ॥ शिवेनस्तुत्वाघशांत्यैत्रिःपरीत्यधरामिमां ॥ क्षेत्रस्थास्यप्रवेशेतुत्यक्तूर्होपिमनोभवः ॥ ५ ॥ तस्मात्क्षेत्राद्बहिःस्थित्वातप
स्तीव्रमतप्यत ॥ दिव्यवर्षसहस्रंतु लिंगंकृत्वाविधानतः ॥ ६ ॥ पूजयामासमदनोशिवध्यानपरायणः ॥ ततस्तुष्टोमहादेवः प्रत्यक्षमगमत्तदा
॥ ७ ॥ दृक्षानेत्रपथेशंभुंहर्षोत्कर्षसमन्वितः ॥ तुष्टावबाष्पनिरुद्धाभिः कृतांजलिपुटःस्थितः ॥ ८ ॥ नमःशिवायशुद्धाय शांताय हरयेनमः
शंकरायशरण्यायत्रिनेत्रायनमोनमः ॥ ९ ॥ सृष्टिस्थितिविनाशानांहेतवेपरमात्मने ॥ देवदेवनमस्तेस्तुपशूनांपतयेनमः ॥ १० ॥ देवा
नांविघ्ननात्पूर्वंत्वयिद्रोहमकारिषं ॥ तद्दोषशांतिर्मभूयाद्धरीरंचवृणेप्रभो ॥ ११ ॥ क्षेत्रस्यांतःप्रवेशंचस्थितिंपूज्यांचतत्रमे ॥ त्वत्पादांबु
जभक्तिंचत्वद्भक्तानांचसंगमं ॥ १२ ॥ तच्छ्रुत्वावचनंशंभुःप्रीत्याहमकरध्वजं ॥ वसुदेवगृहेसाक्षाद्भगवान्कमलापतिः ॥ १३ ॥ यदावत
रणंकुर्यात्तस्यपुत्रत्वमाप्नुहि ॥ गोकर्णांतःप्रवेशार्हं प्रायश्चित्तंकरोम्यहं ॥ १४ ॥ इत्युक्त्वाभगवान्छंभुः स्वकरस्थरुजातदा ॥ खानिते
भूतलेगंगापातालादूर्ध्वमागता ॥ १५ ॥ उवाचचपुनःकामंशंकरोवृषवाहनः ॥ नमःरुद्रायशांताय हरयेपरमात्मने ॥ सृष्टि-
स्थितिविनाशानांकारणायनमोनमः ॥ इममंत्रंसमुच्चार्यस्नात्वाकामाघनाशिनीं ॥ अस्मद्द्रोहाद्भवात्पापान्तत्क्षणान्मुच्यतेनरः ॥ १९१
॥ तस्मात्स्नानंकुरुष्वात्रसर्वपापाद्विमुच्यसे ॥ १९ ॥ श्रुत्वेत्थंवचनंशंभोः स्नानंकृत्वायथाविधि ॥ निर्मलः शांतहृदयः शिव
भक्तिसमन्वितः ॥ १९ ॥ तत्क्षणाद्भवत्कामः शिवस्तुतिपरायणः ॥ हरशंभोमहादेवविश्वेशामरवल्लभ ॥ शिवशंकरसर्वेशभक्त

सनारद उ० ॥ त्वयमिछामिरे वेशात्वय्येवेत्यब्रवीद्वचः ॥ ततोमहेश्वरस्तस्मेददौसायुज्यमात्मनि ॥ ४७ ॥ ततः सनादो भगवान्स्वयमेवशिवोभवत् ॥ नादेश्वरामितिख्यातंताक्ष्यंपार्थिवोत्तम ॥ ४८ ॥ अधस्तादवनेराजन्निदानीतत्र वर्तते ॥ ताक्ष्यमानेपदातत्र नादयत्यवनीतलं ॥ ४९ ॥ असिद्धास्तंनपश्यंति सिद्धाःपश्यंतितंनृप ॥ तीर्थंचतत्रतस्यैव नादतीर्थमितिश्रुतं ॥ ५० ॥ अस्ति पुण्यप्रदंराजन्सर्वकामप्रदंनृणां ॥ कार्तिकेरुद्रकूपक्षेतु एकादश्यांनृपोत्तम ॥ ५१ ॥ तत्रस्नात्वाश्वमेधस्यफलंविंदतिमानवः ॥ आजन्मचरितंपापंतत्रस्नानाद्विनश्यति ॥ ५२ ॥ दृष्टमात्रेणताक्ष्यंस्वर्गंगछंतिदेहिनः ॥ विधूयसर्वपापानि ब्रह्महत्यादिकान्यपि ॥ नावकाशमभूत्तस्मिंदेवानामवनीपते ॥ ५४ ॥ सिंचंत्यदेवैर्मुनिभिर्गोपितंतदभूद्भुवि ॥ तदेतत्कोटितीर्थात्तु उदीच्यांदिशिविद्यते ॥ ५५ ॥ ॥ इत्यादि० गोकर्णमाहात्म्ये० अध्यायः ॥ ॥ सूतउवाच ॥ अतःपरमशोकस्यतीर्थंशृणुकुरूद्वह ॥ अशोकोनामराजर्षिः लक्षद्वीपाधिपःपुरा ॥ १ ॥ पौत्रोमेधातिथेश्चैव पुत्रःपारावतस्यच ॥ तस्यचासीत्पुत्रशतमशोकस्यमहात्मनः ॥ २ ॥ तेषामपिमहावीर्या पुत्रपौत्रादिसंततिः ॥ कन्याशतंचतस्यासीदशोकस्यमहात्मनः ॥ ३ ॥ तेषांपुत्रैश्चपौत्रैश्चदेशाः सर्वेपिपूर्यत ॥ सतैः सर्वैःपरिवृतोबुभुजेविषयान्प्रियान् ॥ ४ ॥ रंजनात्सर्वलोकानांराजासीत्पृथिवीपतिः ॥ अक्षोहिण्योनृपस्यासन्बह्वश्वरथयोधिनः ॥ ५ ॥ ततस्तस्मादशगुणः क्रमतिर्नामपार्थिवः ॥ अशोकस्यपुरींरुध्वा तेनराज्ञामहत्तरं ॥ ६ ॥ युद्धंचकारसुचिरमशोकेनमहात्मना ॥ अहिंसयित्वान्नृपतिमशोकंपार्थिवोत्तमं ॥ ७ ॥ सेनांविदारयामासपुत्रपौत्रादिभिःसह ॥ ततःसंत्यज्यसर्वाणिवस्तूनिसन्नृपोत्तमः ॥ ८ ॥ मशोकः स्वपुरींराज्यंविहायैकोमहामनाः ॥ अश्वरत्नंसमारुह्य विवृ

उपयेमेभरद्वाजतनयांवरवर्णिनीं ॥तस्यांवैश्रवणोनामपुत्रोविश्रवसोत्वभूत्॥३८॥सचिरायतपस्तेपेब्रह्माणंप्रतिभारत ॥तस्मा
त्तमानमैश्वर्यं विमानंपुष्पकाभिधं॥३९॥लब्ध्वालंकामधिमध्येनिवासायपुरीमपि ॥लोकपालत्वमदादात्तस्यतुष्टःपितामहः॥४०
धूनानामीश्वरत्वंचअमरत्वंचदत्तवान्॥सुमालीराक्षसेंद्रोथदृष्ट्वावैश्रवणंनृप॥४१॥तत्संपदर्थीमतिमान्स्वसृतामिदमब्रवीत्॥
पुत्रिकेकेशिभद्रंतेकुबेरोविश्रवःसुतः॥४२॥अस्मल्लंकापुरींलब्ध्वा महदैश्वर्यवान्नूरवलु॥त्वंहिविश्रवसंपुत्रिपतित्वेवरयाधुना
॥४३॥तवापितादृशःपुत्रोभविष्यतिनसंशयः॥सातथेतिप्रतिज्ञायगतावैश्रवसोंतिकं॥४४॥तांदृष्ट्वाविश्रवाराजन्समपृ
च्छन्महातपाः॥कासिभद्रेकुतश्चासिकिमर्थंचागतावनं॥४५॥सातमाहानवद्यांगीराक्षसेंद्रसुतास्म्यहं॥पित्रासुमालिनाविप्र
प्रेषितात्वामिहागता॥४६॥कन्याहंकेकसीनामनोषंत्वंतातुमर्हसि॥ततोमुनिर्ज्ञानदृष्ट्याज्ञात्वातस्यामनोगतं॥४७॥विश्रवा
स्तामुवाचेदंपुत्रकामासिभामिनी॥अतीवदारुणेकाले यस्मान्मांप्रत्युपागता॥४८॥तस्मात्क्रूराभविष्यंतिपुत्रास्तवसुभानने॥
ततःकनीयान्धर्मज्ञःपुत्रोवंशाकरोभवेत्॥४९॥ततस्तेनैवमुक्ताचास्थिताभर्तृसमीपतः॥तस्यांसभूत्क्रूरकर्माराक्षसोतीवदारुणः
॥५०॥दशास्योविंशतिभुजोनीलांजनचयोपमः॥ततश्चकुंभकर्णोभून्महाकायोमहाबलः॥५१॥ततःशूर्पणखाजज्ञेदारुणा
तीवभीषणा॥ततोविभीषणोजज्ञेसाक्षाद्धर्मइवापरः॥५२॥एवंतेराक्षसाराजन्बभूवुरावणादयः॥गोकर्णंक्षेत्रमासाद्यतपस्ते
पुर्महाबलाः॥५३॥शिरांसिस्वानिविछिद्यजुहावदशकंधरः॥कुंभकर्णोपिराजेंद्रधर्मबुद्धिर्विभीषणः॥५४॥तेषांतपः प्रभा १९२
वेणब्रह्माप्रत्यक्षतांगतः॥ ददौतेषावरंब्रह्मायथाभिलषितंनृप ॥५५॥ अणिमादिमहासिद्धिमायुर्योगंचरावणः॥ अ
वध्यत्वंसर्वभूतेभ्यःतेमानुषजातितः॥५६॥कुंभकर्णोमहानिद्रांवव्रेपापमतिस्तथा॥विभीषणोपिधर्मात्मावव्रेधर्ममतिंनृप ५७

अमरत्वंविष्णुभक्तिंलब्धवान्साविभीषणः॥ इतिदत्वावरंब्रह्मातत्रैवांतरधीयत ॥ ५८॥ सूतउ०॥ रावणेशादिलिंगानि सर्व
सिद्धिकराणिभो॥ येपूजयंतिमनुजादीर्घायुष्याभवंतिते ॥ ५९॥ गोकर्णेतदूनंश्लेष्मसर्वसिद्धिनिषेवितं॥ अत्रश्लेष्मातकेसि
द्धान्निबोधकुरुनंदन ॥ ६०॥ हेतिर्नाममहारक्षःप्रहेतिश्चमहारथः॥ विद्युत्केशांबरीषश्चपुलस्त्योविश्रवामुनिः॥ ६१॥ राजराजश्च
यक्षेंद्रोविश्वश्चिनिर्ऋडूरतः॥ एतेचान्येचबहवस्तत्रसिद्धिमुपागताः॥६२॥ सूतउ०॥ एवंलब्धावरंरक्षोऐश्वर्यबलदर्पितः॥ रा
वणोमातृवाक्येनबंधुदैत्यसमन्वितः॥ ६३॥ ससंगरेवैश्रवणंविजित्यसहसैनिकं॥ अपहृत्यपुरींलंकांविमानमपिपुष्पकं॥ ६४॥
लंकायांवसतिंकृत्वाबुभुजेविषयान्प्रियान्॥ निर्यासितोवैश्रवणोरावणेनदुरात्मना ॥६५॥ गोकर्णेतुतपस्यंतंपितरंचागमत्ततः
प्रणम्यपितरंसर्वंकृतंयत्तेनरक्षसा॥ ६६॥ न्यवेदयदमेयात्मातततंप्राहविश्रवाः॥ गोकर्णेव्रततपस्तप्त्वा प्रत्यक्षीकुरुशंकरं॥ ६७
सदृढातितवाभीष्टंनात्रकार्याविचारणा॥ इतिश्रुत्वापितुर्वाक्यंलिंगंस्थाप्याविधानतः॥ ६८॥ तपस्तप्त्वातुरुचिरंप्रत्यक्षीकृतशंकरं॥
अष्टौनिधीन्महापद्मप्रमुखांमहतीश्रियं॥ ६९॥ आसाद्यचाधिकैलासंविभांतीमलकांपुरीं॥ उदक्कुबेरईशित्वंशिवकांचमनोहरां ७०
प्राप्यवैश्रवणोराजन्नलकाख्यांमहापुरीं॥ संप्राप्यमोदमानस्तुतत्रोवासयथासुखं॥७१॥ सूतउ०॥ तीर्थंवैश्रवणंनामसर्व
पापविनाशनं॥ राजाधिराजमंत्रेणस्नात्वातीर्थेचतस्यवै॥७२॥ कुबेरेशांपूजयित्वासर्वैश्वर्यैसविंदति ॥ ॥ इत्यादि०गो
कर्ण० अध्यायः॥ ॥ ज्ञातानीकउवाच॥ वैनायकस्यतीर्थस्यसंभवंवक्तुमर्हसि॥ विनायकः किमकरोदेतन्मेविस्तराद्व
द॥१॥ सूतउ०॥ शृणुराजन्प्रवक्ष्यामितीर्थंवैनायकंमहत्॥ गिरेःकलकलाख्यस्यआग्नेय्यांदिशिविद्यते॥ वैनायकाश्रमंनाम
सर्वसिद्धनिषेवितं॥ तत्केतकीवनमितिप्रवदंतिविपश्चितः॥ ३॥ पुरातुकेतकीयत्रपरांसिद्धिमुपागता॥ तत्रतप्त्वागजास्यस्तु

परांसिद्धिमुपागमत् ॥ ४ ॥ सूत उ० ॥ कदाचित्पार्वतीं वीक्ष्य माणस्य परमेशितुः ॥ उद्गच्छन्महातेजो ललाटे नृपसत्तम ॥ ५ ॥ सद्यः शिवाकृतिः सोथ कुमारः समजायत ॥ दीपाद्दीपांतरमिव सर्वलोकमनोहरः ॥ ६ ॥ तमादायात्मनेत्रोत्थं कुमारं परमेश्वरः ॥ गाढमालिंग्यतं शंभुर्गौर्याहस्ते ददौ तदा ॥ ७ ॥ तं दृष्ट्वा देवताः सर्वा हृष्टा आसन् शिवात्मजं ॥ विनायकाख्यांगमितो विजहार यथा सुखं ॥ ८ ॥ एकदा पार्वती दृष्ट्वा गजास्यं तनयं स्वकं ॥ स्वभर्तारं शंकरं इति त्यमन्यत गिरेः सुता ॥ ९ ॥ ततस्तमात्मजं ज्ञात्वा कुपिता पार्वती तदा ॥ अशापीत्तनयं देवी विकारांगो भवेति ॥ १० ॥ गजाननो दशभुजः खर्वपाणिपदांबुजः ॥ लंबोदरः शूर्पकर्णः सो भून्मानुष्यशापतः ॥ ११ ॥ ततो दृष्टः शिवेनासौ दृष्टः कइति पार्वतीं ॥ विनायकस्तवमकृत इति शर्वजगाद सा ॥ १२ ॥ तच्छ्रुत्वाह प्रियां शंभुर्नोचितं कृतवत्यसि ॥ ततो विनायकं शंभुर्मूर्ध्न्युपाघ्राय चाब्रवीत् ॥ १३ ॥ गजास्यशृणुभद्रं ते मातरं प्रति मा कुधः ॥ मातृशापात्तुवैरूप्यं तव प्राप्तं गजानन ॥ १४ ॥ इदमेवयथाभूयात्पुनः सौरूप्यमात्मनः ॥ गोकर्णमामकं क्षेत्रं याहि सिद्धर्षिसेवितं ॥ १५ ॥ रुद्रयोनेरुत्तरस्यां क्रोशार्धे संस्थितं शुभं ॥ केतक्याः सिद्धिदं रम्यं केतक्याश्रममुत्तमं ॥ १६ ॥ तत्रास्थितस्त्वंतनयतपो घोरं समाचर ॥ इतिपित्रोदितंश्रुत्वातथास्तिति गजाननः ॥ १७ ॥ ततोगोकर्णमगमत्क्षेत्रं सिद्धर्षिसेवितं ॥ तत्राश्रमपदंकृत्वाभुभुजे केतकीवने १८ निश्चलेनैवमनसातपस्तेपेसुदुश्चरं ॥ ततः कालेषुगच्छत्सु कदाचित्परमेश्वरः ॥ १९ ॥ ब्रह्मविष्ण्वादिकैर्देवैः पार्वत्याप्रमथैः सह ॥ आविर्बभूवपुरतोगजास्यस्य नृपोत्तम ॥ २० ॥ प्रसन्नंपितरंज्ञात्वा आगतंत्रिदशैः सह ॥ कृतांजलिस्तदाराजन्प्रणाना

वत्सलपाहिमां॥ इतिस्तुत्वाहरंभक्त्यावरमन्यमयाचत ॥ २१॥ लिंगमेतत्पूजकानांकामदंभवतुप्रभो ॥ कामेश्वराभिधानेन
सर्वासिद्धिप्रदोस्तुवे ॥ २२॥ अघनाशाननाम्नीयंनदीनांप्रवराभवेत्॥ चैत्रमासि सितेपक्षेत्रयोदश्यांतुयोनरः॥ २३॥स्नात्वात्र
पूज्यकामेशं सर्वान्कामानवाप्नुयात्॥ इतिकामेरितंश्रुत्वाशंकरःप्रत्यभाषत॥ २४॥यदुक्तंभवतासर्वंतद्भवेन्नभ्रमथाधुना॥ब्रह्म
हायुरुतल्पीचस्वर्णस्तेयीचमानवः॥ २५॥ सुरापानरतोवापिसंयुक्तोप्युपपातकैः॥ स्नात्वात्रपूज्यकामेशं सर्वान्कामानवाप्नुयात्॥
२६॥ सर्वपापविनिर्मुक्तोयात्राहेः सभवेद्ध्रुवं॥ गोकर्णस्यद्विजश्रेष्ठकिमुसन्मार्गवर्तिनः॥ २७॥इतिदत्वावरान्छंभुर्मन्मथं पुनरब्रवीत्॥ मयासार्कंप्रविशाभोगोकर्णमामकंस्मर॥ २८॥श्रुत्वेत्थंदेवदेवेनसाकमायात्तुमन्मथः॥ क्षेत्रंप्रविश्यगोकर्णंदृष्ट्वासर्वांशिवात्मकं॥ २९॥ कोटितीर्थस्यसविधेकिंचिद्दूरिहरालयात्॥ उदीच्यांदिशिकामस्तुस्थलाश्रमपदंशुभं॥ ३०॥ लिंगंतत्रप्रतिष्ठाप्य
पूजयित्वामहेश्वरं॥ सिद्धिंप्राप्यहरात्तत्रकृतकृत्योभवत्तदा॥ ३१॥ कामेश्वराभिधंलिंगं दर्शनात्पूजनादपि॥ सर्वकामप्रदंराजन्
सर्वापद्विनिमोचनं॥ ३२॥ सूतउ०॥ श्लेष्मातकमितिस्थेख्यातं वनंसिद्धनिषेवितं॥ दक्षिणस्यांतुराजेंद्ररुद्रयोन्यास्थितंशुभं॥ ३३॥ पौलस्त्यास्तत्रतस्थावै बहवःसिद्धिमागताः॥ तत्रस्थोरावणोराजन्परांसिद्धिमुपागतः॥ ३४॥ तन्माहात्म्यंवदाम्यद्यशृणुष्वनृपसत्तम॥ पुरापुलस्त्यनामाभूद्ब्रह्मणोमानसःसुतः॥ ३५॥ तृणबिंदूभिधानस्यराजर्षेःकस्यचित्सुतां॥ उपयेमेविधानेनमुनिस्तांवरवर्णिनीं॥ ३६॥ तस्यांविश्रवसंनामतनयंसोभ्यजीजनत्॥ सविश्रवास्तपोनिष्ठोगुणैःसर्वैःपितुःसमः॥ ३७

एतस्मिन्नंतरेकाले मध्येत्याविरभूत्तयोः॥ सहस्रादित्यसदृशंलिंगंत्याद्यंतवर्जितं॥ ४०॥ ततःशंभुरगात्तत्रविविष्णुंविलोक्य
च॥ शिवोत्यूवाचवचनंमाभूद्वांकलहोमिथः॥ ४१॥ अस्यलिंगस्यमूर्धानंपादंवायोभिपश्यति॥ सश्रेष्ठइतिमन्येहंगच्छतंशीघ्र
मेवहि॥ ४२॥ तथास्त्वितिशिवेनोक्तमंगीकृत्यस्मरारिभो॥ हंसोभूत्वाविधिरगाच्छिरोद्रष्टुंविहायसं॥४३॥विष्णुर्वराहरूपोधः
पादंद्रष्टुमगान्नृप॥ गच्छन्नूर्ध्वमुखोब्रह्माद्रष्टुंलिंगस्यवैशिरः॥ ४४॥ अत्यगात्क्रमहान्कालस्ततोदृष्वातुकेतकीं॥ लिंगोत्तमां
गेविधृतांस्रगंधांस्रमनोहरां॥ ४५॥ दिदृक्षोःप्रकाशायंतींतांदृष्वाप्रोवाचपद्मभूः॥ ब्रूहिमेलंयथार्थेनकुतआयासिकेतकि॥ ४६॥
विष्णुनाहंपणंकृत्वालिंगांतंद्रष्टुमागतः॥ बकुकालोगतोमेद्यगच्छतश्चोर्ध्ववर्त्मनि॥ ४७॥ उत्तमांगंनपश्यामिलिंगस्यास्यस्रुभा
नने॥ यदिजानासिमेब्रूहिशिरोलिंगस्यकेतकि॥ ४८॥ केतकीनमुवाचेदंमांमहेश्वरमस्तकात्॥ आगतांविद्धिदेवेशबकु
कालोत्यगान्मम॥ ४९॥ इदानींतस्यपादंतुनपश्येयंचतुर्मुख॥ केतक्यावचनंश्रुत्वातांप्रत्याहविधिःपुनः॥ ५०॥ दृष्टोमूर्धाब्र
ह्मणोतित्वयावाच्यंस्रुतेकि॥ साहाय्यंकुरुमेत्वंहिदास्येहंतववांछितं॥ ५१॥ तथास्वितितयाप्रोक्तेसार्धंब्रह्मात्यधोविश
तू॥ विष्णुःकूर्मावधिगतोत्यदृष्वामूलमागमत्॥ ५२॥ तावागतोसमालोक्यविधिविष्णूमहेश्वरः॥ तावपृच्छत्तदाभूलीभ
वद्भ्यांकिमुचास्यवै॥ ५३॥ लिंगस्यादिस्तथाचांतंदृष्टंब्रूतममाग्रतः॥ ततोब्रह्माप्युवाचेदंशिरोदृष्टंमयेतिवै॥ ५४॥ साक्षिणी
केतकीतत्रकेतक्यपितथाब्रवीत्॥ तदाविष्णुरुवाचेदंनान्यतंवक्तुमुत्सहे॥ ५५॥ मयानदृष्टोपादोतु लिंगस्यास्यमहेश्वर॥

शिवोब्रह्मवचःश्रुत्वात्मनंतंकोपमीयिवान् ॥ ५६॥ अशपत्केतकींशंभुरयोग्याभवमेवने ॥ यतोवादीःकूटसाक्ष्यमद्यप्रभृतिकेतकि
॥५७॥ततोशपद्विधिंराजन्नपूज्योभवविष्टपे॥ ततस्तुत्पादयामासकोपेनोत्कटभैरवं॥५८॥ तमुवाचमहादेवःस्रष्टुरूर्ध्वशिरोहन ॥त
च्छ्रुत्वाभैरवःशीघ्रंरवङ्गेनकशिरोहरत् ॥ ५९॥ सब्रह्महत्यायस्तःसन्बभ्रामजगतीतलं ॥ततःशंभुःप्रसन्नात्माविष्णुंप्राह हरेत्वया॥६०
सत्यमुक्तंहरेयस्माल्लोकेपूज्यःसदाभव ॥ततस्त्वदर्शनंयातौशिवविष्णूनृपोनम ॥६१॥ केतकीचविधश्चापिविषण्णवदनोततः॥
गोकर्णक्षेत्रमासाद्यशतश्रृंगोत्तरेतटे ॥६२॥ तीर्थंकृत्वातुविमलंस्थाप्यतुपर्वते ॥ तपस्तप्त्वातुसुचिरंप्रत्यक्षीकृत्यशंकर ॥ ६३॥
होमकर्मणिसप्रापपूजांब्रह्मापिनाकिनः॥ दिव्यमूर्तिधरस्तत्रउवासचतुराननः॥६४॥ तन्मूर्तिंयेपूजयंतितेषांस्युः सर्वसिद्धयः ॥
गोश्रृंगपर्वताद्राजन्नवाच्यांशरपाततः॥ ६५॥ केतक्यापितपस्तप्त्वाशिवध्यानपरायणा ॥ प्रत्यक्षीकृत्यदेवेशंवव्रेसानृपदोषतः
॥६६॥ परिहारंचशापस्यपूजायास्तस्ययोग्यतां॥ शिवरात्रौपुण्यदिनेस्वयमास्तेयथासुखं ॥ ६७॥ भैरवोपितथाराजन्ब्रह्म
हत्याप्रपीडितः॥ तीर्थयात्राप्रसंगेनबभ्रामजगतीतलं॥ ६८॥शंकरानुज्ञयापश्याद्गोकर्णंप्राप्यसत्वरं॥ तत्राश्रमपदंकृत्वाघं
टाकर्णसमन्वितः॥ ६९॥ तपश्चचारसुचिरंततस्तुष्टोमहेश्वरः॥ उवाचभैरवंप्रीत्यातुष्टोस्मितपसासुत ॥७०॥ वरंवरयभद्रं
तेयद्यपिस्यात्सुदुर्लभं॥ भैरवउ०॥ ब्रह्महत्यात्वियंघोराबाधतेमांदिवानिशं॥ सामांयथानबाधेत तथाकुरुमहेश्वर ॥७१॥
शिवउ०॥ ब्रह्महत्यातवसुत निःशेषंनाशिताभवत्॥ अत्रस्थित्वाभैरवत्वंपातासुकृतिनांभव ॥७२॥ पापिनांशिक्षकश्चैव

लिंगं

इदानीं गच्छ शीघ्रतः ॥ कुरुक्षेत्रंतत्रविष्णुः कपालंतेविमोक्ष्यति ॥ ७३ ॥ घंटाकर्णमहाबाहो मत्तस्तेवांछितंकिमु ॥ घंटाकर्णउ० ॥ अस्मिन्क्षेत्रेमहादेवास्थित्वात्वामेवसेविवुं ॥ ७४ ॥ इच्छामितद्वरस्त्वंवरदोयदिमेप्रभो ॥ ईश्वरउ० ॥ स्थित्वात्रैवमहाबाहो मत्क्षेत्रंप्रतिपालय ॥ ततस्त्वंक्षेत्रपालाख्योलोकेख्यातोभविष्यसि ॥ कुरुक्षेत्रंजगामाशु इतिदत्वावरंतस्मै तत्रैवांतर्दधेहरः ॥ सूतउ० ॥ ततः सभैरवो राजन्कपालेनसमन्वितः ॥ कुरुक्षेत्रंजगामाशु विषण्णवदनोनृप ॥ ७६ ॥ ततः सभैरवंदृष्ट्वासकपालंहरिस्तदा ॥ कपालंतवकिंकार्यंभैरवेणेति चाब्रवीत् ॥ ७७ ॥ तवाज्ञांपूरयाम्यद्यमद्धस्तंयाहिसांप्रतं ॥ इत्युक्त्वाभगवान्विष्णुर्हस्तंप्रोत्सार्यतास्थिवान् ॥ ७८ ॥ यावत्कपालोराजेंद्रसंत्यक्त्वाकालभैरवं ॥ विष्णुहस्तंनयातस्तुतावद्दूरमतोहरिः ॥ ७९ ॥ पपातभूम्यांतत्रैवविष्णुंप्रोवाचदुःखितः ॥ कागतिर्ममदेवेशततस्तंविष्णुरब्रवीत् ॥ ८० ॥ अत्रैवतिष्ठस्थिरंतवाज्ञांपूरयाम्यहं ॥ कुरुपांडवयोर्युद्धे इत्युक्त्वांतर्दधेहरिः ॥ सभैरवोपियत्रोपश्चाद्गोकर्णक्षेत्रमाप्नुवे ॥ घंटाकर्णेनसहितस्तत्रोवासयथासुखं ॥ ८२ ॥ शिक्षकःपापिनांनित्यंरक्षन्सुकृतशीलिनः ॥ सूतउ० ॥ तदाश्रमंपुण्यतमंब्रह्महत्यादिनाशनं ॥ तत्पूजकानांमर्त्यानांसर्वपापक्षयोभवेत् ॥ ८३ ॥ ॥ इत्यादि० गोकर्ण० अध्यायः ॥ ॥ ऋषयऊ० ॥ किंकारणमगस्त्येनपीतोजलनिधिःपुरा ॥ अत्यद्भुतमहंमन्येऋषेस्तस्यतपोबलं ॥ १ ॥ कथंपुनःसमुद्रोवैपूरितोमकरालयः ॥ कथंससगरोराजाअश्वमेधमकारयत् ॥ २ ॥ याजनीयपशुंसोयंकथमापमहामते ॥ शंसैतत्सकलंत्वत्तः श्रोतुमिच्छामहेवयं ॥ ३ ॥ सूतउ० ॥ श्रूयतांद्विजशार्दूलकथापौराणिकीत्वया ॥ कालेयाइतिविख्याता

मगजाननः ॥ २१॥ प्रणमंतंसमुत्थाय शंकरोगणनायकं ॥ उवाचतनयंवाक्यंप्रसन्नोहंस्मरैः सह ॥२२॥ तपसातवसंतुष्टआगतस्त
वसन्निधिं ॥ वरंवृणीष्वभद्रंतेयत्तेमनसिवर्तते ॥ २३॥ विनायकउ०॥ आज्ञयाभवतस्तातं तपस्तप्तंमयाधुना ॥ यत्प्राप्तव्यंभवान्वेदतत्
मह्यंदातुमर्हसि ॥ २४॥ मातृशापविमोक्षंचदेहिमेपरमेश्वर ॥ शिवउ०॥ मातृशापोन्यथानस्यात्तथापि शृणुपुत्रक ॥ २५॥ इदंरूपं
तवस्फुतरमणीयंभविष्यति ॥ लोकेपूज्यतमंभूयान्मत्प्रसादाद्गजानन ॥ २६॥ अत्रागत्यनरोयस्तुपूजयेत्त्वांगजानन ॥ निष्प्रत्यूहानि
कार्याणितस्यसिध्यंतिसर्वदा ॥ २७॥ पूजामकृत्वायःकश्चिद्यात्किंचित्कुरुतेयदि ॥ तस्यतन्नफलेत्कर्मविघ्नानामधिपोभव ॥ २८॥
गणानामधिपश्चैवसंपदामधिपस्तथा ॥ इत्युक्त्वास्मैकरगतं शूलंप्रादान्निजायुधं ॥ २९॥ बीजापूरंकमलभूर्विष्णुश्चक्रंसदर्श
नं ॥ ऐक्षवंकार्मुकंकामोगदांस्वामादिकेशवः ॥ ३०॥ गौर्युत्पलंरमापद्मंरविः पात्रंधरायवान् ॥ धनदोरत्नसंपूर्णंकलशंहेमनिर्मि
तं ॥ ३१॥ वाहनंगजमंकाशं हिमवान्मूषकंशुभं ॥ अन्येचदेवायोग्यानि स्वानिस्वान्यायुधान्यदुः ॥ ३२॥ ततोविष्णुःप्रसन्नात्मा
शक्तिंनामस्वकन्यकां ॥ देवेब्रह्मादिभिः सार्धंददौतस्मैत्रिवाज्ञया ॥ ३३॥ सूतउ०॥ इतिदत्वावरंतस्मैत्रिविधैर्देवैः समन्वितः ॥ गजा
स्येनतुसंयुक्तस्तत्रैवादर्शनंगतः ॥ ३४॥ श्रावणेशुक्लपक्षेतु चतुर्थ्यांकुजवासरे ॥ तीर्थंवैनायकेस्नात्वागणानांत्वेतिमंत्रतः ॥ ३५॥
पूजयतिगणाध्यक्षंरक्तैर्भिस्तिलैर्घृतैः ॥ नारिकेलैरिक्षुदंडैर्लाजैरंभाफलैरपि ॥ ३६॥ अपूपैर्मोदकैःसक्तुफलपक्वादिभिर्नृप ॥
पूजयित्वागणाध्यक्षंफलमंतेमनसेप्सितं ॥ ३७॥ शातानीकउ०॥ ॥ किंकारणार्थंकेतक्यातपस्तप्तंद्विजोत्तम ॥ सूतउ०॥ अहंश्रे
यानहंश्रेयानित्यभूत्कलहोमिथः ॥ ३८॥ दंडचक्रधरौदेवौपरस्परमयुध्यतां ॥ देवाः शमयितुंतत्र नशेकुःकलहंतयोः ॥ ३९॥

कालेयाःकालचोदिताः ॥२०॥ भक्षयंतिप्रजाःसर्वारात्रौरात्रौविनिर्गताः॥ दिवासमुद्रमाश्रित्यनिर्भयानिवसंतिते ॥ २१॥ तै
र्भक्ष्यमाणाविप्रेंद्रक्षयंजग्मुःप्रजाःप्रभो ॥ कालेयभयभीतानामस्माकंशरणंभव ॥२२॥ समुद्रसलिलान्याशुशोषयस्वहिता
यनः॥ त्वयैवशक्यंनान्येनकर्मैतद्द्विजसत्तम ॥ २३॥ तस्मान्नोनुग्रहार्थायसमुद्रंपातुमर्हसि ॥ पीतेसमुद्रेभवतावधिष्यामोव
यंरिपून् ॥ २४ नान्यथास्माभिरसुराहंतुंशक्याद्विजोत्तम॥ तस्मान्नोद्विजशार्दूलप्रसादंकुरुसव्रत ॥२५॥ विश्वोपकारि
णोविप्रभविष्यंतिभवादृशाः ॥ इतितेषांवचःश्रुत्वाअगस्त्योभगवान्मुनिः ॥२६॥ तथाकरिष्यइत्युक्त्वालोकानांहितकाम्य
या ॥ तैःसार्धमगमद्विप्रस्तपसाद्योतितप्रभः॥ २७ ॥ ऋषिभिःसहितोविप्रःससारसरितांपतिं॥ त्रैलोक्यसहितःश्रीमानगस्त्यो
वरुणालयं॥२८॥ पातुकामस्तदाराजन्निदंवचनमब्रवीत् ॥ पिबाम्यहंक्षणात्सर्वंसमुद्रसलिलंसुराः॥ २९ ॥ युष्माभिर्य
दनुष्ठेयंतत्सर्वंसंप्रधार्यतां॥ इत्युक्त्वाकुरुशार्दूलयुगांताग्निसमप्रभः॥ ३०॥ विदार्यवक्त्रकुहरंस्वजिह्वांसलिलेक्षिपत्॥
शुष्ककाष्ठाग्निवद्राजन्चारुणिर्वरुणालये ॥ ३१॥ तद्वक्त्रार्पितात्यापःक्षणेनभरतर्षभ ॥ क्षयंजग्मुस्तदाराजन्नगस्त्य
तेजआश्रिताः॥३२॥ यथावायुसहायोग्निःक्षिप्तंक्षिप्तंदहेत्क्षणात् ॥ तथैवसर्वाण्यंभांसिभक्षयामासवारुणिः॥ ३३॥
तंदृष्ट्वासर्वभूतानिविस्मयाज्जुष्टुवुर्मुनिं ॥ स्तूयमानःसतैःसर्वैरगस्त्योभगवानृषिः॥ ३४॥ निस्तोयमर्णवंचक्रेऽगस्त्यः
सर्वस्यपश्यतः॥ ॥ ततःसुरासुरप्रणिपत्यराजन्नगस्त्यमुत्सृज्यवरायुधानि॥ विश्वस्थतन्नोयनिधिंसुरास्तदाजघ्नुस्ततो

दैत्यमहाबलौघं॥ ३६॥ तेहन्यमानाविबुधैः सुरारयोनिर्विण्णगात्रा व्यपतन्पयोनिधौ॥ निशुंभशुंभौसुरसः सुलोचनः प्रको
पनाद्याः सुरशत्रवोनृप॥ ३७॥ अशीतिसाहस्रमथोसुरारयोमृताः सुरेंद्रप्रमुखैः सुरैर्हताः॥ हतेषुतेषु प्रमदासहायाः पाताल
मेवंविविशुश्चाश्वशिष्टाः॥ ३८॥ ततोहत्वाकालकेयान्सुराः शक्रादयोनृप॥ हृष्टाः संपूजयामासुरगस्त्यमृषिसत्तमं॥ ३९॥ ऋ
षिभिः सहराजेंद्रसकिंनरमहोरगाः॥ यक्षगंधर्वमनुजास्तुष्टुवुस्तंमुहामुनिं॥ ४०॥ ततोब्रुवन्मुनस्तैर्वैऋैदेवगणाः प्रभो॥ त्वत्प्रसा
दाद्द्विजश्रेष्ठभविष्यामोनिरामयाः॥ इमंसमुद्रंनिस्तोयंसर्वसत्त्वालयंमुने॥ पूरयस्वमुनिश्रेष्ठअंभोभिर्वरुणालयं॥ ४२॥ इति
तेषांवचःश्रुत्वाअगस्त्योभगवान्ऋषिः॥ प्रहस्यदेवानाजेंद्रइदंवचनमब्रवीत्॥ ४३॥ यन्मयापीतमधुनातोयंत्रिदशसत्तमाः॥ काष्ठ
स्यसंघवद्दृग्धंचित्रभानोर्विसर्जितं॥ भस्मावशेषमभवन्नद्यिजीर्णमयासुराः॥ ततोंबुनासावब्धिस्तुनशक्यः पूरितुंमया॥ ४५॥
यूयंसमेत्यसंचिंत्यसमुद्रस्यास्यपूरणे॥ उपायमन्यंपश्यध्वंनमयाशक्यतेसुराः॥ ४६॥ ततस्तद्वचनंश्रुत्वादेवासुरमहोरगाः
ऋषिभिः सहराजेंद्रब्रह्माणंसमुपागमन्॥ ४७॥ ततः समेत्यब्रह्माणंमिदमूचुःसुरानृप॥ कथंसमुद्रोभगवन्पुनः पूर्णोभविष्यति॥ ४८॥ तत्पूरणार्थंदेवेशउपायंनोब्रवीहिभो॥ ततोब्रह्माजगत्धाता ज्ञात्वातत्पूरणंनृप॥ ४९॥ तानाहगच्छध्वमितिकालेनपरिपूर्यते॥ भगीरथप्रसादार्थंगंगासुरनदीदिवः॥ ५०॥ भूमिंप्राप्स्यतितत्तोयैः पूर्णोभवतिसागरः॥ इतितद्वचनंश्रुत्वादेवासुरमहोरगाः॥ ५१॥ प्रीताःस्वस्थानमगमन्प्रणिपत्यपितामहं॥ कालेनसागरास्तद्वद्भारतंखंडमप्युत॥ ५२॥

नवधाव्यभजन्राजन्खनाद्रेः पृथिवीमिमां ॥ वर्धितस्तैरुदन्वान्वैसागरः प्रोच्यतेबुधैः ॥ तदाप्रभृतिराजेंद्र सागराख्यांगतोबुधिः ॥
खन्यमानेतदातैस्तुभूतले कुरुसत्तम ॥ ५४ ॥ गोकर्णेसहदेवेन सतीर्थसतपोवने ॥ पपातपातालमुखे अभेद्यंचन्नृपोत्तम ॥ पुनश्च
सृष्टंरामेणभार्गवेणमहात्मना ॥ विष्णोरंशःसविज्ञेयोरामःप्रहरतांवरः ॥ ५६ ॥ तेनसृष्टमभूद्राजन्पूर्ववत्सप्तकोकणं ॥ सत्यस्य
पादेराजेंद्रसप्तकोकणमुच्यते ॥ ५७ ॥ अतःश्रृणुत्वंपश्चिमपुराणंसागरस्यहि ॥ ॥ इत्यादि० कर्ण० अध्यायः ॥ ॥
सूतउ० ॥ ॥ तदृष्ट्वासगराणांचनिधनंकुरुसत्तम ॥ नारदोभगवान्क्षिप्रं सगरालयमागमत् ॥ १ ॥ दीक्षितःसतुराजेंद्रो दृष्ट्वा
देवर्षिमागतं ॥ प्रत्युद्गम्याभिवाद्याथ आसनंचोपपादयत् ॥ २ ॥ पाद्यार्घ्यादिभिरासीनंपूजयित्वातपोनिधिं ॥ अनामयंसपप्रच्छ
लोककुशलमेवच ॥ ३ ॥ ततस्तुनारदःसर्वंकथयामासकोरव ॥ निधनंसगराणांचपुत्रोरप्राप्तिमेवच ॥ ४ ॥ कापिलंतेजआसा हरे
द्यविनष्टाःसगरान्प ॥ साग्निधूमाभस्मशेषाबभूवुःक्षणकालतः ॥ ५ ॥ अज्ञानिनस्तुपापिष्ठालोकोपद्रवकारिणः ॥ क्षयंगता
स्तेराजेंद्रनचिंतांकर्तुमर्हसि ॥ ६ ॥ नष्टास्तेपिदुराचारायद्राविनतदन्यथा ॥ उक्तंरुद्रेणददतावरंतवतदानघ ॥ ७ ॥ उत्पत्ति
श्चैवनाशश्चतेषांहिसमकालतः ॥ तस्मात्तेषांविनाशेननचिंतांकर्तुमर्हसि ॥ ८ ॥ इत्युक्त्वाप्रययौराजन्नारदोभगवान्
षिः ॥ ततःसराजाधर्मात्माश्रुत्वामुनिमुखोद्गतं ॥ ९ ॥ संस्मृत्यरुद्रवचनमल्पशोकोबभूवह ॥ अंशुमंतमथाहूयपौत्रमि १९७
क्ष्वाकुनंदनः ॥ १० ॥ इदमाहार्थिसहितःसभामध्येतिलालयन् ॥ पितामहवचःसत्यमयात्यक्तुःपुरानघ ॥ ११ ॥ अन्येचब

असुरादेवशत्रवः॥ ४॥ समुद्रंतेसमाश्रित्य हतेवृत्रेमहासुराः॥ त्रैलोक्यस्यविनाशायदीक्षिताः कुरुसत्तम॥ ५॥ रात्रौनिर्गत्यसं
हिताः कालेयाःकालचोदिताः॥ आश्रमाणिसमासाद्यमुनीनांभावितात्मनां॥ ६॥ भक्षयामासुरव्ययाः सपत्नीकान्तपोधनान्॥
ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्चकुरुसत्तम॥ ७॥ रात्रौरात्रौविनिर्गत्यभक्षयामासुरोजसा॥ दिवासमुद्रेसंलीनानदृश्यंतेक
श्चन॥ ८॥ एवंवर्षसहस्रांतेनिर्घृणाः पापकर्मिणः॥ क्षयंजग्मुःप्रजाःसर्वास्त्रैलोक्यपरिवर्तिनः॥ ९॥ आस्थिसंघातसंकीर्णा
निर्मनुष्याकुरूद्वह॥ भूतैश्चभूमिः संकीर्णा तत्रतत्राभवन्मही॥ १०॥ ततोदेवाः सगंधर्वाः सयक्षाःपांडुनंदन॥ उद्वेगमगमन्सर्वे
भयविह्वलचेतसः॥ ११॥ कृतउत्पद्यतइतिनिर्विण्णसुरसत्तमाः॥ ततोमहेंद्रसहिताब्रह्माणंशरणंययुः॥ १२॥ आर्तनादंप्रकु
र्वाणारक्षस्वेतिपुनःपुनः॥ तच्छ्रुत्वाभगवान्ब्रह्मादेवानिदमथाब्रवीत्॥ १३॥ ब्रह्मोवाच॥ हतेवृत्रेकालिकेयाः समुद्रंनिधिमंभ
सां॥ समासाद्यदुराधर्षालोकस्योत्सादनेरताः॥ १४॥ तस्माद्गच्छध्वममराः कुंभयोनिंतपोनिधिं॥ सहिशक्तोहिनान्योस्तिसमुद्र
परिशोषणे॥ १५॥ पीतेगस्त्येनसलिलेवधिष्यध्वंसुरासुरान्॥ कालिकेयान्दुराचारान्नान्यथाभविताध्रुवं॥ १६॥ इतिहृच्वनं
श्रुत्वासार्धंतेनमहात्मना॥ अगस्त्यनिकटंगत्वासमासाद्यमहामुनिं॥ १७॥ अगस्त्यमब्रुवन्देवाःस्वेषांकार्यस्यसिद्धये॥ सुरदेवाऊचुः
ब्रह्म०॥ त्वंनोधाताविधाताच त्वंगतिर्द्विजसत्तम॥ वडवत्वामुनिश्रेष्ठरक्षिताःस्मोवयंभयात्॥ १८॥ दयांकुरुष्वदेवेषुलोके
षुद्विजसत्तम॥ कालेयभयविध्वस्तंत्रैलोक्यंसचराचरं॥ १९॥ तपसाधार्यतेविप्रत्वयासर्वमिदंजगत्॥ समुद्रंदुर्गमाश्रित्य

शीघ्रं समुद्रं वरुणालयं ॥ येनमार्गेणतेगत्वाखन्दिदार्यचवसुंधरां ॥३०॥ तेनगत्वासमंतस्यपुत्रःपुत्रवतांवरः॥ ददर्शकपिलं विप्रंप्रज्व
लंतंरुशानुवत् ॥ ३१॥ तमश्वंचनरव्याघ्रतस्यपार्श्वेस्थितंशुभं ॥ भस्मीभूतान्पितॄंश्चैवयथावत्कुरुनंदन॥ ३२॥ (अंशुमा
न्दीनवदनः कपिलंशरणंगतः) ततःप्रीतःसभगवान्वरंब्रूहीत्यभाषत ॥ दातास्मितेवरंप्राज्ञयद्यत्प्रार्थयसेनघ॥ ३३॥ततोंशु
र्वरयामासस्वपितॄणांगतिंशुभां॥ तच्छ्रुत्वाकपिलोयोगी अंशुमंतमभाषत ॥३४॥ गंगामानीयत्रिदिवाद्यःकश्चित्पुरुषःकिल॥
प्लावयिष्यतितत्तोयैस्तदापिंडोदकक्रियाः॥ ३५॥ संप्राप्स्यंतिदिवंसर्वेनान्यथेतितमब्रवीत् ॥तस्माद्रक्षाहंपुत्र अश्वं गृह्यन
रोत्तम॥ ३६॥ समापयमखंतस्यसगरस्यमहात्मनः॥ अचिरेणमहाभागपौत्रस्तवभविष्यति॥ ३७॥ तेनैवतारितास्येनेस्वर्गगछं
तिसागराः॥ इतितद्वचनंश्रुत्वा अंशुमानपिभारत ॥३८॥ प्रणम्यतंतथेत्युक्त्वाजगामस्वनिवेशनं॥ अश्वद्वितीयोराजेंद्र सगरंसमुपा
गमत्॥ ३९॥पितामहंमहातेजायवंदेशिरसांशुमान्॥ अश्वंनिवेदयामासतेषांवृत्तांतमप्युत ॥ ४०॥ दृष्ट्वातमश्वंसगरः प्रीतिमान
भवन्नृप ॥मूर्ध्निचैवमुपाघ्रायप्रीतोस्मीत्याहतंगुरुः॥ ४१॥ ततोयज्ञंमहातेजायथान्यायंसमापयत्॥ स्नात्वाचावभृथस्नानं सऋ
त्विक्सपुरोहितः॥ ४२॥ राज्येभिषिच्यांशुमंतं तपसेधृतमानसः॥ वनंजगामराजासोसगरःसाधुसत्तमः॥ ४३॥ अंशुमानपि
तेजस्वीपालयामासमेदिनीं॥ ससमुद्रवनद्वीपांसाम्राज्यमकरोद्वशी॥ ४४॥ तस्यपुत्रोभवद्राजन्दिलीपोनामविश्रुतः॥ गुणैः
संदीपयामासलोकसीभास्करोयथा॥ ४५॥ अभिषिच्यांशुमान्राज्ये पुत्रंसर्वगुणान्वितं॥ तस्याप्यभून्महातेजाः पुत्रः पुत्रवतां
वरः॥ ४६॥ भगीरथइतिख्यातः सर्वत्रकुरुनंदन॥ सत्यवान्शीलसंपन्नोगुणवान्ब्राह्मणप्रियः॥ ४७॥ तेजसादित्यसंकाशःक्ष

मयापृथिवीसमः॥ पराक्रमेविष्णुसमः कोपेंतकसमप्रभः॥ ४८॥ श्रियावैश्रवणः साक्षात्कंदर्पइवमूर्तिमान्॥ सर्वैर्गुणै
रुपेतंतुदृष्ट्वापुत्रंमहोदयं॥ ४९॥ आहूयपुत्रंराजेंद्र इदंवचनमब्रवीत्॥ शृणुमद्वचनंपुत्र अलंघ्यंगुरुभाषितं॥ ५०॥ अ
भिषेक्ष्यामित्वांराज्येरमेहमिहपुत्रक॥ तपश्चर्तुमिहेच्छामिनविघ्नंकर्तुमर्हसि॥५१॥ पितॄणांतारणायैव आत्मनःश्रेयसे
तथा॥ इत्युक्त्वासन्नृपःपुत्रमभिषिच्यवनंययौ॥ ५२॥ गंगावतरणेयत्नंकृतवान्सम्महीपतिः॥ ॥ इत्यादि० गोकर्ण० अ
ध्यायः॥ ॥ सूतउवाच॥ भगीरथस्तदाराजन्पालयामासमेदिनीं॥ पालयन्नपिभूलोकंनिर्वेदमगमद्भृशं॥ १॥ श्रुत्वापितृ
णांपतनंकपिलाग्नेर्नृपोत्तम॥ स्वर्गप्राप्तिंचभद्रंतेश्रुत्वादुःखमुपेयिवान्॥ २॥ अमात्यप्रवरेराज्यंनिधायेक्ष्वाकुनंदनः॥
तपसेकृतसंकल्पोहिमवच्छिखरंययौ॥ ३॥ तत्रगत्वातपस्तेपेनिराहारोनृपोत्तम॥ सहस्रवर्षपर्यंतंपितामहमपूजयत्॥ ४॥
ततस्तुष्टोजगत्स्रष्टावरंब्रूहीत्यभाषत॥ सतच्छ्रुत्वावरंवव्रेयथातच्छृणुपार्थिव॥ ५॥ गंगामानीयदेवेशतर्पयित्वापितॄन्मम॥
दत्तावर्षसहस्राणिराज्यंकृत्वापितामह॥ ६॥ ततोमारिष्येभगवन्नेहिमत्यंवरंमम॥ तथास्त्वितिसमुक्त्वातुआयुर्दत्वापितामहः
साधयस्वमहत्कार्यमित्युक्त्वांतरधीयत॥ ततोवर्षसहस्राणिगंगामाराधयत्प्रभुः॥ ८॥ पंचाग्निमध्यगोभूत्वाबाह्यंबुस
तभोजनः॥ ततस्तुष्टातदागंगाप्रत्यक्षीभूयचाब्रवीत्॥ ९॥ तदाभिवांछितंराजन्ब्रूहितत्तेददाम्यहं॥ ततोवव्रेनतरणंसत
स्याराजसत्तमः॥ १०॥ तथास्त्वितिसमुक्त्वासापुनर्वचनमब्रवीत्॥ पतंत्याममराजेंद्र नवोढावेगमास्तिवै॥ ११॥ ऋतेरुद्रान्म

हादेवान्मांवोढुंकोपिनास्तिहि ॥ यदाप्रसन्नोभवतिरुद्रस्त्वन्नृपोत्तम ॥१२॥ तदास्मर्तव्यमित्युक्त्वातत्रैवांतरधीयत ॥
ततोभगीरथोराजाकैलासंगिरिमाश्रितः॥१३॥ पूजयामासचपुनारुद्रंत्रिभुवनेश्वरं ॥ सहस्रवर्षंराजेंद्रशतमन्यच्चकोर
व ॥१४॥ ततस्तुष्टोजगन्नाथःप्रत्यक्षीभूयतंनृपं॥ वरंब्रूहिमहाराजदातास्मितवसांप्रति ॥१५॥ ततःप्रणम्यशिरसा
सर्वलोकेश्वरंहरं ॥ भगीरथोमहाराजकृतांजलिरभाषत ॥१६॥ गंगात्रिपथगादेवीत्रिदिवात्संपतिष्यति ॥ तांधारयम
हादेवशिरसाभूतभावन ॥१७॥ त्वत्तेनहिसोढास्तित्रिषुलोकेषुकश्चन ॥ तथास्त्वितिसराजानमुक्त्वादेवोमहेश्वरः॥
॥१८॥ मेरुंगिरिवरंगत्वास्थितःशैलइवापरः॥ स्थितंदृष्ट्वाशूलपाणिंससंभ्राकाशगांनृपः॥१९॥ तस्यसाचिंतितंज्ञात्वा
स्थितंदृष्ट्वात्रुमापतिं॥ दिवःपपातराजेंद्र मूर्ध्निशंभोर्महात्मनः॥२०॥ महावेगापुण्यजलादेवगंधर्वसेविता ॥ मीनग्राह
वतीदेवीस्मृतमात्राघनाशिनी ॥२१॥ मूर्ध्निदेवपतेर्गंगामालामुक्तामयीवहि ॥ संभ्रमकाःसर्वेविस्मयादृदृशुर्नृप ॥२२॥
ललाटदेशंसंप्राप्यदेवदेवस्यभामिनी ॥ बभ्रामतत्रतत्रैवजटामुकुटमंडले ॥२३॥ पुनःप्रसादयामासनीलग्रीवंभ
गीरथः॥ ततःपुनर्हैमवतीमेरुपृष्ठेपतन्नृप ॥२४॥ ततोविभज्यचात्मानंचतुर्धात्योघहारिणी॥ पूर्वेणगत्वाभद्राख्यंद
क्षिणेनचभारतं॥२५॥ पश्चिमेकेतुमालंच उत्तरेचोत्तरान्कुरून्॥ गत्वाजगामजलधिंपूरयामासतत्क्षणात्॥२६॥ मेरुष्ट

हर्यश्वाः शूराश्चपुत्राश्चमहाबलाः॥ नष्टास्तेयुगपत्सर्वेकपिलाग्नेरुपतंगवत्॥१२॥ त्वयादायादवानस्मि नान्योस्तिममसंततेः॥ तत्सो
प्रतंभवान्पुत्रगत्वाश्वंसमुपानय॥१३॥ समाप्येतत्क्रतुवरंराज्यंदास्यामितेनघ॥ तपश्चर्तुमिहेच्छामि तच्छीघ्रंसंप्रधार्यतां॥१४॥
शातानीकउ०॥ ॥ किमर्थमात्मनःपुत्रंत्यक्तवान्सगरोनृपः॥ दुरत्ययंकेनदोषेणएतन्मेवक्तुमर्हसि॥१५॥ सूतउ०॥ असमंजइ
तिख्यातःपुत्रःशैव्यामजायत॥ तंविवेशासुरःकश्चित्पूर्ववैरमनुस्मरन्॥१६॥ जन्मांतरेसवेरेयोभूद्धकुव्यापारकारकः॥ स्व
धर्मनिरतःसोथशांतोदाक्षण्यवान्शुचिः॥१७॥ सकदाचित्तवनन्भूमिंशोचार्थंजाह्नवीतटे॥ तत्रापश्यान्निधिंस्फीतंयक्षरक्षास
मन्वितं॥१८॥ तंदृष्ट्वाविस्मयपरोगृहीतुंचोपचक्रमे॥ ततस्तत्पालकोयक्षोलुब्धकोनामपापकृत्॥१९॥ भक्षार्थंत्वंपशून्देहि
क्षुधार्तस्यममानघ॥ ततोगृह्णामद्दत्तंनिधानमितिसोब्रवीत्॥२०॥ दास्यामीतितमुक्त्वातुतद्गृहीतंकुरूत्तम॥ नदत्तस्तेनविस्मृ
त्यपशूंस्तेनदुरात्मना॥२१॥ ततोसौक्षुधयाविष्टःपंचत्वमगमद्वने॥ वैश्यःसपापीराजेंद्र मृतःकालेनसत्तम॥ २२॥ व्यजायत
पुनःसोथशैव्यांसगरभूपतेः॥ असमंजइतिख्यातइक्ष्वाकुकुलवर्धनः॥२३॥ तमाविवेशाभूतःसन्बाल्येक्रीडंतमप्युत॥ तेनाविष्टो
महातेजानिर्घृणःसमपद्यत॥२४॥ ततोगृहीत्वाशिशुकान्नागराणांबलाद्बली॥ नद्यांचिक्षेपबुद्धात्मात्रतत्रचप्रारत॥२५॥ राज्ञोनि
वेदयामासुःसर्वेनगरवासिनः॥ तत्याजपुनंतच्छ्रुत्वाविषयांतेमहीपतिः॥२६॥ त्यक्तःसचापिपापेन अभिभूतोर्दितस्तदा॥ स्वा
निमांसानिचोत्कृत्यभक्षयामासकौरव॥२७॥ वनेतस्मिन्महाभीमेमृतःसोप्यसमंजसः॥ तस्यपुत्रोमहातेजा अंशुमानितिं
विश्रुतः॥२८॥ सोशुमानेवमुक्तस्तुपितुःपितरमब्रवीत्॥ अश्वंहिचानयिष्यामि विज्वरोभवपार्थिव॥२९॥ इत्युक्त्वाप्रययो

तावच्छुश्रूषणपरस्तत्रैवास्तेभगीरथः॥३८॥ अतीतेशतवर्षेतुजह्नूराजानमब्रवीत्॥ गच्छराजन्यथाकामंगंगयाचानयासह॥ ३९॥ दास्यामीतितमुक्त्वाथमोचयामासजाह्नवीं॥ मुखतस्तस्यविप्रस्यनिष्क्रम्यसुरनंदिनी॥४०॥ जह्नुकन्याजगन्नाथपुनस्तमनुपार्थिवं॥ यत्रतेसागरादग्धाकपिलाग्नेःपुरानृप॥४१॥ तत्रगत्वामहाभागाप्लावयित्वातुसागरान्॥ सम्यक्सापूरयामाससमुद्रंभरतर्षभ॥४२॥ पूर्यमाणेसमुद्रेतुतत्तोयांतर्हितंह्यभूत्॥ गोकर्णंकुरुशार्दूलसहस्रपरिवत्सरं॥४३॥ उदकस्थमभूद्राजन्रामेणपुनरुद्धृतं॥ भार्गवेणमहाभागविष्णोरंशेनसत्तम॥४४॥ पुनःसृष्टमभूत्तेनपूर्ववत्कुरुनंदन॥ ऋषिदेवमनुष्याणांहितकामेनसत्तम॥४५॥ भगीरथोपिनृपतिस्तर्पयित्वापितॄन्स्वकान्॥ कल्पयामासवैगंगांदुहितृत्वेनृपोत्तमः॥४६॥ तदाप्रभृतिराजेंद्रगंगाभागीरथीत्यभूत्॥ पुनर्दशसहस्राणिवर्षाणिसभगीरथः॥४७॥ राज्यंजुगोपधर्मेणदिविदेवपतिर्यथा॥ सूतउवाच॥ ॥यइदंपठतेनित्यंशृणोतिस्कसमाहितः सर्वपापविनिर्मुक्तःस्वर्गलोकंसगच्छति॥४९॥ ॥इत्यादि० गोकर्ण० अध्यायः॥ ॥सूतउवाच॥ ॥ अतःपरंशृणुविप्रोगोकर्णस्यपुनर्भवं॥ समुद्रमध्येराजेंद्रमध्यतोयोजनद्वयं॥१॥ सत्याच्चतुर्योजनतःपश्चिमेनकुरूद्वह॥ ततःसंमंत्र्यऋषयोगोकर्णक्षेत्रवासिनः॥२॥ ब्रह्माणंशरणंगत्वाइदमूचुस्तपस्विनः॥ ॥ऋषयऊचुः

ब्रत्यन्निरामयाः सर्वे गोकर्णेनिवसामहे ॥ ३॥ इदानींतन्महाक्षेत्रं मग्नमासीन्महार्णवे ॥ शतशृंगस्यशिखरं दृश्यतेलव
णार्णवे ॥ ४॥ तदुद्धारेणभगवन् प्रसादंकर्तुमर्हसि ॥ ततस्तेषांवचःश्रुत्वाब्रह्मालोकपितामहः॥ ५॥ ध्यानेनालोक्यतत्स
र्वं ज्ञात्वोनिदमब्रवीत्॥ सत्यंशिखरिणांश्रेष्ठंगच्छध्वमविलंबितं ॥ ६॥ तत्रकृत्वानिवासानिनिवसध्वंतपोधनाः॥जाम
दग्न्यस्यरामस्यदीक्षामुपगतस्यच ॥ ७॥ क्रतुःसमाप्यतेयावत्तावत्तत्रप्रतीक्षत ॥ विश्वजिन्नामभद्रंवः क्रतुरुत्त
प्रवर्तते ॥ तदंतेदास्यतिविभुः सशैलवनकाननां ॥ ८॥ महींसर्वस्यमपिचक्रतेतंशैलसत्तमं ॥ आत्मनःसंनिवासार्थं
महेंद्रंनामविश्रुतं॥ ९॥ यल्किंचिद्दूयतेऽन्यत्रकश्यपायसदास्यति ॥ तदायूयंकश्यपेनसहसंमंत्र्यसत्तमाः॥ १०॥
वरंयाचध्वममरागोकर्णोद्धारणायवै ॥ युष्माभिरर्थितःसोथकरिष्यतिहितंवचः॥११॥ नशक्यमन्येनततस्त्रष्टुंचि
नितुमेववा ॥ प्रचेतसःपुनःप्राप्तुंशक्यंनान्येनकेनचित् ॥ १२॥ सहिशक्तोजगद्धातुर्विष्णोरंशः प्रतापवान् ॥ ब्रह्मे रितं
तदाश्रुत्वादेवगंधर्वदानवाः॥ १३॥ ऋषयश्चमहाभागाः सकिंनरमहोरगाः॥ मनुष्याःपक्षिणःसर्वेसत्त्वाद्रिंप्रतिपे
रे ॥१४॥ कालप्रतीक्षयाराजन्गोकर्णनिलयाः प्रभो॥ ततःसमापयामासजामदग्न्योमहाक्रतुं ॥ १५॥ सर्वस्वंराज्ञ
मपिच ब्राह्मणेभ्योमहामतिः॥ भूमिमाहूयराजेंद्र कन्यारूपधरांप्रभुः॥ १६॥ अलंकृत्ययथान्यायंकश्यपाय

न्यवेदयत् ॥ ततोगृहीत्वातांविप्रोदुहित्रत्वेनकल्पयत् ॥१७॥ ततः प्रभृतिराजेंद्रकाश्यपीभूमिरुच्यते ॥ एतस्मिन्नेवकालेतुत्त
णाग्निप्रमुखाद्विजाः ॥१८॥ गोकर्णनिलयाराजन्नाममभ्याययुस्तदा ॥ कृताभिषेकंप्रवरंकृतकौतुकमंगलं ॥१९॥ ऋत्विग्भिः
सहितंराजन्त्सदस्यैरभिसंवृतं ॥ आशीर्भिर्वर्धयामासुर्मुनयोभृगुनंदनं ॥२०॥ ततस्तान्पूजयामासभार्गवोर्घ्यादिभिर्नृप ॥
पूजितास्तेनतेविप्राऊचुर्वाक्यंसुखावहं ॥ २१॥ रामशस्त्रभृतांश्रेष्ठकश्यपस्यमतेतदा ॥ आर्थिनस्तांवयंविप्रानिबोधभृगु
नंदन ॥ २२॥ दत्वामिलंमहाभाग योयदिच्छतितत्तथा ॥ अस्मन्मनोगतंतस्मात्प्रयच्छभृगुनंदन ॥ २३॥ तच्छ्रुत्वाभार्गवोराम
स्तान्प्रणम्येदमब्रवीत् ॥ किमिच्छथमहाभागाब्रूहिकिंकरवाणिवः॥ २४॥ सर्वस्वंचद्विजश्रेष्ठाःशरीरमथवार्थितं ॥ इतिराम
वचःश्रुत्वाप्रहृष्टामुनयोब्रुवन् ॥ २५॥ प्रतिपूज्यमहाभागंस्वस्तितेस्त्वितिकौरव ॥श्रूयतांमुनिशार्दूल सर्वेषामर्थमप्युत ॥२६
गोकर्णमितिविख्यातंसिद्धःक्षेत्रंद्विजोत्तम ॥ तत्सागरैःक्रूरतरैः खनद्भिर्भूतलंनृप ॥ समुद्रेपश्चिमेक्षिप्तं अधस्ताद्योजनद्वयं ॥
तदुद्धारमिहेच्छामस्त्वत्तोवयमरिंदम ॥ २७॥ नत्राक्यमन्येनविभोप्राप्तुंतद्यादसांपतेः॥ तस्मादुत्थाप्यगोकर्णंतपसाचदमे
नच ॥ २८॥ देहिरामभृगुश्रेष्ठमुनीनांभावितात्मनां ॥ तच्छ्रुत्वामुनिशार्दूलःकश्यपस्यप्रभाषितं ॥ ३०॥ प्रणम्यतान्मुनीन्
रामःप्रतिज्ञामकरोत्प्रभुः॥ दास्याम्युत्थाप्यगोकर्णंयुष्माकंमुनिसत्तमाः॥ ३१॥ प्रतिज्ञायययोरामःसमुद्रंसरितांपतिं ॥
सहविप्रैःसदस्यैश्चकश्यपेनचकौरव ॥ ३२॥ आसाद्यांभोनिधिंवीरइदंवचनमब्रवीत् ॥ प्रणम्यवरुणंरामोदर्शयस्वेत्यभाषत ॥ ३३॥ त्वद्दर्शनमिहेच्छामिसहैभिर्मुनिपुंगवैः॥ इत्युक्तस्तेनवरुणोनकिंचित्प्रत्यभाषत ॥ ३४॥ ततश्चुकोप

ष्टंसमासाद्यगंगाराजानमब्रवीत् ॥ मार्गंदर्शयराजेंद्र यत्कृतेनीयसेदिवः॥ २७ ॥ ततस्तथेतितामुक्त्वा दक्षि
णांप्रास्थितोनृप ॥ वर्षान्सीमाचलांश्चैव अतिक्रम्यसरापगा ॥२८॥ हिमवंतमनुप्राप्य तेनसार्धंमहानदी॥
जह्नोराश्रममासाद्यराजानमृषिमब्रवीत् ॥ २९ ॥ उत्तिष्ठोत्तिष्ठविप्रर्षेअपगच्छइतः प्रभो ॥ गंगाचायातिवेगेन
मार्गेणानेनसव्रत ॥ ३० ॥ वेगेनाकर्षतेदेवीमार्गेशैलशिलातलान् ॥ सवृक्षगुल्मांस्तस्मात्त्वंदूरंगछमहामते
॥३१॥ततोतिवयसावृद्धोजह्नुराहनृपंतदा ॥ वृद्धोहंराजशार्दूलनशक्नोम्यपसर्पितुं ॥ ३२ ॥ यद्धावितद्भवेद्राज
न्नित्युक्त्वाचासतत्रवै ॥ ततःससारतंदेशंगंगात्रिपथगाप्रभो ॥ ३३ ॥ तांदृष्वासमुनिश्रेष्ठोगंडूषमकरोत्तदा ॥ तथा
प्रभावंतत्तोयंतस्यगंडूषतांगतं ॥३४॥ अदृश्यंतत्क्षणेनैवतदद्भुतमिवाभवत् ॥ पीत्वातदंभःसमुनीराजानंप्रत्यभाष
त ॥ ३५ ॥ कृतेगंगामहाभाग महावेगप्रवाहिनी ॥ इतितद्वचनंश्रुत्वाराजाराजीवलोचनः॥ ३६ ॥ विस्मयोत्फुल्ल
नयनः क्षमस्वेतिपपातह ॥ पादयोस्तस्यराजेंद्र महर्षेर्भावितात्मनः॥ ३७॥ मौनव्रतधरःसोथ वर्षाणामयुतंगतः

शतानीकउ०॥ पूजयित्वायथान्यायंस्वस्थानमगमत्प्रभुः॥ नागश्रृंगंकथंतातअपतद्गरुणालये॥ कोवानागपतिस्तत्रस्थितोवै
सूतनंदन॥ १॥ सूतउ०॥ शृणुराजन्कथांदिव्यांदुर्मुखस्यमहात्मनः॥ शेषवंशोद्भवःश्रीमान्कनंदोनामनागराट्॥ २॥ तस्यपुत्रो
महातेजादुर्मुखोनामनामतः॥ सतपस्वीतपस्तेपेशातश्रृंगगतोवशी॥ ३॥ तंदृष्ट्वादायगरुडउत्पपातविहायसा॥ तपसातस्य
नागस्यरुद्रभक्तस्यवाचकौरव॥ ४॥ पुनःपपाततत्रैवयत्रपूर्वमवस्थितः॥ बिलंकृत्वाविवेशाथपुनःपक्षिपतेर्भयात्॥ ५॥ ततः
समुत्पाट्यगिरिंशातश्रृंगैःसहप्रभुः॥ गोकर्णमभ्यगाद्राजन्भाविकर्मप्रचोदितः॥ ६॥ भारार्तात्पतगेंद्राच्चुपपातवरुणालये
॥ दक्षिणस्यांदिशिविभोगोकर्णस्याद्धियोजने॥ ७॥ त्रियोजनोत्तरेतस्माद्धोरीश्रृंगंपपातह॥ दक्षिणोत्तरतस्तौहिगरुडात्पततां
वर(भो)॥ ८॥ तत्रस्थोदुर्मुखोराजन्सस्मारवृषभध्वजं॥ शरणंभवमेदेवमृत्योर्भीतस्यवै॥ ९॥ भक्तोयमितिमत्वामांरक्षस्वेति
पुनःपुनः॥ तच्छ्रुत्वानागराजस्यभाषितंभवभंगकृत्॥ १०॥ दर्शयामासतंदेवोवचनंचेदमब्रवीत्॥ नागमाभैर्नतेमृत्युर्मत्प्रसा
द्भविष्यति॥ ११॥ इत्युक्त्वानागराजस्यत्रिशूलेनोल्लिखत्प्रभुः॥ तंदृष्ट्वागरुडोराजन्त्रिशूलांकंशिरस्यच॥ १२॥ रुद्रदत्तवरोरा
जन्वर्जयामासपक्षिराट्॥ ततःप्रभृतितन्नाम्नाख्यातोभवदरिंदमः॥ १३॥ त्रिशूलांकइतिप्रादुस्तंनागंदेवदानवाः॥ सोऽ
द्यापिवर्ततेतत्रत्रिशूलांकोवृषायुधः॥ १४॥ तस्मिन्नागबिलंनामविविक्तंसेव्यमुत्तमं॥ अर्धयोजनविस्तारंसार्धयो
जनमायतं॥ १५॥ नानारत्नमयंराजन्सुरकिंन्नरसेवितं॥ नागराजस्यभवनेत्रिशूलांकस्यसत्तम॥ १६॥ अर्धयोजनवि
स्तारेसार्धयोजनमायते॥ नागस्त्रियोवसंत्यद्धादिव्यरूपामनोहराः॥ १७॥ चतुःषष्टिमहाभागनागकन्यावसंतिहि॥

वसंतिपतयस्तासांसिद्धभोग्यासुरांगनाः॥१८॥ नमृत्युर्नजरातासांनव्याधिर्नेंद्रियक्षयः॥ पातालात्सिद्धिमिच्छंतः प्रविश्यंत्यत्र केचन॥१९॥ तपसामहतारौजन्मंत्रौषधिसमन्विताः॥ ताभिःसहप्रमोदंतेबिलमाद्विर्हिमास्मृता॥२०॥ रुद्रेणशक्रमुत्सृष्टं निहितंतद्बिलेपुरा॥ तद्रक्षायांनियुक्तस्ताभ्रिरशूलंकात्रिशूलिना॥२१॥ तत्राभ्यरुद्रोभवतिनात्रकार्याविचारणा॥ ओषध्यो ह्यवस्तत्रजरामृत्युप्रबाधकाः॥२२॥ रुद्रप्रसादाल्लभ्यंतेनान्यथाकुरुसत्तम॥ वसंतिपंचतीर्थानितस्मिन्गिरिवरेनघ॥२३ रुद्रकुंडंनागतीर्थंवसोर्धारमितिप्रभो॥ अपरंविद्यतेतत्रसर्वतीर्थमयंशुभं॥२४॥ शांखतीर्थमितिख्यातंसर्वकिल्बिषनाशनं॥ सिद्धकुंडंचतत्रैवतीर्थान्येतानिपंचतु॥२५॥ तीर्थेषुतेषुयःस्नातिसोनंतफलमश्नुते॥ तस्माद्बिलाद्विनिष्क्रम्यात्रशूलंकोविषायुधः॥ २६॥ आगच्छतिसगोकर्णमासेपूर्णेनराधिप॥ पूर्वपक्षस्यपंचम्यांसभृत्यसुतबांधवः॥२७॥ इदानीमपिकौरव्यमार्गस्तस्यमहात्मनः॥ दृश्यतेभरतश्रेष्ठआगोकर्णात्तुसागरे॥ २८॥ शिलायांदृश्यतेमार्गस्तस्यनागस्यसत्तम॥ गोकर्णक्षेत्रमागत्यसंपूज्यवृषभध्वजं॥ २९॥ स्नात्वासर्वेषुतीर्थेषु सर्वलिंगान्यनुक्रमात्॥ संपूज्यनागराजोसौ पुनर्गच्छतिकौरव॥ ३०॥ तस्मिन्क्षेत्रेकुरुश्रेष्ठ षण्मासात्सिद्धिमाप्नुते॥ सर्वेंद्रियाणिसंयम्यरागद्वेषविवर्जितः॥ ३१॥ मौनव्रतधरस्त्वेषां कंदमूलफलाशनः॥ संपूजयेज्जगन्नाथमीश्वरंपरमेश्वरं॥३२॥ नागराजंचराजेंद्रसावित्रीव्रततत्परः॥ समवाप्नोतिसिद्धिमाप्नोतिअणिमादीन्नसंशयः॥ ३३॥ कर्णधारइतिख्यातःक्षेत्रपालःप्रतापवान्॥ तच्छृंगपालनार्थंहिनियुक्तःशूलपाणिना॥ ३४॥ सोद्यापिवर्ततेतस्मिन्नागशृंगेनृपोत्तम॥ कृष्णपक्षेचतुर्दश्यांबलिंदद्यान्महात्मने॥ ३५॥ नम

स्तेकर्णधारायकामपालायनेनमः॥ सर्वभूतपतेतुभ्यंनमस्तेक्षेत्रपालक ॥ ३६ ॥ इतिसंप्रार्थ्यतंपश्चाद्बलिंदद्याद्विशो
दश ॥ तस्याऋषिसिद्धिर्भवतिसोपिप्रत्यक्षतांव्रजेत् ॥ ३७॥ स्वप्नंवादर्शयेदस्यतदेवज्ञापनंनृप ॥ सिद्धोऋंथद्वचःस्वप्नेन
लुर्यात्सिद्धिमाप्नुयात् ॥ ३८ ॥ पिंगलोनामराजासीत्पुराकृतयुगेनघ ॥ सतस्मात्सिद्धिमापन्नः प्रसादात्परमेष्ठिनः॥ ३९ ॥
अणिमादिंमहाराज ऐश्वर्यंराजसत्तमः॥ सर्वेषांप्रददोराजातत्सिद्धिमविशंकितः॥ ४० ॥ ततःक्रुद्धःकर्णधारस्तंगृहीत्वाम
हाबलः॥ पाषाणोभवपापेतिप्रक्षिपद्वरुणालये ॥ ४१ ॥ क्षिप्तस्तेनमहाराजानिश्चेष्टःसमपद्यत ॥ शिलामयतनूराजास्थि
तोसोमकरालये ॥ ४२ ॥ येनगच्छतिनागोसौ त्रिशूलांको महाबलः॥ निक्षिप्यनंक्षेत्रपालइदंवचनमब्रवीत् ॥ ४३ ॥ अने
नैवप्रसादेनगोकर्णगळपार्थिव ॥ यदागंतासितत्क्षेत्रंतदामुक्तोभविष्यसि ॥ ४४ ॥ मासेनगच्छतिविभुःसराजाचतुरंगुलं॥
आगच्छन्सचगोकर्णाद्येनमार्गेणनागराट् ॥ ४५ ॥ तन्मार्गस्थोनृपश्रेष्ठऊत्थतेचतुरंगुलं ॥ सोयापिदृश्यतेमार्गश्चाब्धि
मध्येशिलामयः॥ ४६ ॥ अछेदमात्मनः सिद्धिंसमयोस्कसमाचरेत् ॥ नागशृंगस्यमाहात्म्यमुक्तंसंक्षेपतोमया ॥ ४७ ॥
इत्यादि० गोकर्ण० अध्यायः॥ ॥ ज्ञानीकउवाच ॥ ॥ कथंगौरीसमुत्पन्नादुर्गाकात्यायनीशुभा ॥
किमर्थंतेपेसोस्तेपेज्ञातश्रृंगगतानघ ॥ १ ॥ सूतउ० ॥ प्रकृतिःपुरुषश्चैव नित्यौतौदंपती नृप ॥ ताभ्यांजज्ञेचाखि
लंतु त्रैलोक्यं सचराचरं ॥ २ ॥ नविना पुरुषेणासौ प्रकृतिः स्थीयतेनघ ॥ तयाविना नपुरुषः क
दाचिदपितिष्ठति ॥ ३ ॥ अपिनाभाविनौतौहि परस्पर मरिंदम ॥ तयाप्रकृत्यात्रैलोक्यंव्याप्तमासीत्

पभगवान्रामः शस्त्रभृतांवरः॥ क्रोधाग्निनाप्रजज्वालदिधक्षुर्वरुणालयं॥ ३६॥ रक्षस्वमांमहाभागनिरागसमरिंदम॥ किमर्थमांभ
तिविभो क्रुद्धस्त्वंभृगुनंदन॥ ३७॥ सतस्यवचनंश्रुत्वारामोवचनमब्रवीत्॥ गोकर्णंनामभद्रंतेसिद्धानांक्षेत्रमुत्तमं॥ ३८॥ क्षिप्तंतत्त्वमि
देवेशापापिष्ठःसगरात्मजैः॥ पुनस्तत्प्राप्तुमिच्छंतित्वत्तोस्मिन्निलयाद्विजाः॥ ३९॥ तद्देतेषांपूर्ववद्देव देहिकोर्यंत्यजाम्यहं॥ तंतथेत्यब्रवीद्रा
जन्वरुणोयादसांपतिः॥ ४०॥ यावद्दिक्षसिवैप्राप्तुंतावद्देशंददाम्यहं॥ संहरास्त्रंमहाभाग आग्नेयंभृगुनंदन॥ ४१॥ ततःसंहारमक
रोद्रामःशस्त्रभृतांवरः॥ संहृतास्त्रंतदारामंवरुणोवाक्यमब्रवीत्॥ ४२॥ यावद्दिक्षसिवैप्राप्तुंभूमिमंतोभृगूद्वह॥ सीमेतदेवभवतुम
मरामाज्ञयातव॥ ४३॥ सीमांकुरुमहाभागमर्यादामनुचिंतय॥ इत्युक्तोभृगुशार्दूलोवरुणेनमहात्मना॥ ४४॥ स्रुवंगृहीत्वाचिक्षेप
सीमार्थंवरुणालये॥ ततस्तद्दूरातंगत्वायोजनानांपपातह॥ ४५॥ दक्षिणादुत्तरंगत्वासकृद्रूपाकृतीवतु॥ तत्त्याजतावद्वरुणोस्क
वक्षेपान्महाबलः॥ ४६॥ भीत्यारामस्यभगवान् भुवंत्यक्त्वांभसांनिधिः॥ उद्धृत्यतन्महाक्षेत्रंसह्यश्रृंगेमहत्तरे॥ ४७॥ गोकर्णपूर्व
वद्राजन्ब्राह्मणेभ्यःप्रदत्तवान्॥ स्वयंगोकर्णमागत्यदृष्ट्वातत्क्षेत्रवैभवं॥ ४८॥ लिंगंतत्रप्रतिष्ठाप्यरुद्रयोन्याकुरूद्वह॥ पूजयि
त्वायथान्यायंस्वस्थानमगमत्प्रभुः॥ ४९॥ सूतउ०॥ शातशृंगस्यदौभागोसमुद्रंपतितोन्नप॥ दुर्गाश्रृंगमितिख्यातंगोकर्णस्यो
त्तरेपतत्॥ ५०॥ नागश्रृंगमितिख्यातमपतद्दक्षिणेपुरा॥ तत्रमायोद्भवादुर्गाहत्वामहिषमोजसा॥ ५१॥ सिद्धिकामातपस्तेपे
साद्यापिकुरुनंदन॥ आगत्यनागश्रृंगात्तुनागराजोमहाबलः॥ ५२॥ संपूज्यशंकरंभक्त्यापुनर्गच्छेद्यथागतं॥ नागतीर्थमि
तिख्यातं सर्वपापप्रणाशनं॥ ५३॥ तीर्थमस्तिमहत्पुण्यं सर्वकामफलप्रदं॥ ५४॥ ॥इत्यादि० गोकर्ण० अध्यायः॥ ॥

त्रसंपूज्यदेवेशंपद्मनाभंसपद्मभूः॥शंखचक्रगदापाणिंश्रीवत्सांकितवक्षसं॥जिवेदयामासत
तोवेत्रासुरविचेष्टितं॥१५॥तच्छ्रुत्वाभगवान्देवः पुंडरीकनिभेक्षणः॥क्रोधमाहारयत्तीव्रंवधा
यास्यदुरात्मनः॥१६॥क्रुधस्यतस्यदेवस्यभ्रुकुटीकुटिलाननात्॥ब्रह्मणश्चमहत्तेजोनिर्ययौव
दनाद्दहि॥१७॥इंद्रादीनांचदेवानांललाटात्तेजआबभौ॥तच्चैक्यंसमपद्यतक्षणेनद्विजपुंगव॥१८॥
तत्तेजोववृधेब्रह्मन्नोरसीप्रत्यदीपयत्॥तत्क्षणादभवन्नारीदेवीदिव्यस्वरूपिणी॥१९॥यदभूच्छां
भवंतेजस्तेनाजायततन्मुखं॥याम्येनचाभवन्केशावाहवोविष्णुतेजसा॥२०॥सौम्येननेत्रेयार्युग्मंम
ध्यंचैंद्रेणचाभवत्॥वसूनांचकरांगुल्यःकौबेरेणचनासिका॥२१॥भ्रुवौचसंध्ययोस्तेजःश्रवणावनि
लस्यच॥अन्येषांचैवदेवानामभवत्तेजसाशिवा॥२२॥ततः समस्तदेवानांतेजोराशिसमुद्भवां॥तांवि
लोक्यमुदंप्रापुर्दैत्यासुरभयार्दिताः॥२३॥शूलंशूलीददौतस्यैचक्रंचक्रीतथाददौ॥ब्रह्मदंडंददौब्रह्मा

यमदंडंततोयमः ॥ २६ ॥ वरुणः पाशमददाद्वायुः शंखंप्रतापवान् ॥ इंद्रोवज्रंददौतस्यै शक्तिमग्निस्त
थापरे ॥ २५ ॥ पयःक्षीराब्धिरददाद्धंश्चूडामणिंतथा ॥ हिमवान्सिंहमददाद्रत्नानिविविधानिच ॥ २६ ॥
घंटांमैरावतोनागोददौतस्यैमहाबलः ॥ हारंकेयूरमुकुटान्विश्वेदेवाददुः पृथक् ॥ २७ ॥ एवंदेवाददुस्तु
स्यैमंडनान्यायुधानिच ॥ ततोननादसोदेवीरोदसीकंपयन्निव ॥ २८ ॥ ततश्चचालपृथिवीसशैलवन
काननाद्यौश्चापिचिक्षिपेवासस्तस्यानादेनभीषिता ॥ २९ ॥ सर्वमाविद्धमभवद्दौर्यःसद्भजनेन
च तांदृष्ट्वाजगदुर्देवाःस्तोत्रंतस्यैपृथक्पृथक् ॥ ३० ॥ जयत्वंदेविलोकानांमातात्वमसिभामिनि
प्रकृतिर्विकृतिःसूक्ष्मायोगनिद्राजभामिनी ॥ ३१ ॥ तयाग्रस्तमिदंसर्वंमायायासचराचरं त्वंस्वाहा
त्वंस्वधादेवीत्वंवौषट्कारोसिभाविनि ॥ ३२ ॥ क्रियाकालीकरालीचलक्ष्मीःपुष्टिःसरस्वती ॥ लज्जा
कीर्तिस्त्वंदेवीप्रभामायाश्रुतिःस्मृतिः ॥ ३३ ॥ बुद्धिःसिद्धिरलंकाराश्रीर्मेधामधुरासमा श्रीर्दे व

गर्भात्वंदेवीदेवभक्ताचभारती॥३४॥दित्यगर्भादितिस्त्वंहिभूतगर्भास्थिवापरा॥सुरसानागमा
तात्वंप्रकृतिस्त्वंतथापरा॥३५॥त्वयाततमिदंविश्वंमहामायेनमोस्तुते॥ब्रह्मचब्रह्मविष्णूचभ
वेतांतवसर्वदा॥३६॥धर्मार्थकाममोक्षाश्चनकिंदेहलभ्यते॥सुप्रसन्नासियस्यत्वंसदेवानात्रसं
श्रयः॥३७॥हेतुस्त्वंसर्वदेवानामृषीणामपिभाविनी॥विश्वंव्यवसितंदेविवेत्रासुरभयार्दितं॥३८॥
विश्वोपरेकणीयस्माच्छरणंभवनानघे॥शक्तिरित्यभिधीयतसर्वेषांप्राणिनांभुवि॥३९॥सात्वं
कमलपत्राक्षीब्रह्मादीनांवरानने॥त्वदपेक्षंजगत्सर्वंगीयतेससुरासुरैः॥४०॥त्वदुपेक्षयानवधेति
देवोदेवोत्तमोपिसन्॥स्थितिसंहारकारीत्वंभूतानांभूतभाविनी॥४१॥त्वमेवजानासिजगत
त्वांनजानातिकश्चन॥पुरुषाधिष्ठितत्वाच्चयोगनिद्रेतिगीयसे॥४२॥इदानींसर्वदेवानांदेहान
निष्क्रम्यनोभने॥स्वरूपेतेधृतंदेविदृष्टिगोचरतांगता॥४३॥दुर्जेयत्वादगम्यत्वाद्दुर्गादेवीति

न्निद्रामयं ॥ ४ ॥ सायोगनिद्रादेवेशविष्णोरमिततेजसः ॥ तदुद्भवंप्रवक्ष्यामिशृणुस्वस्त्ययनंमहत्
५ ॥ नाम्नावेत्रासुरोनामवेत्रावत्यामभून्नृप ॥ सिंधुद्वीपेमहावीर्यविंध्यनामाअजायत ॥ ६ ॥ प्राग्
ज्योतिषाधिपः सोपिबलवानरिमर्दनः ॥ भूर्लोकमजयत्सर्वंसनौलवनकाननं ॥ ७ ॥ जित्वाभू
र्लोकमगमन्मेरुपृष्ठंमहासुरः ॥ तत्रेंद्रंप्रथमंजित्वाअग्निमभ्यागमद्बली ॥ ८ ॥ अग्निनासहदे
वेंद्रः पलायनपरोभवत् ॥ प्राद्रवंतिभयात्तस्यदेवादेवर्षयस्तदा ॥ ९ ॥ तानिस्थानानिसंत्यज्य
ब्रह्मलोकंगताः किल ॥ कारयामासचेंद्रत्वमग्नित्वंचमहासुरः ॥ १० ॥ यमत्वंनिर्ऋतित्वंचवरु
णत्वंतदाप्रभुः निराकृताः सुरास्तेनब्रह्माणंसमुपागताः ॥ ११ ॥ शरणंभवभूतेत्याहुःस
र्वेसुरासुराः वेत्रासुरभयात्तेनामस्माकंसुरसत्तम ॥ १२ ॥ त्वयानाथेनदेवेशअनाथाइवसंप्रति
स्वानिस्थानानिसंत्यज्यगृहानपिधनानिच ॥ १३ ॥ केवलंत्वांवयंदेवजीवनार्थमुपागताः ॥ त

लनिर्हंत्रीजायाष्टन्नदिगंतरा छंदःस्वरूपिणीदेवीछागवक्त्रनिषूदिनी॥५४॥ जगन्माताजग
द्धात्रीजयाजयकरार्चना जटिलाजडलाहंत्रीजननीजावलप्रिया॥५५॥ सलदारवासंकाशं
कारितजगत्त्रया सर्झरीकृतदैत्येशरीकृतरूपारसा॥५६॥ ज्ञानव्रताज्ञेयरूपाज्ञेयाज्ञप्ति
स्वरूपिणी ज्ञानदत्सज्ञनिलया ज्ञानैश्वर्यप्रदायिनी॥५७॥ टंकमुख्यायुधधराटंकिताखुज्व
लागमा टंकारितधनुर्वल्लीटमंडलविभूषणा॥५८॥ डीवनीकृतपीयूषावसंग्रहविरोधिनी ड
दशष्टैकजननीडमूनाप्राकृतवारिधिः॥५९॥ डामरीडंभरहिताडमरध्वानहर्षिता डोभिकाकर
संहर्त्रीडाकिनीरूपधारिणी॥६०॥ ढक्कामंडितहस्ताढाढमट्टमरकप्रिया ढुंढीराजननीदेवी
ढणत्कारितभेरिका॥६१॥ नानादेवासुरसुता नानामंउणमंडिता॥ नानाविभवविस्तारानायका
नयशालिनी॥६२॥ ताटंकिनीतडद्रूपातारातत्वस्वरूपिणी तमालश्यायचिकुरातत्सदार्थविहा

पिणी ६३ स्थानत्रयविनिर्मुक्तास्थानदास्थानरूपिणी स्थूलादिमशरीरस्थास्थूलसूक्ष्मकारणरूपिणी ६४ दरहासमुखांभोजादाक्षिण्यामृतवारिधिः दयापरादानकर्त्रीदलत्कुवलयेक्षणा ६५ धनदाधनदेड्यांघ्रिधनधान्यविवर्धिनी धारावाहिरूपापूर्णधाराधरविहारिणी ६६ नंदिनीनादरसिकानवकांतिकनासिका नानावरवधूपूज्यानंदनादैकसाक्षिणी ६७ परास्मरणरूपस्यापापसंघविमर्दिनी पल्लवोल्लासिचरणापंचपूजापरायणा ६८ फणींद्रशायिनीदेवीफाणितालापमोहिनी फट्कारहतदुर्दैत्याफलितार्थमनोरथा ६९ बालाबालप्रियाबल्याबगलाबालिकेनरा भैरवीरंभिषग्रूपाभवाधंगिनरीरिणी ७० बलवीर्यगुणोपेतावडवामुखरूपिणी ७० भक्तवश्याभक्तमदाभावज्ञाभवतारिणी मायामधुमतीमान्यामदालसविलोचना महामहेशमहिषीमत्तभ्रमरकुंतला ७२ यज्ञः प्रदायज्ञभोक्त्रीयज्ञपूजितपादुका य

थार्थवादनिरतायावत्फलविधायिनी॥७३॥रसिकारमणीरामाराज्यादिफलदायिनी॥रक्षितेषभुवनारामानंदविधायिनी॥७४॥अलिताललक्षणपरालाकिनीलसुदीपिका॥लीलाविभूतिजननीलालितानेकसज्जना॥७५॥वरदावेद्यवेदाघ्रिवेदमूलनिवासिनी॥विश्वभर्त्रीविश्वगोत्रीविद्रुमाधरसुभ्रुवा॥७६॥नोखिनीनाकराधंगीशृंखलारंकभूषिता॥शर्मदाशांतहृदयाशयामाशातोदरीशुभा॥७७॥षोडशीषोडशकलाषोडशाणर्षडक्षरी॥षडिंद्रियाषडवरीषण्मुखप्रसवक्षितिः॥७८॥सहस्रशीर्षसावित्रीसरोजाक्षीसरस्वती॥संगीतसाहित्यपरासोजन्यकनिवासिनी॥७९॥हंसिनीहास्यरसिकाहालामदविघूर्णिता॥हारप्रियाहरिप्रीतिहर्षसंपत्प्रदायिनी॥८०॥लाक्षारुणपदद्वंद्वालीलासृष्टजगत्त्रयी॥लक्ष्मीकृतब्रह्मविद्यालक्ष्मार्तक्षणपूजिता॥८१॥क्षणदाक्षांतिदाक्षोणीक्षोभिणीक्षुभ्यदुर्जना॥क्षेत्रिणीक्षेत्रकरणीक्षितिःक्षितिधर

गीयसे ॥ त्वंसिसक्षात्सिद्धस्यमहादेवस्यशूलिनः ॥ ४४ ॥ रिरक्षयिषुरन्यांत्वंलोकस्यभुवनेश्व
री ॥ संहारकर्त्रीभवसिसंप्राप्तेयुगपर्यये ॥ ४५ ॥ तिरोधानकरीदेवीब्रह्मणः सत्यरूपिणः ॥ अनु
ग्रहविधात्रीचसर्व्वदानंसदाशिवे ॥ ४६ ॥ कामेश्वरीकामदात्रीकामेश्वरमनोहरा ॥ कलाकांता
कामदात्रीकालहंत्रीकिविप्रिया ॥ ४७ ॥ कलामालिन्यनुपमाकंदर्पोद्दारणप्रदा ॥ कंजातपत्रनयना
कलिसंहारकारिणी ॥ ४८ ॥ खगमारखगपृष्ठस्थाखमध्याखाटनप्रिया ॥ खंडेंदुमौलिमहिषीखंजरी
टदृगुज्वला ॥ ४९ ॥ गजराजगतिर्गात्रीगह्वरीगरुडासना ॥ गायत्रीगंधिलकचागानविद्याविशार
दा ॥ ५० ॥ घनकेशीघषाकारघंटारवविमोहिनी ॥ घस्मरीघनवक्षोजाघनारावकिरांविणी ॥ ५१ ॥
ज्ञानप्रियाज्ञानगम्याज्ञानाज्ञानविधायिनी ॥ ज्ञानरूपाज्ञेयरूपाज्ञात्रीज्ञाज्ञानवल्लभा ॥ ५२ ॥ चं
डिकाचंडनिनदाचंडांशुसदृशप्रभा ॥ चंद्रिकाहासवदनाचंद्रार्धकृतशेखरा ॥ ५३ ॥ छत्रिणीछ

युध्यंचकारधनुषान्नास्त्रैरस्त्रैश्चसायुधैः अस्त्राणिचकरांश्चापंप्रतिहत्यमहेश्वरी ९३ विव्याधवा
क्त्याहृदयेसगतासुभुविंगतः तस्मिन्हतेमहारौद्रेतस्सेनासोद्यतायुधा ९५ दुद्रावदेवीतरसाप्राक्षि
पच्चेद्रजालकं तत्सर्वंभस्मचिरसाद्दाहतरसाचिवा ९६ सैन्यंमोहेश्वरेणैवनिर्दग्धंमहेश्वरी घं
टांनिनादयामासरारवंदध्मौमहेश्वरी ९७ तच्छ्रुत्वापदृरीभार्यासुंदरीरूपधारिणी पपातपादयो
र्देव्याःपाहिपाहीतिवादिनी ९८ तामाहभूतांकौमारीनदीभूत्वामनोहरा विंध्यपर्वतमासाद्यप
श्चिमाब्धिमुपेयुषी ९९ गोकर्णमगमत्क्षिप्रंसर्वदेवैरभिष्टुता ततोदेवाः सगंधर्वाःसिद्धयक्षा
श्चपन्नगाः १०० तुष्टुवुश्चशुभैःस्तोत्रैर्निगमागमसंभवैः जयजयमहादेव्यसुरविमर्दिनिजय
जयवेत्रहेसुकपर्दिनि जयजयविश्वसुरवरदरूपिणिजयजयत्राश्वदनुग्रहकारिणि १०१

६अनेनैवचनेनान्नाविख्यातालोकपावनी इत्युदीर्यवरंदत्वातस्मैतच्चमहेश्वरी ×६

जयजयहरिहरदृष्टिविहारिणिजय२सुरुचिरसायकधारिणि जयजयघंटानादनिनादिनि
जयजयनारबधाननिवेदिनि २दुर्जनराक्षसभर्जनकारिणितर्जितमायावर्जितहारिणि
निरवधिगुणमणिनिरूपनहारिणिपरिचितनामदमभलविहारिणि ३पाहिसदानोभवसं
हारिणिदेहिभवत्पदधियमुपकारिणि ४ एतैः स्तोत्रैःशुभैर्देवीमुदितासिंहवाहिनी सर्वलो
कोपकारार्थंगीकर्णक्षेत्रसत्तमं ५ ततभृंगस्यनिरवेरयक्षिणीन्यवसत्सुखं सृत०नदाम्न
भृतितच्छृंगदुर्गाश्रृंगमितिस्मृतं ६ तत्रनित्यंहिदुर्गायाःसांनिध्यंपरिवर्तते एतत्सर्वत्रपरमंती
र्थानामुत्तमोत्तमं ७ कथंयंतुतथासर्वेदुर्गातीर्थंभृगूत्तमाः इतितस्यतुमाहात्म्ययेशृण्वंतिमु
दायुताः ८ तेषांचतीर्थसेवायाःफलंपुष्कलमिष्यते येशृण्वंतीममध्यायंदेव्यामाहात्म्यसत्व

सूत॰

के ९ तेसमस्तापदस्त्यक्त्वासंपदंप्राप्नुयुर्ध्रुवं ॥ १० ॥ इत्यादि॰ दुर्गतीर्थवर्णनंनामाध्यायः ॥
शृणुध्वमृषयः सर्वेपुराप्रोक्तंमयाखिलं ॥ महापापहरंपुण्यंरामायणमथाश्वरौनक ॥ १ ॥ पुराद्दाशरथी
रामस्त्ववतारश्चतुर्दशः ॥ सीतालक्ष्मणसंयुक्तःपितृवाक्यप्रचोदितः ॥ २ ॥ प्रविश्यदंडकारण्यंत्यक्त्वा
पंचवटीस्थलं ॥ दक्षिणाभिमुखोभूत्वासह्यमार्गेणनिर्ययौ ॥ ३ ॥ तत्रतत्रविचित्राणिक्षेत्राणिविविधा
निच ॥ नद्यःसरांसिपुण्यानिदेवतायतनानिच ॥ ४ ॥ दृष्ट्वास्थित्वातत्रमार्गेदृष्ट्वातत्रमहानदीं ॥ तत्रैव
वसतिंचक्रेमनआह्लादकेशुभे ॥ ५ ॥ सीतालक्ष्मणसंयुक्तमागतंमुनिपुंगवाः ॥ द्रष्टुकामाः समा
जग्मूरामंराजीवलोचनं ॥ ६ ॥ वसिष्ठोत्रिर्भरद्वाजोमृकंडुः कण्वगोतमो ॥ जमदग्निरगस्त्यश्चकश्यप
पोंगिरसासह ॥ ७ ॥ विश्वामित्रोगृत्समदः प्रजापालोरथंतरः ॥ एतेचान्येचबहवोरामंद्रष्टुंसमागताः
८ ॥ समागतान्ऋषिवरान्दृष्ट्वारामोदयानिधिः ॥ ववंदेचरणौतेषांससीतालक्ष्मणस्तदा ॥ ९ ॥ पप्र

प्रिया इत्यादिनामभिर्बुद्धिरीडितासासुरर्षिभिः दयारसार्द्रनयनोदेवीवाक्यमुवाच ह ८३ जानेहंभूसुरगणाभवद्भिरत्रयज्जभयं अपनेष्यामिनामाद्यसुरेवनस्थीयतांसुराः ८४ इत्युदीर्यमहादेवीनतदावेत्रवतींपुरीं समारुह्यमहासिंहंगत्वासर्वायुधोद्यता ८५ सिंहनादंननादोच्चैः सिंहेनसहशंकरी शंखंदध्मौमहादेवीप्रलयांबुदसन्निभं ८६ तच्छ्रुत्वावेत्रनामासौसहसैन्योविनिर्गतः दृष्ट्वातदामहामायांसर्वावयवसुंदरीं ८७ अद्भुताक्रान्तहृदयः प्राघूर्णितदृगंचलः महामहिषमारुह्यकालांजनगिरिप्रभं ८८ योद्धुकामस्तदादेव्याभ्रूभंगेनपाणिना व्याक्षिप्यप्राक्षिपद्दैत्यंसदृष्टदन्तानखदः ८९ अभवन्मंदीभूततन्निर्जितंप्रापलद्भुवि भ्रूभंगालोक्यनिर्भग्नं राक्षसःक्रोधमूर्छितः ९० विसृज्यसुमहानादमगादेवीनभागतः तमागतमभिप्रेत्यतदाहम हिषंहरिः ९१ विदारनखैस्तीर्णदंष्ट्राभिरुदरंतरे हतंतंमहिषंत्यक्त्वापद्मामेवमहासुरः ९२

इत्यगस्त्यवचःश्रुत्वासर्वेमुमुदिरेतदा॥२३॥रात्रौसुश्वनदीपुण्यारामपादपवित्रिता॥२४॥यस्यास्तीरेतपो
होमस्त्वेकःकोटिगुणोभवेत्॥सह्यपादसमुद्भूतासुरम्यालकलावती॥२५॥सर्वदाऽध्यरामनीनदीपु
ण्यजनाश्रया॥माघमासेविशेषेणप्रातःस्नानवतांनृणां॥२६॥सर्वाभीष्टप्रदानित्यंचातुर्वर्ण्यनिषे
विता॥किरातीचतपोमासिकलावत्यांचकर्हिचित्॥२७॥सूर्योदयेमुखंस्नात्वचंद्रमुख्यन्यजन्मनि॥
वरमोहकरीभूत्वाशिवयोगिप्रसादतः॥२८॥स्नानानिरंतरंतत्रशिवलोकंजगामसा॥ऋषय०॥त
त्कथंवदनःसूतश्रोतुःकर्णामृतप्रदं॥२९॥किरातीकुत्रचस्थायीकथंजाताकदाचसा॥मुखप्रक्षा
लनंकृत्वासुमुखीत्वन्यजन्मनि॥३०॥शिवयोनिंकदाप्राप्यअवदत्किंमहामुने॥एतच्चान्यच्चवि
स्तार्यवदनःसूतनंदन॥३१॥सूत०॥शृण्वंतुऋषयःसर्वेभवंतोभगवत्तराः॥वक्ष्येपुरातनींपुण्यांक
थांपापापनोदिनीं॥३२॥सह्यवर्ल्यांपुराकश्चित्किरातोभंगुराह्वयः॥तस्यपत्नीचंडकेशीस्वधर्मो

चरणेरता ॥ २७ ॥ कलावत्यास्तटेरम्येप्रगाथोनामवेमुनिः ॥ आश्रमंकल्पयित्वात्रनित्यकर्मचकारह
२१ ॥ तस्यशिष्यामहात्मानः प्रातःस्नानपरायणाः ॥ कर्माणिकृत्वापूर्वाण्हेजजपुर्वेदसंहितां ॥ २२ ॥ भं
गुरोप्यकरोत्पल्लीतस्याश्रमसमीपतः ॥ नित्यंमृगयुवृत्यासौवर्ततेसह्यकंदरे ॥ २३ ॥ कदाचिन्माघमा
सेतुऋषिकन्याभगोदये ॥ प्रातःस्नानंकलावत्यांचक्रुर्नियतमानसाः ॥ २४ ॥ एवंदिनेदिनेकन्याः प्रा
तः स्नानमकुर्वत ॥ करोद्गुरुःस्यात्सारात्रौमुक्त्वाचहृष्टधीः ॥ २५ ॥ चंडकेशींसमाहूयइत्थमाज्ञापय
त्तदा ॥ शृणुत्वंमद्वचोभार्येवनेस्मिन्पर्यटन्नहं ॥ २६ ॥ नपश्यामिमृगानद्यहताःसर्वेदिनेदिने ॥ अहं
श्वः प्रातरुत्थायवनमन्यद्व्रजामिभो ॥ ३७ ॥ अरुणोदयवेलायामुत्थायत्वयनाल्लघु ॥ पाकंकुरुत्वंय
तेनपाथेयार्थंचभामिनि ॥ २८ ॥ इत्युक्तासोपिसुप्तापतयासाकंचपुत्रकः ॥ निद्रांकृत्वाचंडकेशी
स्मरंतीभर्तृचोदनां ॥ २९ ॥ रात्र्यांचोत्थायवेगेनजलांतंप्रययौचसा ॥ तस्मिन्कालेकलावत्यांचंद्रमा

गर्यमोदये॥४०॥स्नानंकुर्वंतिताःकन्याःसाचदृष्ट्वानिविस्मिता॥द्रोनेरभ्याशमागत्यचंडकेशीवचोब्रवी
त्॥४१॥स्त्रियोवैप्रातरेवाशुमहाशीतप्रकंपिताः॥स्नानंकुरुतयूयंवैकिमेतेनभवेच्चवः॥४२॥चंडकेश्या
वचःश्रुत्वाऋषिकन्यास्तदोचिरे॥पुल्कसिश्रृणुनोवाक्यंमासैमासोतिपुण्यदः॥४३॥कालेस्मिन्नव
स्नानंयंमनुजैःपुण्यकांक्षिभिः॥स्त्रियोवापुरुषोवापिनानावर्णजनाअपि॥४४॥स्नातव्यंसर्वथामर्त्यै
र्जन्मांतरशुभेप्सुभिः॥अस्मिन्नजनाः स्नानंवैतोभवेन्यस्मिन्महाधनाः॥४५॥राजानोराजपत्न्यश्चरूप
सौंदर्यशालिनः॥भविष्यंतिकलावत्योनात्रकार्यविचारणा॥४६॥इतितासांवचःश्रुत्वाहसंतीपुनर
ब्रवीत्॥शीतानोहंवराशाहाः स्नानंवैकर्तुमक्षमा॥४७॥किंत्वास्यक्षालनंनित्यंकलावत्याकरोम्यहं॥
इत्युक्त्वाजलमादायपद्मपर्णंसायंयोतदा॥४८॥भित्त्वैपाथेयकंकृत्वाप्रेषयामासभामिनी॥श्रद्दधानाचं
डकेशीकालेचोत्थायभामिनी॥४९॥कलावतींचसंप्राप्यमुखंप्रक्षालयत्यसौ॥इत्थंचकारसानित्यं

कुशलंतेषामुपेवेश्यवरासने॥ रामस्यवचनंश्रुत्वासर्वेमुनिपुंगवाः॥१०॥ ऊचुःप्रांजलयःसर्वे
विनयानम्रकंधराः॥ ऋषय ऊचुः॥रामराममहाबाहोसर्वज्ञापन्नवत्सल॥११॥त्वत्कृपालेशसामर्थ्या
त्सर्वेकुशलिनोवयं॥इत्युक्त्वाकथयांचक्रुः कथानानाविधास्तदा॥१२॥वेदार्थांश्चपुराणार्थांश्छा
स्त्रार्थांश्चेतिहासकान्॥तच्छ्रुत्वामुदितोरामइदमाहर्षिसंसदि॥१३॥सर्वेशृण्वंतुऋषयःकिम
र्थंमन्मनोत्रवै॥अतिसंतोषजनकंकारणंब्रूतमाचिरं॥१४॥श्रुत्वातुऋषयःसर्वेमौनमास्थायत
स्थिरे॥ध्यात्वागस्त्यस्तदाप्राहरामंदाशरथिंमुनिः॥१५॥रामराममहाबाहोचरितंतवचाद्भुतं॥इ
तःप्राक्कृतयुगेकल्पेअवतारत्रयोदशे॥१६॥सीताकल्याणमत्रासीत्पुण्यनद्यास्तटेशुभे॥स्थित्वा
बहुदिनंचात्रसीतयासहसंगतः॥१७॥अस्यांमहाशिलायांतुबाणघर्षमकारषीः॥तदत्रदृश्यतेरामशि
लेघर्षितबाहुभिः॥१८॥नदीलिंगंतदारभ्यशरावत्यभिधीयते॥तस्मादद्यापिसंतोषस्तवजातानसंशयः॥

अनुज्ञाताचसाविप्रयमेनापिप्रपूजिता॥साचमंत्रीसमंप्रापभूतलंशुभचारिणी॥६०॥प्रा
प्यक्षत्रकुलेजन्मजयंतीवासुताभवत्॥त्रिगर्ताधिपतेःपुत्रोबभूवासौचतत्पतिः॥६१॥चंद्रव
र्मचंद्रमुखीनाम्नातौसंबभूवतुः॥कालेनोद्वाह्यतांकन्यांचंद्रवर्मनृपोत्तमः॥६२॥भासमान
मुखींदृष्ट्वाजायांविस्मयमापिरे॥राजापितादृशींदृष्ट्वाद्योतमानमुखींमुदा॥६३॥सर्वदाविस्मयाप
न्नःकिमेतदितिचिंतयन्॥कदाचिदाययौकश्चिच्छिवयोगीनृपांतिकं॥६४॥तमागतमभि
प्रेक्ष्यचंद्रवर्मानृपोत्तमः॥अभ्युत्थायासनंदत्वापूजयामासभक्तितः॥६५॥तमपृच्छन्महारा
जशिवयोगिनमादरात्॥शिवयोगिन्महाभागमार्ययैषमेवरांगना॥६६॥प्रकाशमाननेत
स्यामुखमात्रंवदस्वमे॥इतिराज्ञोवचःश्रुत्वाध्यात्वायोगिवरस्तदा॥६७॥सर्वमाचष्टतस्यैस
तस्याःपूर्वकथांशुभां॥तच्छ्रुत्वानृपतिःपूर्वंप्रीत्यासंपूज्ययोगिनं॥६८॥सभार्योमकरोमासि

कलावत्यांनृपोत्तमः॥ चकारविधिवद्भक्त्यामृदंलिंगाकृतिंतदा॥६९॥ पूजयामासराजासौ
मासमेकमतंद्रितः॥ एवंवर्षत्रयंकृत्वाचंद्रवर्मानृपोत्तमः॥७०॥ पुत्रंस्थाप्यस्वकेराज्येसभा
र्यः पुण्येगोरवात्॥ केरूरासमगमद्विप्रामोदमानोविमानगः॥७१॥ कलावतीमहापुण्या
घमासिविशेषतः॥ स्यांतस्नानवतांनृणांभगवल्लोकदायिनी॥७२॥ इत्यादि॰ एकोनस
प्ततितमोध्यायः॥६९॥ सूतः॥ ततः सुम्नानदीपुण्यासह्यपादसमुद्भवा॥ पश्चिमाभिगता
विप्रसर्वकामफलप्रदा॥१॥ धनुर्मासिचसुम्नायांस्नानंभास्करोदये॥ सुम्नानद्यांधनुर्मा
सेमासमेकंनिरंतरं॥२॥ स्नात्वासंपूज्यविधिवत्सूर्यायार्घ्यप्रकल्पयेत्॥ तस्मैनिवेद्यदध्यन्न
मरुणोदयकालतः॥३॥ सूर्यलोकमवाप्नोतिसर्वसंपत्समन्वितः॥ तत्पुरस्तान्महापुण्यासुम्
नावत्यभिधानदी॥४॥ सह्याद्रिनिरवंभूयसंपृक्ताव्यागस्त्यमाश्रमं॥ पश्चिमाभिगतासाहि

ओ तांदृष्ट्वातोषितोविप्रस्तस्याश्चक्रेससत्क्रियां दिनेदिनेवर्धमानापितुर्गेहेमुनिस्मिता ×ओ

तृणबिंदुकुटीतिके ५ तृणबिंदूश्रमंपुण्यं नदीसागरसंगमे लिंगतत्रप्रतिष्ठाप्य तृणबिंदुर्महात
पाः ६ त्रिकालमर्चयन्नित्यं शिवसंसक्तमानसः सोमवारविशेषेणमुनिः पूजयतेशिवं ७
अत्रैवोदाहृतंपूर्वमितिहासंपुरातनं शिवभक्तिप्रदंनृणांश्रोतृणांविस्मयप्रदं ८ पुराकेवर्तकेदे
शेकश्चिद्ब्राह्मणपुंगवः धर्मगुप्तइतिख्यातः सर्ववेदांगपारगः ९ आतिथेयोग्निशुश्रूषुः सदाचि
नाकुलोभवत् नरकोत्तारणःपुत्रः कथंमेसंभवेदिति १० इतिचिंतयतस्तस्यमतिरासीच्छिवा
र्चने भक्त्यासदाशिवेविप्रोनित्यपूजापरोभवत् ११ तस्यकालांतरेपत्नीलेनवल्लीतदाभवत्
दृष्ट्वातांसुमुदंविप्रः शिवः प्रीतोभवन्मम १२ साचापिसुषुवेकन्यांसर्वलक्षणसंयुतां मतंगोमुनि
र्गार्हूलःकदाचित्तस्यमंदिरे १३ आययौचमध्यान्हेतंदृष्ट्वापूजयद्द्विजं संपूज्यविधिवद्धृत्याचा
मनेचोपवेश्यते १४ श्रमापनोदंकृत्वाभोजयित्वाचतेमुनिं कन्यांतन्निकटेस्थाप्यमतंगपर्यपृच्छत्

२१२

मासमेकंनिरंतरं॥५०॥एवंबहुतिथेकालेतस्याभर्तमिमारच॥भर्त्रासार्धंमिलासाचपथासंय
मिनींययौ॥५१॥यमोदृष्ट्वाभासयंतींमुखंकांत्यादिशोदश॥आश्चर्यंपरमंकृत्वाचित्रगुप्तमपृ
छत॥५२॥चित्रगुप्तेदमाश्चर्यंकिमेतद्यन्मुखंशुभं॥प्रकाशतेतिबहुशस्त्वनयाकिंकृतंवद॥५३॥
यमभाषितमाकर्ण्यचित्रगुप्तोवचोब्रवीत॥इयंवैपुल्कसीसाध्वीनित्यंस्वाचारतत्परा॥५४॥द
षिकन्योपदेशेनमाघमासेत्वियंशुभा॥मुखंक्षालयतेनित्यंकलावत्योकुतूहलात॥५५॥का
लेचोत्थायताःकन्याःसस्नुस्तद्वाक्यचारिणी॥तस्मात्कांतिमेतस्यामुखमासीच्चेवयम
५६॥इयंभर्त्रापुल्कसेनसार्धंभूतलवासिनी॥महाराजकुलोत्पन्नाद्योतमानमुखांबुजा॥५७॥
शिवयोगिप्रसादेनकृत्वामाघेचमज्जनं॥भर्त्रासार्धंबहून्भोगान्भुक्त्वेतेशिवमाप्स्यति॥५८॥
इतिश्रुत्वाचित्रवचोयमःसंपूज्यतांमुदा॥संप्रेषयामासतदाभर्त्रासाकंवरांगनां॥५९॥

विदुद्राववेगतः मांसबुध्याचकरटासमंताद्दुद्रुवुर्भयात् २७ त्रिःप्रदक्षिणमावृत्य श्येनतुंडहताचसा
उड्डीयोड्डीयतस्सासुम्नावत्यांपपातह २८ गाढप्रहाराभिहतातस्योमेवममारह शिवदूताश्चतांवेगात्
निन्युःकैलासपर्वतं २९ सातत्रभोगान्भुक्त्वाचतवपुत्रीत्वमागता पुत्र्येषाप्राग्भवेविप्रपूजादर्शनहेतु
ना ३० सुम्नावतीस्नानपुण्यादिहाप्यस्यामतिःशिवे सह्य पश्चिमदिग्भागेपुण्येसुम्नावतीतटे ३१
उटजेतृणबिंदोश्चअनयासहयाहिच कस्मैचिद्द्विजपुत्रायतत्तीरेऋषिसंनिधौ ३२ विवादंकुरुविप्रे
द्रशिवलोकंगमिष्यसि इत्युक्त्वाप्रययौविप्रामतंगोदक्षिणांदिशं ३३ दुर्गांभगवतींपूज्यस्वाभीष्टप्राप्तु
मुत्सुकः अथविप्रः सभार्यासापुत्र्यासाकंमहामनाः ३४ मुनिःप्रविष्टोमार्गेणिप्रापसह्याचलंशुभं
शृंगंनिर्झरनिर्यातंदृष्ट्वासुम्नावतींनदीं ३५ स्नात्वासंतर्प्यदेवर्षिपूर्वजांश्चस्वराकृतः अगस्त्यशि
ष्यंदृष्ट्वात्रनमस्कृत्यययौद्विजः ३६ तृणबिंदाश्रमंप्राप्यदृष्ट्वासागरमद्भुतं तृणबिंदुंनमस्कृत्य

तस्मैसर्वज्ञवेदयत् ३७ श्रुत्वामुनिस्तदाप्रीत्याश्रमंतंनिवेश्यच कस्मैचिद्द्विजपुत्राय
तांचकन्यामदापयत् ३८ शिवपूजापरानित्यंसर्वेतेद्विजपुंगवाः सुस्नातास्तानपराः शि
वभक्ताः शिवव्रताः ३९ प्राप्तिरेपरमांमुक्तिंतृणबिंदुप्रसादतः तत्तीरेतृणबिंदुश्चबहुकालम
नंदितः ४० सोमवारविशेषेणतल्लिंगेपूजयाञ्चवै संपूजितोमहादेवः कश्चिद्दीनतृणबिंदुना
प्रत्यक्षमगमच्छंभुर्भक्तानांभीष्टदायकः आविर्भूतंशिवंदृष्ट्वातृणबिंदुःस्वलिंगके ४२ स्तु
त्वास्तवैरनेकैश्चप्रणनामपुनःपुनः दृष्ट्वासदाशिवोभक्तंतृणबिंदोस्तदास्वयं ४३ वरंवृणी
ष्वचमुनेवरदोहंसमागतः महादेववचः श्रुत्वातृणबिंदुर्न्यवेदयत् ४४ शिवशंकरविश्वात्म
न्महादेवदयानिधे त्वद्दर्शनमपुण्यानांदुर्लभंखलुसाम्प्रतं ४५ तथापिवेदवेद्येशकृपयादा
तुमर्हसि मयार्चितेस्मिन्वैलिंगेसांनिध्यंकुरुशंकर ४६ इतितस्यवचःश्रुत्वाहरःकारुण्य

वारिधिः॥ प्राहगंभीरयावाचाहर्षयंस्तस्यमानसं॥४७॥यस्मात्वयासोमवोरपूजितंलिंगमुत्तमं
तस्मात्सोमेश्वरानाम्नेवलोकेख्यातिंगमिष्यति॥४८॥सर्वदासोमवोरहंलिंगेस्मिन्मुनिपुंगव॥तत्रैवस
न्निधौभूयवरदोत्रभवाम्यहं॥४९॥योवापिमनुजोभक्त्यासोमवोरविशेषतः॥सुस्नावत्यांकृतस्ना
नः सोमेशंपूजयेद्भुवि॥५०॥तस्याहंवरदोनित्यमित्युक्त्वात्रैवलीनवान्॥सूत०॥तस्माद्भुविसदामर्त्य
श्चतुर्वर्गफलेप्सुकः॥५१॥सुस्नावत्यांकृतस्नानः सोमेशंपूजयेत्तवै॥५२॥इत्यादि० मत्संतितम्
७०॥ऋषय०॥भगवन्सूतसर्वज्ञमतंगोमुनिपुंगवः॥दुर्गांपूजयितुंप्रागादित्युक्तंचत्वयापुरा॥१॥
देवीभगवतीदुर्गाकुत्रास्तितद्वदस्वनः॥सूत०॥पुरासनत्कुमारायस्कंदेनोक्तंवदामिवः॥२॥श्रो
तृणांसर्वपापघ्नमतिविस्मापनप्रदं॥अस्तिकश्चिद्गिरिवरः कुटजोनामविश्रुतः॥३॥सह्यमस्त
कनिर्भिन्ननिरवेभूमिमंडले॥दिव्यौषधिसमाकीर्णोमृतसंजीवनप्रदः॥४॥सर्वतःकुसुमो

ब्राह्मण० इयंकांतिमतीबालाशिवपूजापरायणा बाल्यचापल्यकेत्यक्त्वाशिवसेसक्तमानसा १७ कि
मर्थंमुनिश्रार्दूलबालिकापीदृशीसुता अस्याःपूर्वभवंब्रूहिसुतायाममवैमुने १८ इतितस्यवचःश्रु
त्वामतंगोमुनिसत्तमः ध्यात्वामुहूर्तंविप्रेंद्रोज्ञात्वातंमुनिमब्रवीत् १९ इयंपूर्वभवेकाचित्क्षुधार्क्षीतव
सुताभवत् तृणबिंदाश्रमेपुण्यसुम्नावत्यधिसंगमे २० सचनित्यंशिवंध्यायन्सदाचीतत्परोभवत्
विल्वपत्रैश्चकल्हारधतूरैर्दोणिपुष्पकैः २१ तिलाक्षतैश्चसंपूज्यनिर्मल्यंविसृजत्यधः क्षुधार्क्षीतत्रा
क्षताकांक्षीयावत्पूजासमापनं २२ परयंतीशिवपूजासातावत्तत्रैवतिष्ठति पश्चात्तदक्षताभुक्त्वास्वनि
कायंप्रयातिसा २३ एवंदिनेदिनेतस्यावृत्तिरासीद्द्विजोत्तम सकदाचित्तृणबिंदुःसोमवारेतिभक्तितः
नैवेद्यंविविधंकृत्वाभक्ष्यभोज्यैरनेकशः पूजावसानेनिर्मल्यंव्यसृजन्मुनिपुंगवः २५ क्षुधार्क्षीतत्रसमा
गत्यभक्ष्यंनिर्मल्यमध्यगं चंडेश्वरार्चितंदृष्ट्वास्वनिकायंगमत्तदा २६ इयेनःकाश्चिदभिप्रेत्यतां

मृदुलोदेहस्तवबालाद्यदृश्यते॥इंद्रवज्रप्रहारोहिपाषाणादपिनिष्ठुरः॥यमदंडोमहाघोरोअग्नि
रग्निःसुदारुणः॥१५॥निर्ऋतेःखड्गधाराहिखंडेखंडेकरोतिहि॥पाशःसलिलराजस्यकेनापिस्प्र
ष्टुमक्षमः॥१६॥वायोर्बाणामहाक्रूरास्तलाणाकारवर्जिताः॥यक्षराजगदाभीमाशिलावटविदा
रणा॥१७॥ईशानस्त्रिशिखाबालसर्वावयवकृंतनी॥नासत्योवसवश्चोग्रायुद्धेनिर्जेतुमक्षमाः॥
१८॥अन्येषांदेवसंघानामायुधान्यसहस्रशः॥निकृंतंतिचममाणिसर्वांगेषुचबालिश॥१९
तवज्येष्ठानुजोनैवबलमेकाकीचदुर्बलः॥कथंकार्यंभवेदस्यममबालस्यहेविधे॥२०॥दृष्ट्वेमोह
गतंनाथंदृष्ट्वामकलथास्थितः॥निरीक्ष्यहस्तोहुरुत्यजगामतपसेगुहो॥२१॥पित्रानिवार्यमा
णोपिमोनमास्थायबालकः॥महाविलंबंविदधासावकरोदुश्चरंतपः॥२२॥बालोपिचनिराहा
रोधातारंमनसास्मरन्॥सुतृप्तोतेपिबहुशोनचचालक्षणादपि॥२३॥मूकस्योग्रेणतपसा

क्षुभितोभून्महागिरिः ॥अशुष्यन्सागराः सर्वे दिव्योषधिगिरावपि॥२४॥लोकाश्चुक्षुभिरेस
वेदेवालिल्मुस्तदास्वयं॥चकंपेवसुधासर्वसशैलवनकानना॥२५॥चुक्षुभुः सागराः सर्वस
रांसिसरितोपिचाक्षुभ्यंजगत्त्रयंदृष्ट्वा ऋषयोब्रह्मवादिनः॥२६॥ब्रह्माणंप्रोचुरभ्येत्यमूकदान
वचेष्टितं॥ब्रह्मासमाजगामाशुदृष्ट्वासमारुह्यसत्वं॥२७॥कुटजाद्रिंसमासाद्यतदक्षिणबिलेस्थि
तं॥मूकंदृष्ट्वाचरुषयाक्षुत्तृषार्तिप्रपीडितं॥२८॥प्राक्षिपज्जलधारांचतन्मुखंकुडलुस्थितं॥पी
त्वामूकोतिलक्षितःप्रहसेनांतरात्मना॥२९॥जलधारांबलंमित्वाप्रद्रवद्भूतलंत्वथ॥अद्यापि
दृश्यतेधारासर्वाघौघहराभवत्॥३०॥मूकोपिनत्वाधाराभिर्दृष्ट्वाब्रह्माणंमादायतुष्टावकमला
सनं॥३१॥मूक॰॥नमोविसृजतेविश्वंपालयित्रेजरायच॥नमस्तेब्रह्मणेशास्त्रमूलप्रलतिहतव
॥३२॥सत्यायसत्यरूपायत्रिसत्यायनमोनमः॥सत्यव्रतायकवयेवयंसेपरमर्षिने॥३३॥सत्य

मागते॥शिरस्यंजलि

लोकनिवासायसत्यमूलायसत्त्विणे॥देवायदेववंद्यायदेवेशायादिहेतवे॥२५॥
त्रिसंध्यायत्रिरूपायगायत्रीपतयेनमः॥सर्वेश्वरायसर्वयिसर्वभूतदयावते॥२६॥सर्ववेद्यायस
ध्यायनमोस्तुपरमात्मने॥इतिस्तुत्वामूकदैत्योदंडवत्प्रणनामसः॥२६॥उत्थायबालहस्ताभ्याम
स्थिमात्रावशेषितं॥दृष्ट्वोवाचजगतांपतिः॥२७॥वृणीष्वमूकमत्तस्त्वंवरंतम
नसेप्सितं॥दास्यामिबालिनाहंतेमूकनैवात्रसंशयः॥२८॥सूत०॥इत्थंविधिवचःश्रुत्वामू
कोदानवसत्तमः॥कृतांजलिर्वरंवव्रेत्रिवमायाविमोहितः॥२९॥देवदानवगंधर्वविद्याधरमहो
रगैः॥यक्षकिंनरसंघैश्चब्रह्मविष्णुमहेश्वरैः॥४०॥सर्वैश्चमानवैर्मुन्मातिर्दहिकंत्विमंमूक
वाक्यमितिश्रुत्वाब्रह्माचिंतासमाकुलः॥४१॥कृच्छ्रान्नदोमितिप्रोच्यसत्यलोकंजगामहगते
ब्रह्मणिदैत्योसोमूकःसंतोषनिर्भरः॥४२॥प्रणम्यपितरंतस्मैन्यवेदयदरिंदमः॥दुंदुभिस्तद्वचः

पेतद्रुमसंघावृतोगिरिः देवकिंनरगंधर्वविद्याधरमहोरगैः ॥५॥ उपास्यमानोमनुजैर्मंत्रसिध्य
भिकांक्षिभिः ॥ महाबलस्त्रिकुटजलतामंडपमंडितः ६ योगिनीयोगनिलयोगौरीमंदिरको
ज्वलः ॥ अस्मिन्गिरौसदागौरिनिवासोब्रह्मणाकृतः ॥ ७ ॥ वसिष्ठवामदेवाद्यैर्ऋषिसंघैरुपा
सितः ॥ अस्मिन्गिरौपुराविप्रादुंदुभिर्नामदैत्यराट् ॥ ८ ॥ निवासमकरोन्नित्यंसर्वदेवगणान्वि
तः ॥ ब्रह्माणंतपसाराध्यपुत्रंलेभेसदैत्यराट् ॥ ९ ॥ मूकाभिधानंचक्रेसदुंदुभिः स्वसुतंतदा म्
कनामासदैत्येंद्रोवर्धेपितृवरात्मनि १० वर्धमानंसुतंदृष्ट्वादुंदुभिस्तोषनिर्भरः कदाचि
दुंदुभिः पुत्रमंकेसंस्थाप्यलालयन् ११ अयेबालातिरूपेणदुर्बलातिबलोन्मदान् दुर्जया
न्सर्वसंपन्नान्कथंजेष्यसिनिर्जरान् १२ ब्रह्मविष्णुमहेशानादेवार्थेत्यक्तजीविताः बृहदुसा
हानिंद्रादीन्युद्धेजित्वातिबालिश १३ पितृपैतामहंराज्यंकथंवापालयिष्यसि अतीव

स०पू०
२१८

यज्ञान्विध्वंसयामासब्राह्मणान्मनुजानपि। बबाधेबहुशोमूकः सर्वेषामंतकोपमः॥कदाचिद्धि
बुधाःसर्वमेरुकंदरवासिनः॥२४॥मंत्रयांचक्रिरेहंतुंमूकदानवमुद्धतं॥ब्रह्मविष्णुमहेशानैः
सर्वैर्देवैःसवासवैः॥२५॥अवध्योमूकदैत्योसौपुमान्नरैरपिसर्वदा॥अतोदुर्गमिवेगेतीप्रार्थयित्वा
ह्येनकान्नराः॥५६॥तयेवबध्योदैत्योसौनान्यथाहंतुमक्षमः॥सादेवीकुत्रचाप्यास्तेकैलासेमंदरेपि
वा॥५७॥द्रोचेणेलेवाकाश्यांवाकोच्यांसह्याचलेपिवा॥इतिवादिषुदेवेषुमुनिरूद्दालकोब्रवी
त्॥५८॥देवाःशृणुतमद्वाक्यंदेवीस्थानंवदाम्यहं॥पुराश्रमथकेकल्पेत्रेतायाश्चयुगावधौ॥५९॥
अवतारेषाऽशकेरामोराजीवलोचनः॥सीतालक्ष्मणसंयुक्तोदंडकारण्यमाप्तवान्॥६०॥रक्षसाप
हृतासीतारावणेनदुरात्मना॥तदारघुपतिर्वीरःसुग्रीवादिभिरन्वितः॥६१॥अगाधेसलिलेध्वो
ढ्वधनुषास्तीर्यसायकान्॥सर्वैरूबलैःसार्धंतस्यापरियथाक्षयं॥६२॥एवंतीत्वासागरसत्वं


२१८

कायंराक्षसान्बहून् हत्वातत्सचिवान्त्रामः कपिभिर्बलशालिभिः ६३ चकारकोदंडरवंरक्षो
यूथभयप्रदं तच्छ्रुत्वामेघनादोसौदिव्यायुधविदुत्तमः ६३ क्रोधेनागत्यवेगेनयुद्धंकृत्वामहाबलः
नागास्त्रेणकपीन्सर्वान्निरामंचापिसलक्ष्मणं ६४ जांबवंतंतथाऋक्षंबबंधरणमूर्द्धनि तदाबध्वा
मेघनादोजगामशिबिरायवै ६५ बद्धास्तेनागपाशेनमूर्छामापुः सुदुःसहां जांबवांस्तदभिप्रेत्यह
नूमंतमब्रवीत् ६६ उत्थाप्यमंत्रयित्वातान्चेष्टवंगसत्तमः हनूमन्मेघनादास्त्रमूर्छितान्रक्षमा
शुचः ६७ मेरास्तरदिभागेद्रोणाख्यपर्वतोत्तमे दिव्योषधान्यनेकानिमृतसंजीवकानिच ६८
संतितत्रमहाशैलेयोजनायतविस्तृते त्वंगच्छशीघ्रंहनुमन्मृतसंजीवमानय ६९ सरामाः कपय
स्त्वतद्बाणान्मग्निरवने श्रुत्वाऋक्षपतेर्वाक्यंहनूमान्मारुतात्मजः ७० कृत्वाप्रणाममृक्षेशंययौ
वाकाशमार्गतः तत्रगत्वौजनीसूनुर्वायुवेगनवेगतः ७१ द्रोणाचलंतत्रदृष्ट्वानापश्यद्दिव्यमोषधं

कालेनाक्रम्यहनुमान्भुजाभ्यांतरसागिरिं॥७२॥धृत्वाशिरसिवेगेनपुनरायान्महाजवः॥जांबवान्निक
टेस्थाप्यतस्थौकपिवरस्तथा॥७३॥आनीतंपर्वतंदृष्ट्वाजांबवानतिविस्मितः॥अहोसाहसमाकार्षी
न्मोमेरुतात्मज॥७४॥दैत्यैर्हतानांदेवानांपुनरुज्जीवनप्रदः॥व्रणघ्नांतिकरंचापिवाणासाटनकं
तथा॥७५॥मृद्धोपोत्कराद्रिनिवसंत्यत्रमहाचले॥अस्याभावेसुराः सर्वेमृताएवनसंशयः॥७६॥
गौरिशृंगंवेदशृंगमप्सरःशृंगकंतथा॥गंधर्वकिंनराणांचपुरंपोरगरक्षसां॥७७॥प्रत्येकंशिखरा
ण्यत्रदेवस्त्रीणांपृथक्पृथक्॥वसंतेहनूमंस्त्वंहिपुनः स्थापयतत्रहि॥७८॥इत्युक्तोषधिमादायहनू
मंतमचोदयत्॥हनूमांस्तुचिक्षेपवालाग्रेणातिवेगिना॥७९॥पर्वतागमनेकालेसद्योपरिसुरात्म
नः॥गौर्याख्यंकूटमपतद्दिव्यौषधिसमन्वितं॥८०॥लिंगरूपेणसोदेवीमूलप्रकृतिरव्यया॥अस्तिस
ह्याचलेदिव्येतल्लिंगंशृंगमावृणोत्॥८१॥भवंतोत्रगछंतुखाल्वाचगिरिकंदरं॥लिंगंचमत्का

श्रुत्वाहर्षनिर्भरमानसः ॥४३॥मूकंप्रोवाचमुनयः स्वर्गोविजेष्यतामिति॥मूकंसमागतंश्रुत्वास
र्वेदैत्यदानवाः॥४४॥आजग्मुःसहसाविप्रादानवाद्रष्टुमुत्सुकाः॥पातालनिलयाःकेचि
च्चिद्भूतलवासिनः॥४५॥महाबिलस्थाःकेचित्तुकेचित्पर्वतवासिनः॥तेसर्वेकुट्टंप्राप्यप्रोचुःप्रोज
लयासुरं॥४६॥स्वर्गाधिपत्यमस्माकंपूर्वमासीन्महामते॥देवैर्विष्णुसमाश्रित्यराज्यंनोहृतमादि
तः॥४७॥तद्राज्यमानयबलादस्माकंमूकदानव॥अतुल्यबलवीर्यस्त्वंब्रह्मदत्तवरोद्धतः॥४८॥इं
द्रंजहिमहावीर्ययुद्धेदेवगणैःसह॥इत्युक्तोदानवैर्मूकःप्रययावमरावतीं॥४९॥सर्वदैत्यगणोपेतः
सर्वायुधधरोसुरः॥पुरंनिर्भिद्यतरसाभित्वागोपुरसंकुलं॥५०॥हत्वादेवगणान्सर्वान्द्रावयामा
ससोसुरः॥हतशिष्टदेवगणाःप्राणत्राणपरायणाः॥५१॥संमन्त्र्यदुद्रुवुर्देवपुरींत्यक्त्वामरावतीं॥इ
त्थंविद्राव्यमूकोसौस्वर्गंस्ववशमाप्यच॥५२॥बुभुजेसकलान्भोगान्कुटजाचलसंस्थितः॥

येगुणेभ्योयेगुणातीतेनमोनमः ॥९२॥ गुणात्मिकेगुणमयिगुणेभ्योयेनमोनमः॥ परात्परायेवीरायेप
रेशायेनमोस्तुते ॥९३॥ स्तुत्यायेस्तुतिरूपायेदुर्गायैसततंनमः॥ इतिस्तुत्वातदादेवाः प्रणम्यच
पुनःपुनः ॥९४॥ कृतांजलिपुटाभूत्वाजगदुर्दैवसत्तमाः॥ अबांबमूकदैत्योयंबाधतेस्माहोनि
शं ॥९५॥ स्वर्गान्निरासितास्तेनमेरुकंदरवासिनः॥ केचित्तमनुवृत्ताश्चकाष्ठाहरणकारिणः॥९६॥
केचित्तस्यांगनानांचवस्त्रक्षालनकारिणः॥ बंदीकृतास्तस्यगेहेमरानार्यस्त्वहर्निशं॥९७॥जला
हरणकोषुनियुक्तास्तेनपापिना॥ यज्ञकर्मकृतंनैवकृतंचित्तेनयुज्यते ॥९८॥ ऐरावतंसमारुह्यतथा
खेऽतिदैत्यराट् इत्यादिबहुशस्तेनमूकेनातिबालीयसा॥९९॥ एवंनिरंतरंतंचहत्वास्मान्नक्षसंव
दा॥ धातारंतपसाराध्यब्रह्मविष्णुमहेश्वरैः ॥१००॥ पुंमात्रैरपिदेवेशिमरणंनास्तुमेसदा इतिल
ब्ध्वावरंमूकस्त्वध्यास्माभिरुद्धतः॥१॥ इतिदेवैरितिश्रुत्वादेवीप्राहद्यापरा॥ हत्वाहमत्रदैत्येंद्रंयुष्म



ह्याधापहारये २ इत्युक्त्वांतर्दधेदेवीअग्निस्कंधेयसंनिधौ॥ देवास्तस्यैनमस्कृत्वाययुस्तत्सद्यकंद
र॥ ३॥ इत्यादि० सुकसप्ततितमोध्यायः॥ ७१॥ सूत०॥ गतेषुदेवविप्रेषुदेवीदिव्यस्वरूपिणी॥ श्रा
श्रावयंतीनानकैः कन्यपींसुस्वरांतदा॥ १॥ दोलामारह्यरत्नाढ्यांसद्यपादशिलोपरि॥ तस्थौसा
विज्ञेननन्दीसर्वलोकविमोहिनी॥ २॥ कदाचित्तस्यदूतागात्सद्यमूलंमहोदरः॥ दृष्ट्वातदांबिकोदै
त्योविस्मयापन्नमानसः॥ ३॥ वकुंदुद्रावंवेगेनमूकायंसमहोदरः॥ दृष्ट्वोदैत्यपतिंदूतस्तस्मैसर्वन्य
वेदयत॥ ४॥ दैत्येंद्रशृणुमद्वाक्यंसद्यमूलेनसुंदरी॥ मासयंनीदिव्याः सर्वाः काव्यास्तयुवमोहिनी॥ ५
आश्रावयंतीहस्तेनवल्गुकीसामुहुर्मुहुः॥ तेवेवयोग्यारांजेंद्रतोभवान्द्रष्टुमर्हति॥ ६॥ इतिदूतवचःश्रु
त्वामूकोमन्मथकातरः॥ प्रायात्ससैन्यः सहसाद्रष्टुतांबिकांतदा॥ ७॥ दुर्निमित्तमभूत्तस्यप्रया
णेभयशोसिच॥ अनादृत्यततः सर्वंध्यायंस्तामेवसासुरः॥ ८॥ अवरुह्यगिरिंशीघ्रंदृष्टुसैन्यसम

न्वितं चकारभ्रुकुटीदेवीक्रोधादसंभवा ९ कालीकरालवदनाभ्रूभंगान्निःसृतातदा पाशखड्गधरादेवीवामनेत्राद्विनिःसृता १० निःश्वासाद्भूतसंघाश्चवेतालाभैरवादयः निष्क्रांताः सायुधाः सर्वेगर्जयंतः परस्परं ११ हूंतेसंप्रेषयामासतदादैत्यांबिकाप्रति दूत त्वंगच्छवेगेनतामानयमामतिकं १२ आनुहावतदाभ्येत्यमूकदैत्यांबिकांततः अथेसुरारिदैत्येंद्रमूकदूतोहमागतः १३ त्वांनेतुकामश्चातिबलयाहरीघ्रमयासह अन्यथात्वांबलान्नेष्येकेशाकर्षणकादिना १४ इत्युक्तासोभ्यधावत्तांहुंकारेणाहनच्चतं ततोदेवीगणान्क्रुद्धान्भूतवेतालकादिकान् १५ यूयंभक्षयतक्षिप्रंदूतंसबलमित्यधात् तदाज्ञयाभूतगणावादयंतःक्षरान्बहून् १६ भक्षयंतोमर्दयंतस्ताडयंतस्तथागणाः व्यचरन्दैत्यसन्यंषुवनानीवहुताशनः १७ भक्षितंचबलंभूतैर्दृष्ट्वादैत्योमहाबलः चुकोपबहुधातत्रजलंक्रोधान्धितातथा १८ हेनादिरक्षोभनोच्चंडमहाभक्षमहोदर हेमहोत्कटपंचास्यपादचूडकरालक १९

संपूज्यकृतकृत्याभवंतुवै ८२ इतितस्यवचःश्रुत्वासर्वेदेवाःसवासवाः सह्याचलंसमासाद्य
खालातेपिचयलतः ८३ लिंगंददृशिरेदेवाज्योतिर्मयमनामयं आधारभूतंसर्वेषांजगतां
दिकारणं ८४ अग्निनामासिनेदृष्ट्वापूजांचक्रुःसुरास्तदा सुगंधिकुसुमैः पत्रैरभिषेकैःसुगंध
कैः ८५ गंधैःकर्पूरदीपैश्चसुरामांसोपहारकैः भक्ष्यभोज्यैरनेकैश्चनारिकेलैः सदाडिमैः ८६
जंबूफलैः सनंबीरैः फलैः स्वादूत्तरैः शुभैः तांबूलैर्गीतवादित्रैरपूजयन्ततेसुराः ८७ एवंप्रतिदि
नंकृत्वातपश्चक्रुरनाकुलाः एवंवर्षत्रयेतीतेप्रादुरासांबिकातदा ८८ वरंवृणीध्वंभोदेवावर
दाहंसमाकृता इतिदेव्यावचःश्रुत्वासर्वेदेवाः सवासवाः ८९ दुर्गांभगवतींदृष्ट्वातुष्टुवुर्भक्तिभा
विताः देवाऊचुः नमोदेव्यैमहादेव्यैकरात्र्यैसततंनमः ९० मूलप्रकृत्यैज्येष्ठायैनित्यायैसततंन
मः कामायैकामरूपायैवरदायैनमोनमः ९१ सृष्टिकर्त्र्यैसृष्टिहर्त्र्यैपालयित्र्यैनमोनमः सगुणा

श्वोहतसारथिः २९ मूकदैत्यस्ततोदेवीं खड्गचर्मधरोऽभ्ययात् । असिनासिंहमास्ताड्यभुजेदेव्या
महासुरः ३० सोपिदेव्याभुजंप्राप्यव्यसर्जार्यतसहस्रधा ततः शक्तिंचचिक्षेपमहाघंटाद्याकुलां
३१ व्यवारयत्तहस्तनदेवीवेगनलीलया चिक्षेपभिंदिपालंचदैत्यक्रोधाकुलेक्षणः ३२ शूलेन
दैत्यश्चिच्छेदभिंदिपालंततोसुरः व्यसृजच्चक्रजालानिमहाक्रूराणिदैत्यराट् ३३ विस्तार्यवदनं
कालीचखादान्यान्पुरःस्थितान् दृष्ट्वाकालींचनृत्यंतींभक्षयंतींतुदानवान् ३४ पिबंतींरक्त
सरितः खादंतींगजवाजिनः अंत्रमालापरीतांगींकपालाभरणोज्वलां ३५ चंडाट्टहासंकुर्वंतीं
वसंतींवस्त्रसंघकान् कालींदृष्ट्वातदादैत्यः शूलेनाभ्यहनच्चतां ३६ हस्तेनाक्षिप्यसाशूलंछि
त्वाचिक्षेपभूतले मुष्टिमुद्यम्यतंकालीकुद्धावक्षस्यताडयत् ३७ पपातभूमौदैत्योसोवमन्
रुधिरमुल्बणं संज्ञामवाप्यदैत्येंद्रः पुनरुत्थायवेगतः ३८ पादेनताडयामासकालींकुद्धाम २२२

हासुरः गृहीत्वातत्खंकालीग्रीवेंद्रेपरिचिक्षिपे ३९ पश्चात्कालीदैत्यबलंखड्गांगेनविनाश
यत् दैत्येंद्रःपुनरागत्यदेव्यासंमुखमास्थितः ४० जगर्जबहुधाक्रोधाद्देवींहंतुमनायुधि
गर्जंतंपुनरायांतंदृष्ट्वादेवीक्रुधान्विता ४१ हस्ताभ्यांतंगृहीत्वासानिपात्यचमहीतले पादे
नाक्रम्यतद्वक्षोमुष्ट्याचाभ्यहनत्त्वसा ४२ मुष्टिप्रहारनिर्भिन्नमस्तकोमृकदानवः ममारस
हसाविप्राः शांतमासीज्जगत्त्रयं ४३ देवींतोदेवताः सर्वाःप्रोचुर्जयजयेतिच दिग्राः प्रसेदुर्
गनंनिर्मलोदुगणोदयं ४४ सोमंगल्यवतीभूमिर्हतेतस्मिन्महात्मनि ववुर्वाताःसुखस्पर्शाः
वन्ह्योजज्वलुस्तदा ४५ निर्मलानिमनांस्यासन्सतांमृकेहतेतदा ववर्षुःपुष्पवर्षाणिदि
विस्थोमेघनायकाः ४६ आजग्मुर्ऋषयस्तत्रनानावननिवासिनः दृष्ट्वाविकांमुदोपेतास्तु
ष्टुवुःपरमर्षयः ४७ ऋषयऊ० अंबत्वद्दर्शनादद्यवयंसोबाभ्वामहि सर्वेषांश्रुतिवाक्या

नानगम्यात्वंपरापुरा ४८ त्वमप्यपारापूर्वेषामतिपूर्वत्वमादिजा मूलप्रतिष्ठेरानंदानित्यशुद्धा
जगन्मया ४९ ज्ञानगम्याजितक्रोधासर्वाधाराजितेंद्रिया त्वद्दर्शनमपुण्यानांनभवेद्वत्सवेसदा ५०
तस्माद्दृश्यंतथासिद्धायतोस्मद्दृष्टिगोचरा नमस्तेदेविकल्याणिनमस्तेभक्तवत्सले ५१ यस्मा
द्दैत्यवरोन्मत्तमूकंबलवतांवरं हत्वालोकान्रक्षिता त्वंतस्मान्मूकांबिकेतिच ५२ जनाःस्तोष्यं
तिबहुधातेषामिष्टप्रदाभव एवमुक्तासादेवीऋषिभिर्ब्रह्मवादिभिः ५३ तुष्टातेषांवरंप्रा
दान्मुनिदेवगणैंस्तुता अद्यप्रभृतियेदेविऋषयोब्रह्मवादिनः ५४ सह्योद्भवानदीपुण्यावर्त
तेत्रातिपावनी अस्यास्तीरजपोहोमस्त्वेकः कोटिगुणोभवेत् ५५ वीरभद्राभद्रकालीगणाः
सर्वेमदीयकाः वसंतुकुटजेपुण्येद्रोणशृंगेतिपावने ५६ इदंक्षेत्रंमहापुण्यंतपसांसिद्धि २१३
देभवेत् भवंतोपिचतेदेवामूकबाधाविवर्जिताः ५७ चरध्वंत्रिषुलोकेषुसर्वदाद्यकुतोभ

गत्वास्वसैन्यमहसाशस्त्रास्त्रैर्बहुभिस्तथा हत्वाभूतांस्ततोदृष्ट्वाअंगनोचधमिष्यथ २० इत्याज्ञ
प्तास्तदोदैत्यानिजघ्नुस्त्रास्त्रवर्षिणः योद्धुकामास्तदादैत्याः पुरतश्चजगर्जिरे २१ आरुह्यसिं
हवेगेनदैत्यान्दृष्ट्वामहाबलान् त्रलयांबुदनिर्घोषंचापमादायसांबिका २२ विस्फार्यमुमुचेब
णान्चक्रनिस्तुरकान्बहून् तदादेवीशरौघैर्निहतादैत्यदानवाः २३ महाबलमहोत्साहकरा
लंकुमुदादिकान् हत्वाबिकाक्षणेनाजौनिन्येकीनाशमंदिरं २४ अन्यानपिचदैत्येंद्रान्यान्
मात्रांतरणसा हत्वातद्रुधिरंचण्डकारयामासवैनदीः २५ स्वसैन्यंनिहतंदृष्ट्वामूकोसौदानवे
श्वरः अवाकिरद्बाणवर्षैर्देवींसंग्राममूर्धनि २६ देवीस्वबाण जालेनशरसंघांश्चतस्यसा
चकर्तलीलयाविप्रतद्भुतमिवाभवत् २७ पश्चाच्चुकर्तसाप्यस्यवाजिनोधनुरुत्तमं मर्दयित्वारथंदे
वीहृदिविव्याधसायकैः २८ गाढंविद्धतनुर्दैत्यःक्षणंमूर्छामिवापसः उत्थायसहसादैत्योहता

श्रुत्वाचक्रंप्रोवाचतंपुनः ८ सिद्धिक्षेत्रंवदस्वाद्यविष्णोमेभक्तवत्सल चक्रवाकोत्तरंप्राहऋ
षीणांसन्निधौहरिः ९ अस्तिक्षेत्रंमहापुण्यंसह्यमूर्ध्निचानघ गोरीशृंगेदेवमयेतपः कुरुशिवं
स्मरन् १० क्षिप्रमेतत्तवाभीष्टंभविष्यतिनसंशयः विष्णुनाप्रेरितंचक्रंगत्वासह्याचलंनदा
लिंगंतत्रप्रतिष्ठाप्यपुरस्तात्सोमनंदनः जजापपरयाभक्त्यानवोंपंचाक्षरींशुभां १२ लिंगा
भिषेचनार्थंचगतंकृत्वाचतद्गिरौ सर्वर्तुकुसुमैर्दिव्यैर्नानापत्रैः सविल्वकैः १३ अर्चयामा
सदेवेशंत्रिकालंभक्तिपूर्वकं शिवध्यानपरोभूत्वाचचारतपउत्तमं १४ गतेदिव्यसहस्रेद्वेशि
वोनादिरभूत्प्रभुः शुश्रुवेदयजावाणीविष्णुपद्मांकदाचन १५ सहस्रकमलैःशंभुंपूजयस्व
महामते एकेनापियथान्यूनंभवेत्तत्तथाकुरु १६ सहस्रकमलाचैवक्षिप्रसिद्धिकरीमता
अस्त्रराजस्तदाश्रुत्वाशिवसंन्यस्तमानसः १७ सद्यः संभृतसंभारःसह्याचलनिवासिभिः

ऋषिभिः सहितोभक्त्याप्रत्येकंशिवनामभिः १८ पूजयामासकमलैः सांबमंबासुतान्वितं
एवंसंपूज्यविधिवद्धोमंकृत्वाविधानतः १९ लिंगस्यपुरतःस्थित्वाद्ध्यौसपरमेश्वरं आवि
र्भूतस्तथाशंभुर्भक्त्यातुष्टःसदाशिवः २० वरंवरयभोचक्रवरदोहंसमागतः दृष्ट्वासांबमहा
देवमेकंशंभुंजगद्गुरुं कृतांजलिपुटोभूत्वाप्रणनामपुनःपुनः वरंवव्रेतथाचक्रः शास्त्रराजत्वंच
देहिमे २१ विष्णोंसमंबलंदेवनमोघंसर्वतोमम सूत० इतिचक्रवचःश्रुत्वाशंभुरहघृणानि
धिः २२ ममभूलादृतेचक्रशास्त्रराड्भवसर्वदा भाविकल्पेवराहाख्येयुवांसंभूयभूतले
२४ त्वमजुनोहरिरसोमवंतोचमविष्यथः समंबलंसदादत्तंमयातेवैदयालुना २५ सर्वत्रा
मोघवृत्तिश्चममत्प्रसादान्नसंशयः शृणुचमद्वाक्यमिदंचक्राभिधमिदंसरः २६ चक्रतीर्थ
मितिख्यातंतस्मादुत्पत्स्यतेनदी सापिचक्रनदीपुण्यानिभिन्नासह्यमस्तकात् २७

पश्चिमाब्धिगतासाहिसर्वौघविनाशिनी अस्यास्तीरेजपोहोमः स्वाध्यायःपितृतर्पणं २८
एकंवैकोटिगुणितंभवत्येवनसंशयः शिवरात्र्यांयतोहंचलिंगेस्मिन्वरदोभवं २९ तस्मादस्मिन्
गिरौमर्त्याः स्नात्वावैचक्रतीर्थके जागरंकुर्वतेयेचतेषामिष्टप्रदोभव ३० अयंसह्याचल
श्रेष्ठोगिरिणामुत्तमोगिरिः गौरीप्रीतिकरोयोहिममाप्याह्लादकारकः ३१ इत्युक्तोतर्धे
शंभुर्लिंगेचक्रेश्वरेतदा तदाप्रभृतितत्तीर्थंचक्रकुंडमभूद्द्विजाः ३२ तत्तीरेऋषयःसिद्धाः
कृताश्रमपदास्तदा कृत्वातपांसितेसर्वेकैलासमगमन्द्विजाः ३३ चक्रनद्यांद्विजश्रेष्ठाः का
र्तिकेमासियेनराः कुर्वंतेप्रातरुत्थायस्नानंप्रागर्यमोदये ३४ कुलैकविंशमुद्धृत्यशिवलो
कंप्रयांतिहि योगिनश्चक्रनदीदुर्लभाचकृतेयुगे ३५ तत्रापिदुर्लभंमन्येव्यतीपातदिनद्वि
जाः संक्रांत्योर्वैधृतौचैवग्रहणेचंद्रसूर्ययोः ३६ महालयदिनेपुण्येमातापित्रोर्दिनेतथा

याः इतिताभ्योवरंदत्वादेवीमूकांबिकानदा ५८ अंतर्धानंगतालिंगेपरासरतरांशिवा इ
त्यादि॰ मूकासुरवधोनामद्विससप्ततितमोध्यायः ऋषय॰ भगवन्सूतनोब्रूहिचक्रनद्या
श्चसंभवं सह्यपादोद्भवासाहिकथंचक्राधिकाभवत् १ द्वैपायनविनेतालंसर्ववेत्थनःपुरा
सूत॰ पुरासनत्कुमारेणपृष्टःस्कंदोब्रवीदिदं २ अमुमेवार्थमुद्दिश्यगुहंपप्रच्छयोगिराट्
इदानींतत्कथांवक्ष्येयथाज्ञानंयथाश्रुतं ३ पुरासुदर्शनोधीमांश्चक्रराजत्वमाप्तवान् न्य
वेदयत्तंगोविंदंकदाचिद्दर्षिसंसदि ४ सुदर्शन॰ स्वामिन्सर्वजगन्नाथएकराट्त्वंचदेहिम
ममोघत्वंचसर्वत्रत्वंकल्पावरदोभव ५ इतिचक्रवचःश्रुत्वाविष्णुःप्रोवाचनिर्मितः य
स्मादुत्पन्निरभवत्तवतेप्रार्थयत्यच ६ सएववरदोनान्योमदन्यास्तमुपास्महे सएवपा
लकःसन्नाकर्तावेधास्वरूपवान् ७ तयजस्वपुरज्ञानंसच्चिदानंदमीश्वरं नारायणवच

राःपितरावपि एवंकतिपयाहस्सुगतेषुद्विजपुंगवाः ४७ कण्वोनाममहायोगीकदाचित्तद्गृहंय
यौ भस्मोद्धूलितसर्वांगोध्यायंश्छिवपदांबुजं ४८ धर्मांगदस्तदाप्रेक्ष्यमुनिमायांतमुत्तमं सार्घ्य
पात्रस्तदोत्थायपूजयामासतंमुनिं ४९ व्यजनैर्वीजियामासश्रांतंसमुनिपुंगवं राजातस्यमतंम
त्वास्वपुत्रस्यविचेष्टितं ५० न्यवेदयतकण्वायभक्त्यावनतकंधरः राजोवाच भगवन्मुनिशार्दू
लबालोयंपंचहायनः ५१ क्रीडनेकेवापित्रिवपूजांकरोतिवै अनिच्छुःक्षीरपानंचध्यायं
श्छिवपदांबुजं ५२ भस्मलेपितसर्वांगिःसदालंकारवर्जितः निर्विण्णोनिःश्वसन्नित्यंवृथारोदिति
हर्षति ५३ तर्हिपूर्वभवंमह्यंवदमौनिन्महेश्वर सूत० धर्मांगदवचः श्रुत्वाकण्वोध्यात्वामहात
पाः ५४ उवाचक्रूपयाविष्टस्तत्पूर्वभवमादितः पुराचक्रनदीतीरेमदाश्रमसमीपतः ५५ कश्चि
द्बृहाश्रमीविप्रस्त्वाहिताग्निरभून्नृप धर्मज्ञानमनाश्चासोजितक्रोधोजितेंद्रियः ५६ त्रिका

लमर्चयन्नग्निं बहुकालमवर्तत रुद्राक्षार्चनरुन्नित्यंभस्मादिग्धकलेवरः ५७ कदाचिद्बहुभ
स्मानिकार्तिकेमासिवैनृप कार्तिकेमासिनिक्षिप्यबहिर्द्वारिगृहांगणे ५८ स्नानार्थमगमद्विप्रश्च
ऋनद्यांभगोदये कौलेयकस्तदाकश्चिद्दृष्ट्वाभस्मांतरास्थितः ५९ क्षीतार्तस्त्वरितोभ्येत्यतत्रसुषुप
भूमिप स्नात्वाविप्रस्तदाभूम्योरुतपूर्वाह्णिकक्रियः ६० तीर्थंसंगृह्यकलशेवदन्मंगलसूक्तकं गृ
हांगणेविरचितेमंडपेस्थापयद्घटं ६१ मंडपंरचयामासस्वस्यचित्तानुसारतः उमामहेश्वरंस्थाप्य
शिवपूजांसमर्पयत् ६२ रुद्रसूक्तैर्महारुद्रैरभिषेकंचकारसः सनिर्मल्यजलंपंकिंचिक्षेपभ
षकोपरि ६३ उत्थायसोभिसंद्रावैसमंतान्मंडपस्यसः दंडताडनसंवेगादभिदुद्राववेगतः ६५
शिरस्ताडनसंत्रासादनास्थानात्पदद्वये नत्रा कोयानभषणकरणेकातरस्तदा ६६ मृतोविमा
नमारुह्ययथौकीनाश्रमंदिरं यमोप्युवाचतंदृष्ट्वात्रासयंतंदिनोदय ६७ भोजंतोभृणुमद्वाक्यं

चक्रनद्यास्तटेशुभे कुंडभस्मानुलिप्तांगोनिर्मल्यजलसेवकः ६८ चक्रनद्याह्रदेपूज्येकृत
स्नानोमहामुनिः तस्माद्धिमानमास्थ्यमंदंतिकमुपागतः ६९ इतःपरंभूमितलंप्राप्यतंभष
कोत्तमः धर्मांगदसुतोभूत्वालप्स्यसेपूर्वसंस्थितं ७० पंचमेह्नेमहाभागशिवपूजापरायणः ग
त्वाचक्रवतींपुण्यांकार्तिकेस्नानमाचर ७१ भुंक्ष्वभोगाननेकांस्त्वमंतेकैलासमाप्स्यसि इत्यु
क्त्वाप्रेषयामासयमोधर्मपरायणः ७२ इदानींत्वत्सुतोभूत्वायमोकंतत्करोत्ययं इत्युक्त्वाप्रययौ
कण्वःस्वाश्रमंप्रतिभूसुराः ७३ सभार्यपुत्रोनृपतिः संतप्तबलवाहनः पौरजानपदैःसार्धंययौच
क्रनदींप्रति ७४ बहुदेशानतिक्रम्यदृष्टवान्सह्यपर्वतं अवतीर्यगिरिंप्राप्यत्रिगर्तसुरसत्त
मः ७५ नानाक्षेत्रवरोपेतंदेवालयशतोज्ज्वलं विप्राग्रहारभूयिष्ठंबहुकूपतटांकितं ७६
नानाद्रुमलताकीर्णंसर्वत्रजलसंकुलम् दृष्ट्वामुमोदनृपतिः प्रापचक्रानदींतदा ७७

चक्रनद्योरुतस्नानः पितॄनुद्धरतेनरः ३७ अग्निसत्रंचतत्तीरेकुरुतेमनुजोत्तमः दिनेदिनेश्वमेध
स्यफलमाप्नोत्यसंशयः ३८ पितॄनुद्दिश्ययःश्राद्धंकुरुतेतत्तटेशुभे पूजोर्वसर्गमोयांतितुष्टोवन्ना
तवार्षिकं ३९ अत्रेतिहासंवक्ष्यामिपुराविद्भिरुदाहृतं पुराकेरातकेदेशेराजाधर्मांगदाभिधः ४०
नीतिमान्धर्मवांछूरः संग्रामेष्वनिवर्तकः तस्यापिमहिषीपुण्यासुधर्मानामनामतः ४१
धर्मेणपालयामासप्रजाः पुत्रानिवौरसान् तस्याः कालेनमहतापुत्रोभूद्धेमनामकः ४२ चकार
सौख्यसंस्कारान्राजापुत्रस्यशोभनान् दिनेदिनेवर्धमानः शुक्लपक्षइवोडुराट् ४३ पंचम
हायनेतस्यस्मृतिरासीसुरातनी नदाप्रभृतिनिर्विण्णः शिवध्यानपरायणः ४४ भस्मोद्धूलित
सर्वांगोरुद्राक्षकृतभूषणः बालक्रीडनकेचापिशिवपूजारतःसदा ४५ स्वयंसंस्थाप्यपार्था
र्णपत्रैःपुष्पैः फलैस्तदा हस्तलब्धैस्वयंबालोलिंगार्चनपरोभवत् ४६ दृष्ट्वासुमुदिरबालंनाग

वर्णैर्योभिरन्विता २ पश्चिमाधिंगताविप्राः स्नातानामघहारिणी शिवपापभयोद्ग्राहरंबाभय
दायिनी ३ सर्वसौभाग्यकरणीचैद्यस्यसुगतिप्रदा ऋषय० भगवन्सूतसर्वज्ञकथेशासोगणेश्व
रः ४ सदाशिवनगुरणागेरिपुत्रोविनायकः तत्कथांवदनः सूतशापान्मुक्तः कदागणेट् ५
सूत० पूर्वदेवगणाः सर्वेऋषयश्चतपोधनाः कार्यारंभाद्यथाचक्रुःसिध्यतेचाप्यसंशयः ६ स
न्मार्गवर्तकाःसर्वाभाविताविघ्नतःक्रियाः असत्कार्येषुसर्वेषुतद्वदेवमविघ्नतः ७ ततोदेवाःस
ऋषयश्चिंतयामासुरोजसा असत्कार्येषुविघ्नार्थंसर्वएवन्यमंत्रयन् ८ तेषांतदामंत्रवतांसर्वेषां
चदिवौकसां बभूवबुद्धिर्गमनेरुद्रंप्रतिमहामतिं ९ ततस्तेरुद्रमागम्यकैलासनिलयंगिरिं ऊचुः
सविनयंसर्वेप्रणिपातपुरःसरं १० देवाऊचुः देवदेवमहादेवसर्वेशास्त्वंत्रिलोचन विघ्नार्थमपि
विघ्नेशमुत्सादयितुमर्हसि ११ एवमुक्तस्तदादेवैर्भवःपरमयामुदा उमांनिरीक्षयामासचक्षुषा

निमिषेणह १२ देवानांपुरस्तस्यपश्यतोमांमहात्मनः चिंतायोग्निसमुन्निन्येनोदृश्यत्केनहे
तुना १३ पृथिव्यादृश्यतेमूर्तिरपांमूर्तिस्तथैवच तेजसः स्पर्शनस्यापिमूर्तिरिषासनातनी १४
आकाशस्यकथंनेतिमत्वादेवोजहासह ज्ञानशक्तिमुमोदृष्ट्वाव्यदृष्टंव्योमशंभुना १५ यच्चोक्तं
ब्रह्मणापूर्वंशरीरंतुशरीरता यच्चापिशासितंतेनशिवेनपरमेष्ठिना १६ तत्तत्कार्यंचतुष्कंतु
थिव्यादिचतुष्पतिः मूर्तिमानतितेजस्वीहसतः परमेष्ठिनः १७ पपातास्यान्महादीप्तः कुमा
रोभासयन्नदृशः सर्वावयवसंयुक्तः साक्षाद्रुद्रइवापरः १८ उत्पन्नमात्रंदेवानांयोषितःसंप्रह
र्षयन् कोट्यादीप्तयातथामूर्त्यारूपेणचमहात्मवान् १९ तंदृष्ट्वापरमरूपंकुमारस्यमहात्मनः
उमानिर्मितनेत्राभ्यांतंसापश्यतिभामिनी २० तंदृष्ट्वाकुपितोदेवः स्त्रीभावेचापलेनथा मत्वा
कुमाररूपंसुशोभनालंतधीदृशा २१ ततः शशापतंदेवः स्त्रीशोकीपरमेश्वरः कुमारंतव

ऋस्त्वंप्रलंबजठरः सदा २२ भविष्यसितथासर्वैरखगीतगतिर्ध्रुवं एवंश्रुत्वाथतंदेवस्तीव्रकोपस
मन्वितः २३ व्यर्थकोपोद्यतोमानीआत्मनांगत्रिलोचनः कोपकोसहजांलीलांपूर्णमूलाधर
सदा २४ ननर्तस्वयमुत्थायतदादेवोरुषान्वितः यथायथासोस्वशरीरमाद्यंधुनोतिदेवस्त्रिशिखा
यपाणिः २५ तथातथास्योगरहोवृकासींज्जलंक्षितोसंन्यपतत्ततश्च विनायकानेकविधागजास्या
समानलीलांजनसंनिकाशाः उत्तस्थुरुच्चैर्विविधास्त्रहस्तास्तंस्तुदेवामनसाकुलेन किमेत
दित्यद्भुतकर्मकर्तात्रिवः करोत्यप्रतिमंमहच्च कार्यसुराणांकृतमेतदिष्टंभवेदथोविपरीतंकरोति
दिवौकसोचिंतयतांतथातुविनायकोहाक्षुभितोबभूवह २९ चतुर्मुखश्चारुभुजोविमानआरु
ह्यखंवाचमिमांजगाद इत्येवमुक्तस्तुपितामहस्तमुवाचदेवंत्रिशिखास्त्रपाणिं ३० यस्तेविभो
श्चित्तसमुद्भवःप्रभोविनायकानांभविनासचाग्रणीः ३१ भवत्वदास्यासैरवेणचोद्यंस्वद्भावि
वृद्धंतुशरीरधारी आकाशमेतद्बुधाध्यवस्थितस्त्वयातवैकोवदनात्सपात प्रभुर्भवत्वप्रतिम

निवासमकरोत्तत्रनदीतीरेनृपोत्तमः प्रातःस्नानपरोभूत्वास्मृत्वाकण्वेरितंवचः ७८ कार्तिके
चविशेषेणस्नात्वादेवंचशंकरं पूजयामासविधिवत्सोमवारेमहामनाः ७९ तत्पुत्रोपिमहातेजाः
स्नात्वाप्रागर्यमोदये चक्रनद्यांमहाभागःशिवभक्तैः समन्वितः ८० चकारविधिवत्पूजांमहावि
भवविस्तरं एवंप्रतिदिनेचक्रे शिवपूजांमहामनाः ८१ भुक्त्वाभोगाननेकांश्चपित्तमातृसमन्वितः
अंतेशिवपरंप्राप्यगाणपत्यमवापसः ८२ सूत० एवंचक्रनदीपुण्यांकैलासगमनेच्छुभिः संसेव्या
सर्वदामर्त्यैःशिवपूजापरायणैः ८३ सिद्धाःसिद्धिंगतास्तत्रबहवस्तीर्थवैभवात् चित्तशुद्धिप्र
दात्येषासर्वकिल्बिषहारिणी ८४ स्नात्वास्यांवैभवंसर्वमुनयोलेभिरेगतिं इत्यादि० त्रिसप्तति
तमोध्यायः ७३ सूतउवाच तत्पुरस्तान्महापुण्यावाराहीसिद्धविश्रुता पंचब्रह्ममयीसाक्षात्
सांबतोषकरीशुभा १ ऋष्याश्रमगणोपेतासाक्षात्कैवल्यदायिनी कुब्जाचक्रनदीजंघासो

अभिषिक्तश्वरुद्रैश्चसोमैःसोप्युच्चतांगतः ततंस्नात्वागणेशस्तंशिवज्ञापंभयानकं ४३ चिंतयानःस
देवोमाचरणोप्रणामच ज्ञापमोक्षःकथंमातस्तन्मेवदसुशोभने ४४ इत्युक्तागिरिजाप्राहगणेशं
प्रियबालकं वत्सगत्वाचवाराहींस्नात्वानियमतेंद्रितः ४५ ततःकुरुष्वतेज्ञापःसुंदरोथभविष्यति इत्यु
क्तागणनाथोगाद्वाराहींसत्यनिःसृतां ४६ निवासमकरोत्तत्रसत्यपादमनोरमे स्नात्वादिने दिनेभक्त्या
चचारतपउत्तमं ४७ तेनापिसुंदरीतत्सयदवादीद्विवःपुरा एतच्चतुर्थ्यांसंपन्नंगणनाथस्यपार्थिव ४८
यतस्तथेयंमहतीतिथीनांपरमातिथिः एतस्यांयस्तिलान्तुभुक्त्वागणपतिंद्विजः ४९ आराधयति
तस्याशुतुष्यतेनात्रसंशयः उच्चैस्तत्पठतेस्तोत्रंयश्चैतच्छृणुयान्नरः तस्यविघ्नाजायंतेनपापंसर्व
थाद्विज ५० इत्यादिपु०चतुःसप्ततितमोध्यायः सूतउवाच तत्तीरेपावनंक्षेत्रंशिवनारायणात्मकं
सर्वाभीष्टप्रदंनृणांसदासंपद्विवर्धनं १ त्रपाणांजयविघ्नानांयुद्धेविजयकारकं जपतांतपतांनृ
णांसद्यःप्रत्ययकारकं २ स्वरूपंधृत्वाशंकरेष्टप्रदायच अंतर्धानेगतेतस्मिंलिंगेशिवकेशंवो ३ देवो

२३०

ऋषय ऊचुः महात्मन्सूतनोब्रूहिकथामेनांशिवात्मिकां शृण्वतामघसंहर्त्रीविस्तृताद्भुतवर्धिनीं ४
खररद्दोकस्यपुत्रोदैत्योकोदृग्बलोऽचतो शिवनारायणाभ्यांतोकथंवधमवापतुं ५ सूतउवाच शृणु
ध्वमृषयःसर्वेयदुक्तंहरसूनुना पुरासनत्कुमारायतदिदानींवदामिवः ६ पुराजंभसुतोवीरोखर
द्दाभिधोद्विजाः हतेपितरिशक्रेणकिशोरोतोसुदुःखितौ ७ शास्त्रादिष्टोयतोदृष्ट्वाकरालोमंत्रि
नायकः सांत्वयित्वाचतोबालोनिनायसगृहंतदा ८ तीरयामासतोमंत्रीसत्यांचलगुहांतरे पुरो
पानुदिनंप्रीत्याजंभपुत्रोकरालकः ९ एवंकतिपयाहःसुगतेषुमुनिपुंगवाः मत्वाकरालस्तोवीरा
वयस्कांद्वितयंगतो १० रहस्येतोसमाहूयदैत्योवचनमब्रवीत् हेदैत्यपुत्रोशृणुतांवचनंचमदी
रितं ११ भवतोर्जनकोजंभोमहाबलपराक्रमः त्रैलोक्याधिपतिर्वीरइंद्रेणाजोनियातितः १२ यः
सूरासकलान्वीरोनिगृह्यबुभुजेबली दुर्बलान्मनुजावापितेवापित्र्यंनतत्यजुः १३ युवामपिव

लोन्मतोपित्र्यंगृहीतसज्ज्ञनाः ततोपायंवदाम्यद्यदेवतानांजयायच १४ तपःकुरुत्वंदैत्येंद्रसानु
जःसह्यकंदरे शिवध्यानपरोभूत्वाशिवाराधनतत्परः १५ क्षिप्रसिद्धिकरात्येषावाराहीलोकपाव
नी अस्यास्तीरेवसन्नित्यंशिवसंसक्तमानसः १६ शिवप्रसादान्नेदेवाःस्वर्गभोगांश्चलेभिरे पंच
ब्रह्ममयःसाक्षात्परमात्मासदाशिवः १७ विसोश्चापितथासंतिचक्राणिप्रलयावधि चक्रत्वंताव
× ऋषयऊचुः × प्रदं॥१॥दाक्षायणीमहाभागसतीनाम्नापुरादिजा॥अधरेदग्धकायासाहिमव
दुहितापुरा॥लेभेपतिंशिवंसांबमित्यस्माभिःश्रुतंपुरा॥४॥दग्धदेहाकथंसूततपित्वातपठ
त्तमं सतीहैमवतीजाताकथंसूतमहामुने॥५॥एतद्विस्तार्यनोब्रूहिसंशयोत्रमहान्हिनः॥सू
तउवाच॥श्रूयतांसावधानेननानाकल्पकथांशुभां॥कल्पभेदाकथाभेदोजायतेमुनिसत्तमाः॥
पुरारथंतरेकल्पेदक्षोनामप्रजापतिः॥७॥कंदरेसप्तमकरोदृग्धातत्रसतीदिजाः॥पुत्रीहिम
वतोभूत्वातदाशिवमवापसा॥८॥तथाबाईद्रथेकल्पेदक्षोदक्षिणकेरले॥प्राचींद्रसंनिधोया
गंकृतवान्द्विजपुंगवाः॥९॥तत्रदाक्षायणीदग्धाहिमवद्दुहिताभवत्॥तमेवपतिमासाद्यत

रं॥४९॥योगसिद्धिकरं ह्येतद्योगिनां प्रीतिदायकं॥सर्वसौभाग्यकंनामसदाविजयवर्धनं॥५०
स्वर्गदंस्वर्गकामानां मोक्षदंमोक्षमिच्छतां॥तत्रैवऋषयःसर्वेदेवींसंपूज्यभक्तितः॥५१॥तयःकृ
कृत्वा महात्मानअलभन्सिद्धिमुत्तमां॥पुरानंतव्रतंकृत्वासुमंतुर्नामवैद्विजः॥५२॥उद्वाह्यचं
डींपश्चात्तुभार्यादोषेणभ्रष्टसुरः॥हरिद्वंपरमंप्राप्तस्त्विहागत्यद्विजोत्तमाः॥५३॥कृत्वाभगवती
ष्टजांपुनरैश्वर्यमापसः॥ऋषयऊचुः॥कोसोसुमंतुर्विप्रेंद्रकथमुद्वाह्यचेंडिकां॥५४॥कथंप्रा
पचदौर्भाग्यंतस्मान्मुक्तःकथंचसः॥एतद्विस्तरतोब्रूहिकथांनःसूतनंदन॥५५॥सूतउवाच
पुरासुनंदिनीतीरेसुमंतुर्नामवैद्विजः॥वसिष्ठगोत्रेचोत्पन्नोवेदवेदांग पारगः॥५६॥उपयेमेशु
भांकन्यांसुकेशीनामनामतः॥गार्हस्थ्यमकरोत्तत्रशुचिग्रामेमनोरमे॥५७॥पंचपूजारतोनि
त्यंपंचयज्ञपरायणः॥आतिथेयोग्निशुश्रूषुरनंतव्रतकृद्विजः॥५८॥तेनसौभाग्यमतुलंले

भेब्राह्मणपुंगवः॥एवं बहुतिथेकाले गतेतस्यमहात्मनः॥६१॥नचाभूत्पुत्रसंपत्तिः सुमंतोर्मुनिसत्तम॥ततश्चिंताकुलोभूत्वापुनरुद्वाहमैच्छत॥६०॥विचार्यकर्कशांनामउपयेमेविधानतः॥साभर्तुर्वचनंज्ञात्वोपयुंक्तेदुरासदा॥६१॥एवंदिनेषुगछत्सुकदाचित्कर्कशात्क्रुधा॥भर्तुर्हस्तगतंदोरमाक्षिप्यामोदराहह॥६२॥तदाशिवशिवेत्युक्त्वासुमंतुर्भयकंपितः॥सर्वंदैवकृतंमत्वात्स्त्रीमासद्विजोत्तमः॥६३॥तदाकालवशात्तस्यैश्वर्येविननाशच॥गृहंदग्धंतथाविप्राश्चोरैरपहृतंधनं॥६४॥व्याघ्रैश्चभक्षितागावोदारिद्र्यंपरमंगतः॥तस्यदोषंविदित्वासोनजगादसद्यहो॥६५॥कदाचित्कर्कशादीनादारिद्र्येणातिपीडिता॥भर्तुश्चसंनिधौस्थित्वाततोदोरस्खलंस्खला॥६६॥ममभाग्यानुकूलोयंदेवादृर्तात्वयोजितः॥किंकरोमिक्वगछामिकेवाराणमन्वियं॥६७॥अयंस्तब्धोजडोमत्तआलसीहिनमानवः॥दारिद्र्यस्याकरोयंहि

रिष्यतिकदालयं॥६९॥इत्यंप्रलप्यबहुधाकर्कशाक्रोधविकला॥रुरोदविस्वरंदीनाशिलायां
ताड्यमस्तकं॥६०॥तदादेववशाद्विप्रःकण्वनामामहामुनिः॥तीर्थयात्रासमुत्साहःसर्वप्रा
णिहितेरतः॥७०॥मध्यान्हसमयेश्रांतःक्षुत्तृड्भ्यांपरिपीडितः॥सुमंतोःसदनेदाप्यतंदृष्ट्वासुदि
तोमुनिः॥७१॥प्रक्षाल्यपादौतस्याश्रुतज्जलंशिरसादधत्॥व्यजनेवीजयामासभक्त्यावनत
कंधरः॥७२॥उवाचश्लक्ष्णयावाचासुमंतुर्मुनिसत्तमः॥कच्चिन्नेकुशलंविद्विद्विजवर्यसमाधुना
७३॥किमर्थंरोदिषीयंवेभार्यातवमहामुने॥इत्युक्तवंतंकण्वंसप्रोवाच×ब्रह्मन्कुतआगामहा
मुने॥इत्युक्तंतंद्विजंदृष्ट्वाकण्वःप्रोवाचहृष्टधीः॥सर्वत्रकुशलं×द्विजसत्तमः॥७५॥दुःखकि
न्नमनाभूत्वातस्मैसर्वन्यवेदयत्॥भगवन्कण्वसर्वज्ञमद्भार्याकर्कशाखला॥७६॥क
दाचिद्दाक्षिण्यामद्यस्लाङ्गनाकोपना॥अधाक्षीदग्निकीलायांततोदाह्यमापसा॥७७॥

तवक्रोधोयतोभवेत्॥ततोभगवतीनाम्नालोकेख्यातिंगमिष्यसि॥४६॥इदंक्षेत्रवरंपुण्ययोजनाय
मविस्तृतं॥क्षिप्रसिद्धिकरंभद्र्यादावामत्रवसावहे॥४७॥केरलीमज्जनाद्गंत्वमिष्टादेविभवस्व
च॥साभूदवग्रहस्तत्रकेरलेदेविशोभने॥४८॥भगवत्याःसंनिधानान्मंत्रसिद्धिर्भवेदिह॥क्षेत्राणि
यानिदेवस्यत्वदीयानिशुभानने॥४९॥तेभ्योपिवरमेतत्स्यान्नात्रकार्यविचारणा॥अत्रयेमनुजादे
वितवक्षेत्रमनोरमे॥५०॥मृताःस्वर्गपुरंगत्वाभुक्त्वाभोगाननेकशः॥उमालोकंसमासाद्यत
त्रैवपरिमुच्यंते॥५१॥तपःक्षेत्रप्रभावेनकेरलीयजनाःसदा॥सुदिताःसंतुसर्वत्र सिद्ध
मंत्राश्चतेद्विजाः॥५२॥इतितस्येवरंदत्वासत्यस्यऋषिसंनिधौ॥जगामतुर्विबुधश्रेष्ठोविधि
विष्णूतदांबरे॥५३॥इतिदेवाःसगंधर्वाःसंतोषाविष्टमानसाः॥देवींसंपूजयामासुर्मनुजाश्चा
पिभक्तितः॥५४॥तदाप्रभृतितत्क्षेत्रंदेवर्षेमुनिसेवितं॥भगवत्याख्ययारूढंमंत्रसिद्धिकरंप

च॥तत्पुरस्तान्महाक्षेत्रे सत्याचलकसंस्थितं॥सत्यपादस्थितंस्येतन्महापातकनाशनं॥१॥दर्शनात्
स्पर्शनात्स्नानात्सृजनात्पिंडदानतः॥ऋणान्मुक्तानराः सर्वेपितृणांनात्रसंशयः॥२॥तत्रतीर्थान्यने
कानिऋषीणामाश्रमाणिच॥त्रिकुंगाधिपतिर्विष्णुर्देवदेवेशसंज्ञया॥३॥आस्तेसदाचविप्रेंद्राःक्षेत्रे
स्मिन्मंगलायने॥महादेवाभिधानेनलिंगरूपीसदाशिवः॥४॥आस्तेतत्रमहापुण्येभक्तानुग्रहका
म्यया॥अष्टषष्टिमहाक्षेत्रेष्विदंपरमपावनं॥५॥यासुरस्यपतितंचक्रमिन्नंकलेवरं॥अस्मिन्क्षे
त्रेपितॄणांचैतत्सिद्धिप्रदं॥ऋषयऊचुः॥क्षेत्राणामष्टषष्टीनांलिंगानांचद्विजोत्तम॥तत्रस्थितानांसर्वेषां
वदनःसूतनंदन॥७॥सूतउवाच॥श्रृण्वंतुऋषयःसर्वेक्षेत्रनामानिभक्तितः॥श्रुत्वायानिनरायां
तितेषांदर्शनजंफलं॥८॥महाबलारंभगोकर्णेश्रीशैलेमल्लिकार्जुनं॥रांबरेरामतीर्थेयंकेदा
रेशंकरंविदुः॥९॥गोर्जकीसोमनाथंचकुंभकोणेकपर्दिनं॥मध्यदेशेमहादेवंनर्मदायामुमापतिं॥१०

चंदेवानां॰

३६०

कालिंद्यांकामदहनेगंगाद्वारेमहेश्वरं॥कुलवेण्यांकालनाशेगंगायामीश्वरंविदुः॥१७॥त्रियं
बकंचगोतम्यांफाल्गुनेपरमेश्वरं॥कौशिक्यांकालदहनेपंपायांपापमोदनं॥१८॥लुलायांचविरूपा
क्षंदेवदारुवनेजटाधरं॥सुवर्णमुखरीतीरेकालहस्तीश्वरंविदुः॥१९॥एकांतनायकंकांच्यांभैरवंवृ
षभालये॥श्वेतवनेजोपसुपतिंश्रीशैलेपुंडरीकके॥२०॥कुजाम्रेमणिलिंगंचकुरूपेकुंजरांतके॥
रामेश्वरंरामसेतौताम्रपर्ण्यांपिनाकिनं॥२१॥सुचींद्रेशूर्पकर्णेत्रिकोणेवेगवत्यांसुरेश्वरं॥रुद्रं रुद्रपु
रेविंध्यात्कांतारेतारकेश्वरं॥२२॥दक्षांतकंलुवायव्यांनीलकंठंतुलाबरे॥कुमारधारेकौमारंकावे
र्यांभूतनायकं॥२३॥कोटेकोटेश्वरंज्ञेयंसुवर्णायामनेतकं॥मधूकेश्रीवानवास्यांकपिलायांहर
रंविदुः॥२४॥रुद्रंचनर्मदातीरेपंचनद्यांगुहेश्वरं॥सोमंसुम्नावतीतीरेगंगाकूलेजगद्गुरुं॥२५॥
व्योमवत्यांमहालिंगंकुशद्वत्यांमहेश्वरं॥शरावत्यांगणाध्यक्षंकुलावत्यांमृडंविदुः॥२६॥हिमव

त्यांसुरेशंचकुब्जायांगजनाशनंमहाकालंचमायायामयोध्यायांत्रिविक्रमं॥२५॥अपाद्येनीलकंठंचवेद्यांगंगाधरंविदुः॥वटमूलेवटेशंचवेदारण्येतुसौंदरं॥२६॥मत्स्यदेशेचंडनाशंगोरक्षंकुरजांचले॥खररोटेभवानीशंतौलवेबृहतीश्वरं॥२७॥ज्ञानेश्वरंमंदकेचनिषधेहरिकेश्वरं॥कुरुक्षेत्रेमुंजकेशंकल्याणेशंहिमाचले॥२८॥फाल्गुन्यांपार्वतीकांतंवेणायांजंबुकेश्वरं॥श्रावल्यांबृहद्भिंगंभैरवंसत्यमस्तके॥२९॥पश्चिमाब्धितटेविप्राजलधिंगमितीरितं॥एतानिक्षेत्रवर्याणित्रिविधस्यपरमेष्ठितुः॥३०॥सदासान्निध्यकारीणिमहापातकहराणिच॥अष्टषष्टीतिनामानिसांबस्यपठतिद्विजः॥३१॥प्रजावसानेयोभक्तासर्वंफलंलभेत्॥क्षेत्राणामपिसर्वेषामुत्तमंसत्यजांगलं॥३२॥तत्रतीर्थान्यनेकानिऋषीणामाश्रमाणिच॥महापातकयुक्तोवायुक्तोवासर्वपातकैः॥३३॥तस्यदर्शनमात्रेणसुक्ष्मतेपापंकंचुकात्॥

वसनाज्ञानहीनत्वान्निरातंकाश्रशातुरा॥तद्दोषमोहमेब्रूहि भूयोभूयोनमोनमः॥७॥तदासु
मंतुनाप्रोक्तःकण्वोवेब्रह्मवान्द्विजः॥सुमंतोविप्रशार्दूलदोषनिर्हरणंशृणु॥७॥सत्यपश्चा
त्यदेशस्थेकेरलेऋषिसंकुलेसिद्धाश्रमेमहापुण्यदुर्गाक्षेत्रमनोरमं॥८॥दुर्गाभगवतीना
म्नातत्रास्तेमुनिपुंगवा॥तत्रगत्वासमाराध्यदेवींभगवतींशुभां॥९॥तत्संनिधौव्रतंकृत्वाल
ब्ध्वावरमनुत्तमं॥प्राप्यैश्वर्यंपुनस्त्वंचभार्यायासहभ्सुर॥१०॥भुक्त्वाभोगाननेकांश्चदेहांतेमो
क्षमाप्स्यसि॥इत्युक्त्वाप्रययौकण्वःसुमंतुःकर्कशान्वितः॥११॥गत्वासिद्धाश्रमंपुण्यंयथाक
ण्वमुनीरितं॥चकारतत्रभक्त्यासमनंतव्रतमुत्तमं॥१२॥भगवत्यावरंलब्ध्वासर्वैश्वर्यसमन्वि
तः॥भुक्त्वाभोगानिहात्रासौदेहांतेमुनिमापहो॥१३॥इदंभगवतीक्षेत्रंव्रतलोपनिवारकं॥सर्वै
श्वर्यप्रदंविप्राःस्वर्गमोक्षप्रदंनृणां॥१४॥इत्यादिम० अष्टोत्तरशततमोध्यायः॥सूतउवा

ग्रोहरिहयस्तदा॥३९॥यमदूताःसमागत्ययमाज्ञाकारिणश्चते॥निर्भुःसंयमनीमेनं तत्सी
मेवयमानुगाः॥४०॥धर्मराजश्चतंदृष्टाचित्रगुप्तमभाषत॥चित्रविप्राधमस्यास्यपापंपु
ण्यंवदस्वभो॥४१॥इत्युक्तश्चित्रगुप्तस्तुधर्मराजमभाषत॥अयंविप्रोदुराचारःशूद्रस्त्री
संगकारकः॥४२॥तदन्नेनैवपुष्टोगोवेदंतत्संनिधौवदन्॥आदेहपातंकालंचनिनायद्वि
जपांसनः॥४३॥तथापिशृणुमद्वाक्यंवैवस्वतमहामते॥ताम्रपर्ण्यांकृतस्नानःपश्चात्पाप
मकारषीत्॥४४॥प्रेतोभूत्वासतद्यागिरौसंप्राप्यचद्विजाधमः॥तिष्ठेदुरिहयःक्लिष्टोविव
स्त्रःक्षुधितोभृशं॥४५॥शिवयोगिप्रसादेनसत्यामलकजांगलं॥तेनैवस्नापितोभूत्वात
त्तीर्थस्यचवैभवात्॥४६॥पापान्मुक्तोगतिंयातुपूर्वंपुण्यविपाकतः॥तच्छ्रुत्वाप्रेषयामासप्रे
तयोनिंद्विजंतदा॥४७॥सचसत्यांटवींप्राप्यप्रेतभूतोविवस्त्रकः॥क्षुत्तृषापरिपीडोसौरौद्रः

प्राणिभयंकरः॥४९॥सहस्राक्षेगतेत्वेवंकदाचिद्दैवयोगतः॥वामदेवः शिवंध्यायन्नाययौसत्यवर्त्मना॥४९॥तंदृष्ट्वाक्षुधितःप्रेतोलंबजीर्णकलेवरः॥विवृतास्योदरोघोरआययौभीषणाकृतिः॥५०॥तंदृष्ट्वावामदेवोपितस्तोशिवपरायणः॥तद्भीनाक्षुत्कृपापःपूर्वस्मरणभीरुकः॥५१॥तितलापादयोस्तस्यकृतांजलिरभाषत॥त्राहिविप्रमहाबुद्धेप्रेतराजंडुरात्मयं॥५२॥विप्रमांप्रापयित्वाद्यस्त्याचलकमुत्तमं॥मामुद्धरोद्धरस्वामिन्दयालोदीनवत्सल॥५३॥इत्युक्तोवामदेवस्तुज्ञात्वावृत्तमशेषतः॥तिलसाकंययौधीमांस्तीर्थराजदिदृक्षया॥५४॥तत्रतीर्थतटेतंचनिवेश्यप्रेतमुत्वणं॥कृपामोचनकेतीर्थेसस्नौतन्नामपूर्वकं॥५५॥प्रेतदेहाद्विमुक्तोसोदिव्यदेहधरस्तदा॥स्वयंसस्नौमहातीर्थेद्योतयंश्चदिशोदश॥५६॥दिव्यंविमानमास्थायकैलासमगमद्द्विजः॥तत्रतीर्थान्यनेकानिनृणांमहरणिच॥५७॥सह्याद्रिर्हिमवांश्चैव

श्रीशैलोमलयाचलः॥मैनाकश्चित्रकूटश्चश्रीधरंपावनंतथा॥५॥श्रीसुदर्शनंबाणती
र्थंनारसिंहंसुपुण्यकं॥वाराहंपांचजन्यंचकुटंवेपापनाशनं॥५१॥कोट्यपंदीपती
र्थंचकांचतीर्थंतथैवच॥विमुक्तीर्थंहस्तितीर्थंतथाचैवद्विजोत्तम॥६०॥पाशमोहंसा
टितीर्थंतीर्थंनद्यपिसंगमं॥एवमष्टादशोक्तानि तीर्थानिमुनिपुंगवाः॥६१॥
एकैकस्यापिमाहात्म्यशेषेणापिनगण्यते॥सह्याद्रिखंडःशुभदःसर्ववेदार्थसंहितः॥६२
अत्रतीर्थान्यनेकानिश्रवणान्मुक्तिदानिच॥शृण्वंतिनराभक्त्यासखंडसह्याद्रिसंहितां॥६३॥इह
भुक्त्वाचभोगांस्तेअंतेकैवल्यमाप्नुयुः॥तस्मात्सर्वप्रयत्नेनश्रोतव्यंभक्तिसंयुतैः॥६४॥पुराणश्रव
णंलोकेवर्ततेयस्यवैगृहे॥सत्यत्रदेवताःसेंद्रानारदाद्यामहर्षयः॥६५॥तेषांपादरजोमिश्रंपूतंभवति
तद्गृहं॥भवरोगनिबद्धानांसाधनंसर्वसंपदां॥६६॥शृण्वतांस्मरतांनित्यंगायतांकीर्तयतांसतां॥तेषांपादरजःस्पर्श

अत्रेतिहासंवक्ष्यामिपुराविद्भिरुदाहृतं॥२७॥शृण्वतांसर्वपापघ्नंसेतुंमुक्तिप्रदायकं॥पुराकृ
मुद्वतीतीरेस्थाणुडरपुरेशुभे॥२८॥विप्रोहरिहरोनामवेदवेदांगपारगः॥कदाचिद्द्विजनेत्र
स्थित्वाचिंतयामाससद्विजः॥२९॥सर्वंगृहाश्रमंकृत्वातीर्थसेवांकरोम्यहं॥तीर्थयात्रामठे
द्वारोपश्चाद्वृत्त्यैगृहेनकिं॥३०॥इतिचिंतयतस्तस्यमतिस्तीर्थेत्वभूद्द्विजा॥वयस्यैर्बहुभिर्यु
क्तोयुवागेहाद्विनिर्ययौ॥३१॥तामपर्ण्यांकृतस्नानःकन्यातीर्थेनिषेव्यच॥स्थाणुडरपुरंप्रा
प्यतत्सहायःपुनर्गतः॥३२॥तापयंकेवलंदेहंस्त्रीशूद्रसंकुलंतदा॥दृष्ट्वायुवानंविप्रंचताः
स्त्रियोजगृहुर्बलात्॥३३॥विप्रोपितद्वशान्नीतस्तासांसंगमलालसः॥बुभुजेविषयांस्ताभि
र्वशीकृतमनास्तदा॥३४॥गतेबहुतिथेकाले पुत्रपौत्रसमन्वितः॥वार्द्धक्यंप्राप्यविप्रोसौनि
:स्पृहोभोगवर्जितः॥३५॥तत्रापिचिंतामासाद्यतथाजीर्णकलेवरः॥त्यक्त्वातांसांसदनेवि

पापिनः॥सोलीषमस्तकायेचकथांशृण्वंतिपावनीं॥तेनिर्बलाःप्रजायंतेपापपिनो
मनुजाधमाः॥तांबूलंभक्षयंतोयेकथांशृण्वंतिपावनीं॥७७॥श्वविष्ठाःखादयंत्येनं
नरकेयमकिंकराः॥आसनार्थंप्रयछंतिपुराणज्ञस्ययेनराः॥७८॥कंबलाजिनवासां
सिमंचकंफलंकंतुवा॥स्वर्गलोकं समासेदुर्दिव्यसिंहासनेस्थिताः॥७९॥स्थिला
ब्रह्मादिलोकेषुपदंयांतिनिरामयं॥श्रुत्वापुराणंविमलंतद्वत्कारंप्रपूजयेत्॥८०॥पुराण
ज्ञस्यरूपेणवेदव्यासश्चरेद्भुवि॥तस्मात्तत्पूजनाव्यासपूजावद्ययेनसंशयः॥८१॥पुरा
णांतेचयोमर्त्येव्यासपूजांसमाचरेत्॥तंपूजयंतिविबुधाःसर्वभोगेश्चसंयुतं॥८२॥

इतिसूतेरितंश्रुत्वाऋषयःसौनकादयः॥संपूज्यविधिवत्तंचप्रणम्यचपुनःपुनः॥
६३॥श्रद्धाभक्तिसमोपेताःस्तोत्रवर्यैरपूजयन्॥ग्रैवेयेरंगुलीयैश्चकटकाद्यैरनेकशः॥
॥६४॥मुक्ताकेयूरहारैश्चकिंकिणीभिःप्रपूजयेत्॥अन्नदानसमंदानंनास्तिलोकेषु
विश्रुतं॥६५॥क्षिप्रसिद्धिकरंह्येतत्तस्माद्धेयंविदुर्बुधाः॥अन्नस्यैवकुलेजाताअ
सहस्रंद्विजोत्तमाः॥६६॥नरकंतेनपश्यंतितस्मादन्नप्रदोवरः॥विप्ररूपेणभोक्तासौ
विप्ररूपेणपूजितः॥६७॥ददातिविप्ररूपेणसर्वकामान्हरिःस्वयं॥वर्तयंतुचनि
र्देद्रब्राह्मणाभोजयंतुच॥६८॥भोजितेब्राह्मणेमृष्टहरेस्तृप्तिर्भवेद्ध्रुवं॥यावदिष्ट

मंभोज्यंतत्तद्विप्रायदापयेत्॥८७॥सयातिब्रह्मभवनंसर्वमोहविवर्जितं॥अना
यासेनमोक्षंचछत्रदानंचकारयेत्॥९०॥तस्मादन्नप्रदानेनपुराणंचैवपूजयेत्॥
यंयंकामयतेसोपितंतंदत्वाप्रपूजयेत्॥९१॥तस्मिंस्तुष्टेद्विजश्रेष्ठास्तुष्टाःस्युसर्व
देवताः॥वेदतुल्यंयतोक्तंसत्यादिखंडमुत्तमं॥९२॥तच्छ्रुत्वामनुजाःसर्वेवेदपा
रायणंभवेत्॥कथांश्रुत्वाचमनुजःसंदेहंकारयेत्तुयः॥९३॥तत्सर्वंनिष्फलंभूत्वा
कुंभीपाकेपतत्यधः॥नारीवापुरुषोवापिभक्त्यापरमयासदा॥९४॥श्रुत्वावैसर्व
पापेभ्योमुच्यतेजन्मबंधनात्॥गोभूहिरण्यदानाद्यैःपुत्रमित्रादिसिद्धिनैः॥९५॥

र्थानिमुनयोजगुः॥६७॥पद्मजाकःकथांश्रोतुंसदापौराणिकोनरः॥पुण्यमासेषुवा
पुण्यदिनेपुण्यतिथिष्वपि॥६८॥कलौयुगेविशेषेणपुराणश्रवणाद्हते॥नास्तिधर्मःपरः
पुंसांनास्तिमुक्तिप्रदःपरः॥६९॥पुराश्रवणंशंभोर्नामसंकीर्तनंपरं॥उभयंचमनुष्याणां
पुण्यद्रुममहाफले॥७०॥कलौहीनायुषोमर्त्याद्रुर्बलाःश्रमपीडिताः॥इतिसंचिंत्यमनसा
भगवान्बादरायणः॥७१॥हितायतेषांविदधेपुराणाख्यसुधारसं॥पिबन्नेवामृतंय
त्नादेकःस्यादजरामरः॥७२॥शंभोःकथामृतास्वादात्कुलेस्यादजरामरः॥भवकोटिसह
स्रेषुभ्रान्त्वाभ्रान्त्वावसीदतां॥७३॥योवदत्यपुनर्वृत्तिकोन्यस्तस्मात्परोगुरुः॥व्यासासनंस
मारुह्योयदापौराणिकोद्विजः॥७४॥व्यासमासिप्रसंगस्तुनमस्कुर्यान्नकस्यचित्॥
पुराणंयेचसंपूज्यतांवृत्तिंयेरुपायनैः॥७५॥शृण्वंतिचकथांभक्त्यादरिद्राःस्युर्न

स०पू०

३६७

॥इतिश्रीमत्सत्याद्रिखंडः समाप्तः॥ छ॥

३६७

इहलोकेसुखंप्राप्यसंसाराब्धेःप्रमुच्यते॥एतत्सकृत्सदेद्वीमांकृणुयाद्भक्तिपू
र्वकं॥९६॥विमुक्तःसर्वपापेभ्योयातिब्रह्मसनातनं॥सत्यंसत्यंपुनःसत्यमुद्धृ
त्यभुजमुच्यते॥९७॥ ॥इत्यादिमहापुराणेस्कांदेसनत्कुमारसंहितायांस
ह्याद्रिखंडेपूर्वभागेनवोत्तरशततमोध्यायः॥श्रीमत्सप्तींद्वब्धींदुसंख्येशकेऽ
स्मिन्पेष्टेसहोमासिसितेपक्षेनंदातिथौ विधुवासरेसमाप्तिमगमद्ग्रंथः॥
श्रीमत्सीतारमणार्पणमस्तु॥श्रीमत्सद्गुरवेनमोजयतु॥श्रीरस्तुश्रीरस्तु॥

श्रीगणेशायनमः नैमिशेनिमिषक्षेत्रेऋषयःसत्रमासत॥शतसंवत्सरंदी
र्घंनानापश्चिष्टिसंकुलं॥१॥तत्रासनृषयःसर्वेदिव्याभौमाश्चनित्यशः॥यत्रनारायणःसाक्षा
द्यज्ञेदेवैर्महर्षिभिः॥२॥दिव्येश्चसवनस्तोत्रैःशस्त्रैरस्त्रैश्चसंयुताः॥मंत्रानुमंत्रिताःसर्वादेव
तानिवसंतिहि॥३॥त्रयाणामपिलोकानामुत्सवःसमभूत्तदा॥इंद्राद्योदेवगणादेवाचार्यपु
रोगमाः॥शौनकंमुनिशार्दूलंपुरस्कृत्यययुस्तदा॥४॥तानागतान्समालक्ष्यऋषयःप्रश्रया
न्विताः॥उत्तस्थुःप्रमप्रीत्याशौनकंचेदमब्रुवन्॥५॥अहोधन्यतमोलोकेसएवपुरुषोम
हान्॥यस्यागमनमात्रेणसर्वेप्रमुदिताजनाः॥६॥वयमत्रसमासीनाःसत्रयागचिकीर्षया
कर्मावसानेचास्माकंकालोनैवातिवर्तते॥७॥कथाभिःसुविचित्राभिरितिहासैःपुरातनैः

त्वंनःसुखयितुंकालमर्हसिपुरुषोत्तम ८ इत्युक्तोमुनिशार्दूलःशौनकःकरुणानिधिः
द्वैपायनंपुरस्कृत्यवरमासनमास्थितः ९ कथयामासविविधाःकथाःसर्वमनोरमाः
वर्णानुदेशाश्रितानुकालयुगपर्वतसंश्रितान् १० वर्णसंकरजानीचकर्माण्युच्चावचान्यपि
एवंकथयतस्तत्रकालोबहुतिथोगतः ११ कदाचिदागतस्तत्रऋषिसंघसमावृतः
जामदग्न्योमुनिवरस्तपसाप्रज्वलन्निव १२ तंदृष्ट्वामुनयःसर्वेज्वलंतमिवपावकं प्रत्युत्थायप्रणेमुस्तेअर्घ्यहस्ताःसमुत्सुकाः १३ अस्तुवन्जामदग्न्यंतेकृतासनपरिग्रहं त्वं
रामजामदग्न्योसिब्रह्मक्षत्रमुपाश्रितः १४ क्षत्रियापसदाराज्ञांशिरश्चिच्छेदसत्वरं
कार्तवीर्यस्यराजर्षेर्बाहुंछेदंचकारह १५ भूमिंनिःक्षत्रियांसर्वांपित्रर्थेचचकारह

त्रिः सप्तविप्रसद्भूमिं कृत्वा शांतिमुपाश्रितः ॥१६॥ लवणाब्धिस्तुतत्रासात्सह्याद्भ्रष्टो भवन्
किल ॥ तत्रेतस्थापिता विप्रास्त्रैविद्याधर्मतत्पराः ॥१७॥ तवनामांकितेक्षेत्रमिषुपातस
मन्वितं ॥ तत्रलिंगान्येनकानिक्षेत्राणि विविधानि च ॥१८॥ दास्यंत्याद्यान्ऋषयः सर्वेकृता
स्त्रक्षेत्रवासिनः ॥ त्वयासंस्थापिता विप्रास्त्वन्नाम्नानिवसंतिहि ॥१९॥ अल्पदानसं
तुष्टाश्चित्तपूर्णइतिश्रुताः ॥ त्वयादत्तवरादीर्णाश्चित्तपूर्णाभवंतिति ॥२०॥ त्रैविद्याः सत्य
संकल्पाः श्रौतस्मार्तक्रियापराः ॥ आर्यवृत्ताइतिख्याताआर्यास्तेपरिकीर्तिताः ॥२१॥ यम
लादागताविप्रायमलाःपरिकीर्तिताः वेदविद्याविहीनास्तेपाद्येयाः परिकीर्तिताः ॥ २२
अन्येपिदेवराष्ट्रीयादेवराष्ट्रादुपागताः ॥ तेप्यल्पतपसोमंदावेदाध्ययनवर्जिताः ॥ २३ ॥ अ

देहेनमुनिसंघसमावृतः ॥ ३२ ॥ तेषांसंरक्षणार्थायवससीत्यनुश्रुम ॥ एवमादिनितरा
मचरितान्यद्भुतानिवै ॥ ३३ ॥ श्रुत्वानुस्मृत्यसंकीर्त्यनिष्ठामसुचिरंमुने ॥ त्वयाविनिर्मि
तेक्षेत्रेतीर्थान्यायतनानिच ॥ ३४ ॥ मुनीनामाश्रमाश्चैवक्षेत्राणिविविधानिच ॥ त्रिव
लिंगानियानीहविष्णुक्षेत्राणिसर्वशः ॥ ३५ ॥ गाणपत्यानिसौराणि शाक्तानिविविधा
नि च ॥ सद्यःप्रत्ययकारिणिगुह्यानिविविधानिच ॥ ३६ ॥ तेषांफलंविधिंचैवमाहात्म्यंव
क्तुमर्हसि ॥ सागरस्यचमाहात्म्यंतत्रवासेचकिंफलं ॥ ३७ स्नानदानविधिंचैवतर्पणा
दिविधिंतथा ॥ ब्रूहिराममहाबाहोरेणुकेयनमोस्तुते ॥ ३८ ॥ इतितेषांवचःश्रुत्वाजाम
दग्न्योमहामुनिः ॥ शौनकंप्रेरयामासतीर्थमाहात्म्यकीर्तने ॥ ३९ ॥ इत्यादि० १

शौनकऊवाच॥ शौनकोहंप्रवक्ष्यामिक्षेत्रमाहात्म्यमुत्तमं॥रामस्यरे णुकेयस्यइषुपा
तांकितस्यच १ रामेणरेणुकेयेनभूमिः सर्वत्ररक्षिणा दत्ताविप्रायविधिवत्कश्यपा
यमहात्मने २ कश्यपेनैवमुक्तस्तुदत्तभूस्पर्शनेकथं पादपांसुप्रसंगेनैदत्तप्रहरणंभ
वेत् ३ ततोविनिर्गतोरामः सागरांतिकमागमत् सागरप्रार्थनायोसमेदिनींदेहिसाग
र ४ महोदधेमहासारसर्वसत्वालयप्रभो नदीनांसरसांचैवपुष्कराणांचसर्वशः
५ निश्चितांचसर्वेषांत्वमेवैकायनंमहत् मैनाकप्रमुखाः सर्वेगिरयस्त्वांसमाश्रिताः ६
अन्येदेवाश्चदैत्याश्चकालखंजादयस्तथा त्वामेवशरणंप्राप्ताविष्णोश्चशरणंमहत् ७
मयाप्रमादादज्ञत्वात्सर्वभूर्विप्रसात्कृता तत्रनाहंगमिष्यामिअतस्त्वांयाचयामिभो ८
वासार्थंमेदिनींदेहि मगमात्रस्यमेप्रभो इत्येवमादिवचनैः करुणैःसंप्रबोधितः ९

सागरः प्रकटीभूत्वा प्रणम्य मुनिसत्तमं ॥ मेदिनीं नप्रदास्यामि विभो राज्ञो नलङ्घये ॥ १० ॥ स्या
पिताः सागराः सर्वे विष्णुना प्रभविष्णुना ॥ रेखामात्रमपि क्षुण्णुं कुलं घिं तुवानचक्षमः ॥ ११ ॥
अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति ॥ नावुभौ महतो याति चैः पापिना वितिनः श्रुतं ॥ १२ ॥
तस्मात्वं मुनिशार्दूल गच्छ वातिष्ठ वासुखं ॥ इत्युक्त्वा जलधिः सद्यस्तत्रैवांतरधीयत ॥ १३ ॥
क्रुद्धस्ततोसौपुरुषप्रवीरो युगांतकालाग्निसमन्वितेषुः चिक्षेपरत्नाकरशोषणाय तत्रै
षुपातेप्रबभूवतीर्थं ॥ १४ ॥ स्मृत्वापाशुपतंतत्रैरौद्रं कालाग्निसन्निभं विन्यस्य शरयोः
शल्ये धनुः पस्पर्शसत्वरं ॥ १५ ॥ त्र्यंबकेपादमेकंच हरिशास्यचमूर्धनि ॥ द्वितीयंपादमास्था
यविचकर्षमहद्धनुः ॥ १६ ॥ ततोधनुः कर्षणनादभिन्नोमेरुस्तथान्येगिरयश्चमेदिनी
चचालसर्वास्फुटितैश्चतैः समंमहोदधिः संक्षयमापतत्क्षणात् ॥ १७ ॥ तंनिनादमुप

पांक्तेयास्त्वयाज्यास्तेगिरिकांतारवासिनः॥ अन्येपिकौंकणाविप्रामरुदेशादुपागताः॥२४
मांसाशिनोनिर्दयास्तेगिरिकूटनिवासिनः॥ कूटस्थळाइतिख्याताः सर्वेतेब्राह्मणाधमाः॥
२५॥ अन्येपिपदिकाविप्राः पदमात्रेपिपापिनः॥ स्वाध्यायाध्ययनेनार्हाः श्रौतकर्मविवर्जि
ताः॥२६॥ ब्राह्मणाइतितेख्याताअभोज्यान्नाश्चसर्वशः॥ अन्येपिकरहाटास्तेकर्हपृष्ठास्थि
संभवाः॥ २७॥ द्विजाग्र्याब्राह्मणामुख्याः श्रौतस्मार्तक्रियापराः॥ अनूचानाः श्रोत्रियास्ते
पूज्यावैसर्वकर्मसु॥२८॥ परंतेविंध्यदक्षीयैर्गर्दैर्ब्राह्मणाधमैः॥ स्वज्ञानाद्योनिसंबंधात्
किंचिन्निंद्यत्वमागताः॥२९॥ अतस्त्वनार्यास्तेज्ञेयाविषदाब्रह्मघातिनः॥ सुवर्णस्तेय
निरताग्र्यामेषुनगरेषुच॥३०॥ शुभकार्येषुसर्वेषुवर्ज्यास्तेपिप्रयत्नतः॥ अन्येवर्णाः संकरा
श्चसुरवासार्थमागताः॥३१॥ क्षेत्रेनिवसंतिस्मनिर्बाधाह्यकुतोभयाः॥ क्षमयैनैव

धान्येततोमरवः तस्मात्त्वौषधयःसर्वास्तस्यायत्ताहिसर्वदा २७ समस्तजीवलोकोयंदेवेवं
कस्तथापरः वृष्टिमेघाभिकांक्षंतिसावृष्टिः सागरादृते २८ त्वमादिपुरुषः साक्षान्माया
मानुषविग्रहः ब्रह्मणाप्रार्थितः पूर्वमवतीर्णोसिभूतले २९ कार्तवीर्यवधार्थायहैहया
नांतथैवच भूमेर्भारावतारायसाधूनांपालनायच ३० विपरीतमिदंग्राह्यं त्रैलोक्य
क्षयकारणं क्रोधंसंहरदेवेशत्रैलोक्यंपरिपालय ३१ जंबूद्वीपाश्चयोद्वीपाः सागराल
वणादयः त्वयैवस्थापिताः सर्वेकस्मात्त्वंसंहरिष्यसि ३२ कृतापराधःपापोयंसागरः
पयसांनिधिः स्वेनैवकर्मणादग्धुंत्वमेनंक्षंतुमर्हसि ३३ प्रांजलिः प्रणतोह्येषप्रेक्ष्य
संप्रतीक्षते अनुकंपयदेवेशह्यस्त्रंसंहरसंहर ३४ सागर० कृष्णेनभाषितंपूर्वंब्रा
ह्मणानामकीर्तनुः मान्याः सर्वत्रपूज्याश्चनावमान्याः कदाचन ३५ मयामूढतमेनाद्य

५

ब्राह्मं तेजस्तिरस्कृतं गच्छवातिष्ठवेत्युक्तंयाज्ञोतेविफलीकृता ३६ अपराधसहस्रा
णिकृतवानस्मिमंदधीः तेषांदंडोमयाप्राप्तः क्षंतव्यमधुनापिभो ३७ पावकोमांदह
त्येषरोद्रास्त्रेणप्रवर्तितः नैवसोढुंसमर्थोस्मित्यक्ष्येप्राणानहंविभो ३८ विलपंतम
नीवोच्चैः सागरंपतितंभुवि रेणुकेयस्तुतंदृष्ट्वारुपयाकुलमानसः ३९ अस्त्रंस
हृतवानाशुमाभैस्त्वमितिचाब्रवीत् मयासंचालितंसह्याद्द्रोणेश्चतुर्दशैरिह ४० षड्
योजनायतंदीर्घंचतुराशीतिमायतं इषुपातोकितंचासुभविष्यतिनसंशयः ४१ इ
दंक्षेत्रंत्वयासिंधोरस्वामित्वमपिक्वचित् प्रलयेपिनचोल्लुंघ्यंवातव्याघूर्णनेपिच ४२
मयासंप्रेषिताबाणाःशिवरूपास्तवांतिके प्रतिष्ठिताभविष्यंतिनान्यंजस्वनिरंतरं
४३ मर्यादावलयंत्वेतद्रूणेहोपयसांनिधे स्वतीरस्थापयाशुत्वंनैनल्लुंघितुमर्हसि

येरागपाब्रह्मणापूर्वदत्तास्तेपयसांनिधे ॥ तेसर्वेनभविष्यंतिचतुराशीतियोजने ॥४६॥मुख्से
त्रवासिभिः संर्वैरन्यैर्देशांतरागतैः ॥ संसेव्यः सर्वदासिंधोस्नानपानावगाहनैः ॥४७॥येत्र
वासंप्रकुर्वंतिवर्णाः संकरजातयः ॥ मुक्ताएवभविष्यंतिमत्प्रसादान्नसंशयः ॥४८॥गच्छसा
गरभद्रंतेमयानुज्ञापितः सुखं ॥ महोदधेमहाभागविरहंमाकरिष्यसि ॥४९॥नदाज्ञांशिर
सावंद्यप्रणिपत्यपुनः पुनः ॥ पुनः प्रदक्षिणीकृत्यसागरः प्रययौसुखं ॥५०॥ इत्यादि०द्वि
तीयोध्यायः ॥ २ ॥ ॥ ऋषयऊचुः ॥ सिंधुराजमनुज्ञाप्यरामः शस्त्रभृतांवरः ॥ ततःपरं
किमकरोत्कथयस्वमहामुने ॥ १ ॥ शौनक० ॥ पुनः पश्चादधश्चोर्ध्वंदिग्धंपाशुपतास्त्रिना ॥
तत्क्षेत्रमवलोक्याथसर्वप्राणिविवर्जितं ॥ २ ॥ प्रोक्षयामासमंत्रेणस्वकमंडलुवारिणा ॥ बी
जेनामृतरूपेणजीवयन्निवसत्वरं ॥ ३ ॥ तत्रागच्छन्मुनिस्त्याद्याऋषयः सह्यशैलतः ॥ बोधाय

शून्यसदेवासुरमानुषं ब्रह्मन्वचकिंतसर्वमकस्माल्किंप्रवर्तते ॥१८॥ ततस्तुनिःसृतोबा
णोपतितोलवणार्णवे ज्वालामालसमारूढोकल्पांतदहनोपमो ॥१९॥ ताभ्यांसमुत्थितो
वन्हिः प्रददाहमहोदधिं तृणवन्नज्जलं सर्वमकस्माद्भस्मसात्कृतं ॥२०॥ ततोहाहाकृतंस
र्वंसदेवासुरमानुषं ब्रह्माद्योदेवताः सर्वाःपरंविस्मयमागताः ॥२१॥ तथैवसंदधेबाणं
कालाग्निसदृशप्रभं सोपिषड्योजनंतोयंप्रददाहमहोदधेः ॥२२॥ एवंक्रमेणसह्याद्रेः शि
खरंशिखरंप्रति स्थित्वास्थित्वासमुमुचेबाणान्सृष्ट्वाचतुर्दश ॥२३॥ ततोदेवाःसमाग
त्यरामंशस्त्रभृतांवरं प्रभुःणेशिरसाभूमौस्पृष्ट्वास्पृष्ट्वापुनःपुनः ॥२४॥ नमस्तेमुनिशा
र्दूलरेणुकेयमहाव्रत त्वयायंविधृतोलोकःसदेवासुरमानुषः ॥२५॥ तस्मात्वंविप्रशार्दूल
बाणंसंहरसंहर सागरेनिहतेतूर्णंलोकः सर्वोविनश्यति ॥२६॥ सागराज्जायतेवृष्टिस्ततो

यंगोप्यंक्षेत्रमिदंशुभं आत्रिषश्चप्रदातव्याः क्षेत्रस्यास्यमहोदयाः ॥२४॥ इत्यादि०नृ
तीयोध्यायः ॥ ३ ॥ देवाऊचुः सर्वदेववयंसर्वेतिष्ठामस्त्वदनुज्ञया आश्रमान्विविधान्
कृत्वालिंगक्षेत्राणिसर्वत्रः १ ऋषय० अगस्त्यप्रमुखाःसर्वेसिद्धगंधर्वकिंनरैः अप्स
रोभिः सहैवात्रत्वत्प्रीत्यानिवसामहे २ क्षेत्रेत्वदीयंसर्वत्रसर्वलोकसुखावहं सर्वसस्य
युतंधान्यगोमहिष्यादिसंकुलं ३ प्रकामवर्षीपर्जन्यः सर्वरोगविवर्जितं दुर्भिक्षादि
भयंनात्रनहिदुर्भिक्षपीडिताः ४ अत्रस्थित्यविनः सर्वायांतिदेशांतरंक्वचित् देशांत
रादत्रयांतिआपदंनिस्तरंतिते ५ सर्वदाफलिनोवृक्षाः पनसाम्रकपित्थकाः पूगाश्चना
गवल्ल्यश्चमरीचानांचवल्लयः ६ नारिकेल्यः कदल्यश्चफलभारनताः सदा नावाष्टिनी
तिवाल्याचनास्युल्काबाधनेक्वचित् ७ इषुपातांकितंरामक्षेत्रं ख्यातिंगमिष्यति

इत्याश्विनःसंप्रयुज्यस्थितास्तत्रैवदेवताः ८ ब्रह्मोवाच रामराममहाबाहोरेणुका
नंदवर्धन समुद्रस्नानमाहात्म्यक्षेत्रमाहात्म्यमुत्तमं ९ सागरस्यचमाहात्म्यंक्षेत्रवासे
चयत्फलं क्षेत्रेस्मिन्म्रियमाणानांगतिंवदसुविस्तरात् १० रामउवाच ब्रह्मंस्त्वदुद्भ
वालोकाः सागरस्त्वत्स्तुतिश्चितः सर्वंत्वंवेत्सिभगवन्किंमांप्रष्टुमिहेच्छसि ११ तथापित्व
त्तसोदनकिंचिद्वक्ष्यामितच्छृणु पृथिव्यांसंतितीर्थानिगोदाकृष्णाचजाह्नवी १२ नारयः
शोणभद्रश्चेरावायाश्चसरांसिच अन्येषांचैवतीर्थानांसागरःशरणंपरं १३ सागरस्यध्व
निंश्रुत्वादृष्ट्वाचपयसांनिधिं मासद्वयकृतात्पापान्मुच्यतेनात्रसंशयः १४ चांद्रैःषण्
मासमध्यस्तैर्यत्फलंलभतेनरः तत्तत्स्नानाद्वाप्नोतितत्फलंपयसांनिधौ १५ संगमेद्वि
गुणंतस्मात्त्रिगुणंशिवसंनिधौ संगमेशिवसांनिध्येतीर्थेसागरगेपिच १६ चतुर्णांसि

गमोयत्रतत्रस्नानंसुदुर्लभं ॥ चोदैः संवत्सराभ्यस्तैर्यत्फलंप्राप्यतेनृभिः ॥ २७ ॥ तत्फलंस
मवाप्नोतितत्रस्नानान्नसंशयः ॥ देशकालावनुस्मृत्यपूजितेपयसांनिधौ ॥ २८ ॥ स्मृत्वारामं
चसीतांचहनुमंतंतथांगदं ॥ विभीषणंचसुग्रीवंवालिंवानरपुंगवं ॥ २९ ॥ तीक्ष्णदंष्ट्रंमहाका
यंभैरवंतीर्थरक्षकं ॥ नमस्कृत्यनमस्कृत्यलक्ष्मणानुज्ञांचभैरवात् ॥ ३० ॥ पिप्पलादसमुद्भूतां
कृत्वोसागरसंस्थितां ॥ आहारंवालुकापिंडंतस्मैदत्वापुनःपुनः ॥ ३१ ॥ प्रविश्यतीर्थराजा
नंसंतर्प्यपितृदेवताः ॥ रामंसीतांलक्ष्मणंचहनुमंतंतथांगदं ॥ ३२ ॥ वालिंचित्रांगदंचैववि
भीषणमथापरं ॥ एतान्संतर्प्यविधिवद्यमतर्पणमाचरेत् ॥ ३३ ॥ इत्यादि० चतुर्थोध्यायः
४ ॥ ॥रामउ० ॥ अश्वत्थसागरोसेव्योनस्पृष्ट्योकदाचन ॥ अश्वत्थंमंदवारेचसागरंपर्वणि
स्पृशेत् ॥ १ ॥ विनामंत्रंविनापर्वक्षुरकर्मविनानरैः ॥ कुशाग्रेणापिदेवेशनस्पृष्टव्योमहोदधिः

८

नोवसिष्ठश्चव्योघ्रोव्याडिन्द्रोवेलणः॥४॥कहोलोव्याघ्रपाच्चैवतृणबिंदुश्चकश्यपः॥ हिरण्य
केशीऔचेयाः सत्याषाढश्चशौनिरिः॥५॥अत्रिश्चपुलहश्चैवबाल्मकिश्चाश्वलायनः॥
आगमन्नृषयश्चान्येन्नातन्नोथसहस्रशः॥६॥कैलासादागमल्लंभुर्मागणशतैर्वृतः॥कार्ति
केयोगणेशश्चवीरभद्रस्तथैवच॥७॥वैकुंठदागतोविष्णुः सनकाद्यैः स्वपार्षदैः॥ब्रह्मावे
दैस्तदंगैश्चनारदाद्यैस्तदागमत्॥८॥इंद्राद्यालोकपालाश्चयक्षगंधर्वकिन्नराः॥अप्सरोभि
श्चसिद्धैश्चसर्वदेवगणैः सह॥९॥तानागतान्समालोक्यप्रफुल्लनयनोब्रवीत्॥ मयाविनि
र्मितंक्षेत्रंसमुद्रांतर्गतंमहत्॥१०॥भवदागमनाज्ज्ञातंसर्वतीर्थोत्तमोत्तमं॥लोकत्रयादप्य
धिकंसर्वतीर्थमनोरमं॥११॥युष्मांस्तुत्रार्थयाम्येकंसर्वान्दिवर्षिसत्तमान्॥ शंभोत्वमुमयासा
र्धंगणैः स्कंदादिभिःसह॥१२॥विष्णोत्वंरमयासार्धंसनकाद्यैःस्वपार्षदैः सहसर्वैश्चस्थात

विश्वेश्वरंलिंगंप्रतिष्ठाप्योमयासह ॥ स्थितस्तत्रैवसगणोरामस्यमुदमावहन् ॥ १२ ॥ रामोबाणा
द्भुतंलिंगंततोबाणेश्वरंमहत् ॥ सप्तर्षिस्थापितंलिंगंसप्तकोटीश्वरंमहत् ॥ १३ ॥ ततः परम
हातेजाः कनकेतोमहानृषिः ॥ कर्हपृष्टासमायुक्तोकर्हीटोहिमहानृषिः ॥ करहाटेश्वरंलिं
गंस्थाप्यतत्रैवसंस्थितः ॥ १५ ॥ वेलनेत्रोऋषिवरोमेरोः शिखरमाश्रितः ॥ तदेवतपसोत्ख
यसिंधुतीरेन्यवेशयत् ॥ १६ ॥ वेलनेत्रोमहालिंगंस्थाप्यतत्रैवसंस्थितः ॥ तत्रैवतरणीगंगा
स्वयंसागरगामिनी ॥ १७ ॥ तदुत्तरेबदरिकोनरनारायणाश्रमः ॥ मंदवेदध्वनिर्नित्यंनिशी
थेश्रूयतेधुना ॥ १८ ॥ कार्तिकेयोगुहःसाक्षाद्धरदोषासमन्वितः ॥ आश्रमंकृतवान्सिंधो
स्तीरेनाम्नागुहागरं ॥ १९ ॥ गुहागरंगुहक्षेत्रंसर्वसिद्धिनिषेवितं ॥ पंचऋषेर्महादेवः पं
चोपनिषदात्मकः ॥ २० ॥ पंचब्रह्ममयः साक्षात्पंचनारायणात्मकः ॥ ऋषेर्वाडेस्तपः सि

ङ्किं कर्तुमाविरभूत्स्वयं ॥ २१ ॥ तत्रवाडेश्वरंलिंगंस्वयंज्योतिः प्रकाशते ॥ यंदृष्ट्वासिद्धगंधर्वाः
प्रदीप्तेयांतिनित्यशः ॥ २२ ॥ तत्रसत्यानृतेन्यस्तेदृश्येतेप्राणिनांस्फुटं ॥ इत्येतद्रामक्षेत्रस्य
चरितंपरमाद्भुतं ॥ यःपठेच्छ्रावयेद्वापिसगच्छेत्परमं पदं ॥ २४ ॥ इति० पंचमोध्यायः ५
शौनक० ॥ कदाचिदागतस्तत्ररामोदाशरथात्मजः ॥ रामक्षेत्रस्यमहिमांश्रुत्वातत्रह्युपाग
तः ॥ १ ॥ पुरंगुहात्मकंप्राप्यस्तत्रस्कंददर्शह ॥ रामउवाच ॥ कार्तिकेयमहाबाहोतारका
सुरमर्दन ॥ २ ॥ देवसेनाधिपविभो दिष्ट्यादृष्टोसिसुव्रत ॥ पंचवक्त्रान्महादेवादधिकस्त्वं
षडानन ॥ ३ ॥ त्वांदृष्ट्वाकृतकृत्योस्मिप्राप्तोस्मिनिर्वृतिंपरां ॥ स्कंद० ॥ रामराममहाभाग
जानकीलक्ष्मणानुग ॥ ४ ॥ स्वराज्यंसंपरित्यज्यकिमर्थमटसिप्रभो ॥ नहिक्षत्रियबंधूनां
प्रव्रज्याविहिताक्वचित् ॥ ५ ॥ ॥ राम० ॥ पितुराज्ञावनांप्राप्तस्तेनाज्ञप्तोस्मिसुव्रत ॥ चतुर्द

न्नासमारामवनवासंकुरुष्वह ३ शिरसाधार्यतामाज्ञांचिरान्मिमहीन्मिमं स्कंद० यो
हंताहतवान्यांश्चतत्सर्वंविदितंमया ४ देवकार्यमिदंसर्वंत्वयाकार्यमरिंदम कर्तारामपृथि
व्यांचहनिष्यसिमहान्रिपून् ५ दशकंचवधार्थायसाधूनांपालनायच अवतीर्णोसिभ
गवंस्तत्कुरुष्वाविलंबयन् ६ लक्ष्मणःशेषनागोयंदक्षावध्यतिराक्षसान् मायेयंवैष्ण
वीसाक्षात्सीतारक्षोवधार्थिनी ७ त्वंरामरघुनाथोसिमायामानुषविग्रहः सच्चिदा
नंदरूपस्त्वंश्रुतीनामप्यगोचरः ८ दिष्ट्यायातोसिभगवन्न्यायोमय्यनुकंपया तिष्ठास्मि
न्नाश्रमेरम्येसिद्धगंधर्वसेविते ९ स्कंदप्रार्थनयारामस्तस्थिवानाश्रमेतदा रामेश्वरंमहा
लिंगंस्थापयामासराघवः १० सिंधुलिंगांतरालेयत्सा तत्रमणिकर्णिका तारकंतन्म
हाक्षेत्रंसर्वप्राणिविमुक्तिदं ११ रामतीर्थमितिख्यातंसर्वतीर्थोत्तमोत्तमं तत्रास्थितो

वृषभस्तत्रदातव्यः प्रवृत्तेक्षुरकर्मणि ॥ प्रथमंस्नातियःसिंधौतस्यायमुदितोविधिः ३ ततः
परंपूर्वविधिरद्रिः स्नानेप्रकीर्तितः ॥ रामक्षेत्रमिदंब्रह्मन्कोंकणाध्यः प्रतिष्ठितं ४ समु
द्रगर्भइत्येतद्भूखंडादतिरिच्यते ॥ सह्यस्यपूर्वभागेयद्योजनत्रयविस्तृतं ५ दैर्घ्येणतेनतुल्यं
नक्षेत्रंकोंकणसंज्ञितं ॥ रौंखोद्भवनिवसतांद्वारकावासिनांतथा ६ प्रयागेवसतांनि
त्यमविमुक्तनिवासिनां ॥ यत्फलंसमवाप्नोतिक्षेत्रेस्मिन्निवसन्नरः ७ येम्रियंतेचा
द्रिगर्भेक्षेत्रेरामविनिर्मिते ॥ सत्यलोकमुषित्वातेमुच्यंतेब्रह्मणासह ८ पुलिनेयेम्रि
यंतेचदह्यंतेपुलिनेचये ॥ साक्षान्मोक्षोभवेत्तेषांसत्यंसत्यंवदाम्यहं ९ जामदग्न्यवद
त्येवमाकान्नादवेभेध्वनिः ॥ माकुरुष्वात्रसंदेहंश्रुतिरेषासनातनी १० इतिश्रुत्वातयो
र्वाक्यंविश्वस्ताः सर्वदेवताः ॥ निवसंतिसुरगणाविस्तब्धाश्वाकुतोभयाः ११ शिवो

हापापः सोमवंशः क्षत्रियपोसनः॥ बभूवपृथिवीपालः शवः परमदारुणः॥ ४॥ सुश्रमंमृगयाव्याजा
दृषीणामाश्रमंगतः॥ सतत्राश्रममद्राक्षीत्सर्वजंतुमनोरमं॥ ५॥ सर्वर्तुकुसुमोपेतंगुंजन्मधुक
राचृतं॥ पनसैर्नारिकेलैश्चकदलीभिश्चराजितं॥ ६॥ सुगंधहोमधूमैश्चवेदध्वनिविनादितं॥
वेदवादैः समाघोषैः क्रियमाणैरहर्निशं॥ ७॥ शिष्यैर्विनयसंपन्नैर्मूर्तैर्वेदरिवावृतं॥ वेदनिष्ठै
स्तपोनिष्ठैर्ब्रह्मनिष्ठैरकल्मषैः॥ ८॥ आन्वितंमुनिशार्दूलैः सत्यलोकमिवावृतं॥ दृष्ट्वाश्रमप
दंतस्यपरंविस्मयमागताः॥ ९॥ तमागतंसुनिश्रेष्ठाः पूजयंतिस्मसादरं॥ तथापिनासोविम
नाः सोमदत्तस्यमन्यवापह॥ १०॥ बहिः प्रसन्नोहिमना स्तान्साधुनवदत्स्वयं॥ प्रपद्यपूजयामास
प्रश्नंवाकृतवानिमं॥ ११॥ प्रश्नंमनोगतंमेद्यतथ्यंवदतसुव्रताः॥ ययातेकथयामासुस्तंतंनैवेति
चावदत्॥ १२॥ वाचःकूटेनतान्सर्वान्कोपयामासदुर्मतिः॥ ततस्तेकुपिताः सर्वेन्नृपंस्तेक्षत्रपां

सने ॥ १३ ॥ दुष्टकुष्ठिभवपापगलत्कुष्ठीविशोषतः ॥ ब्रह्मशापहतः पापः खलः परमदारुणः
१४ ॥ गलत्कुष्ठभवत्सोथसद्यस्तत्क्षापयन्नितः ॥ तान्मुनीञ्छेदयामासविलापैः करुणैरहो ॥ १५ ॥
मयापापेनमूढेनकृतंकर्मसुदारुणं ॥ कोमूढश्चालयेद्ब्रह्मर्षीणामूर्ध्वरेतसां ॥ १६ ॥ कोविषं
भक्षयेत्प्राज्ञः पन्नगान्संप्रबोधयेत् ॥ सैषाहिदारुणाबुद्धिः पूर्वपापसमुद्भवा ॥ १७ ॥ प्रविश्य
मोपापइतियूयंसंक्षोभितामया ॥ ब्रह्मिष्ठाऋषयःसर्वेक्रोधलोभविवर्जिताः ॥ १८ ॥ मामाश्व
मापदंप्राप्तंब्रह्मघ्नंनिरपत्रपं ॥ कृतघ्नंनारणंप्राप्तमनुकंपितुमर्हथ ॥ १९ ॥ तेषामुद्दालकोना
मऋषिःकारुणिकस्तथा ॥ विलपंतमुवाचाथमाभैस्त्वंक्षत्रियाधम ॥ २० ॥ ब्रह्मशापकृतश्चा
येव्याधिः परमदारुणः ॥ नचान्यथायितुंशक्यः कृतैःपुण्यशतैरपि ॥ २१ ॥ तथाप्युपायंवक्ष्या
मियदुक्तंपद्मयोनिना ॥ इत्यादि ॰ ३० सप्तमोध्यायः ॥ ७ ॥ उद्दालक॰पुराकश्चिन्महा

कुष्ठीमुंडिकोनामनामतः॥ब्रह्माणंतोषयामासब्रह्मज्ञायेनसर्वदा॥१॥प्रातः स्नात्वानित्यक
र्मसमाप्यप्रयतोन्वहं॥ब्रह्मोपस्थमुपस्थायजपतिस्मनिरंतरं॥२॥तुष्टस्तत्तपसाब्रह्मासर्व
लोकपितामहः॥आकाशेगिरमुच्चैस्तुश्रावयामाससत्वरं॥३॥वरंवरयमेब्रह्मन्प्रसन्नोहं
वरप्रदः॥ मुंडिलउ०॥यदिप्रसन्नोभगवान्व्याधेरस्माद्विमोचय॥४॥ब्रह्मोवाच॥गच्छशीघ्रं
महाक्षेत्रंरेणुकेयंशरीरकं॥तत्रापिकार्तिकेयस्यक्षेत्रंगुह्यतरंमहत्॥५॥यत्रोबाव
रदासाक्षाद्भक्तानांवरदायिनी॥तत्रसंलालितोनित्यंगुहःक्षेत्रंनमुंचति॥६॥तक्षेत्रं
पश्चिमाब्धेस्तुतीरंगव्यूतिमायतं॥तदद्यविश्रुतंक्षेत्रंसर्वदांभोधिसेवितं॥७॥उत्तरेज
बुकादेवीदक्षिणेवालुकेश्वरः॥पश्चिमेरामतीर्थंतुहयतीर्थंतुपूर्वतः॥८॥तस्यै
वाग्नेयदिग्भागेचूर्णीतीर्थमनुत्तमं॥नित्यमाश्रवणोपेतमशोकवनराजितम्॥९॥

यसंसर्गाद्ध्रुवमेवभवत्यहो ॥ १२ ॥ यत्रक्वापिमृतानांचयत्रदेहोविलीयते ॥ परस्तोवानराणां
वातेसर्वेमुक्तिभागिनः ॥ १३ ॥ तेभ्योदेहांतरंगत्वानारकंप्रदिशाम्यहं ॥ ततस्तेगतिमायांति
वदत्येवस्वयंशिवः ॥ १४ ॥ सीताकृतेमहालिंगंलक्ष्मणोवालुकाचये ॥ वालुकेशमितिख्यातं
स्थापयामाससिद्धिदं ॥ १५ ॥ तदुत्तरेमहातीर्थंवरुणालयमद्भुतं ॥ तत्रस्नात्वाशिवंदृष्ट्वाशि
वंयातिनसंशयः ॥ १६ ॥ तस्यैवपूर्वदिग्भागेघृणातीर्थमकल्मषं ॥ घृणीप्रसादाद्यत्रैवसो
वकुष्ठाद्विमुच्यते ॥ १७ ॥ इतिश्रीस्कं० षष्ठोध्यायः ६ ॥ ऋषय ऊचुः कोसौसोवः कथंकुष्ठी
घृणीचामोचयत्कथं ॥ शुश्रूषवोवयंसर्वेवदनौनकविस्तरात् ॥ १ ॥ त्वन्मुखांभोजगलितं
पीयूषंपिबतांमनः ॥ नचैवतृप्तिमायातिहर्षयत्यधिकंपुनः ॥ २ ॥ नौनक० प्रश्नोमहोद
यश्चायमृषीणामूर्ध्वरेतसां ॥ इतिहासंप्रवक्तुंमोमुदासंप्रेरयत्यहो ॥ ३ ॥ पुराकस्मिन्म

स्त्रग्रापहतः शांबः शुद्धस्तत्राभवत्पुरा ॥ तस्येवोत्तरदिग्भागे क्षयरोगहरंमहत् ॥ १८ ॥ यत्र
चंद्रस्तपस्तप्त्वाक्षयरोगादमुच्यत ॥ इत्येतद्रामचरितंसर्वव्याधिविनाशनं ॥ १९ ॥ यः श्रुत्वा
यः पठेद्वापिसगच्छेत्परमंपदं ॥ इत्यादि० उ० अष्टमोध्यायः ॥ ८ ॥ ऋषय० सर्वज्ञोसिमहा
भागवेच्छेसर्वसंहितां ॥ चंद्रतीर्थस्यमहिमांवदत्रोनकविस्तरात् ॥ १ ॥ शौनक० दक्षाक
न्यास्तेजज्ञेसप्तविंशाधिकंपुरा ॥ तासांमध्येचंद्रमसेसप्तविंशतिकन्यकाः ॥ २ ॥ ददौदक्षः
समाहूयप्रजासंगतियंत्रिनः ॥ तासांमध्येप्रियत्तमांरोहिणीमन्वपद्यत ॥ ३ ॥ इतराश्चाभ्य
सूयंतेरोहिण्याभ्रशदुःखिताः ॥ रोषुस्तारोहिणींसर्वास्ततः सारुकटोभवत् ॥ ४ ॥ चंद्रस्तस्मा
पदक्षोपितंतः क्षीणोथसोन्वहं ॥ विरूपारोहिणीजातकलाहीनश्चचंद्रमाः ॥ ५ ॥ निशाक
रविहीनासारजनीनान्वरोभत ॥ निशाकरकरस्पृष्टंजगदाप्यायतेखिलं ॥ ६ ॥ तद्विहीनम

भूत्सर्वभूम्यालयसमप्रभं ॥ ततस्तुदेवताः सर्वाःशिवविष्णुपुरोगमाः ॥ ७ ॥ दक्षंतेभत्सयेया
मासुर्धिगस्तुमूर्खजीवितं ॥ चंद्रः सर्वस्वमस्माकंलोकत्रयविभूषणं ॥ ८ ॥ विरक्षापिचजी
वंतिप्रजाश्चेंद्रकरैःसदा ॥ दक्षः पापः पापमतिर्वीरभद्रेणशापितः ॥ ९ ॥ ततः स्वछंदतो
स्वीयांनैवमुंचतिपापधीः ॥ दक्षस्तुतेनानिर्विण्णः परंकमलमागतः ॥ १० ॥ विषमानोजगा
दोच्चैः क्षम्यतांदुष्कृतंमम ॥ मयापापेनचंद्रोथशालः कथमबुद्धिना ॥ ११ ॥ यदत्रसाधुभवि
तातत्कुरुध्वमतंद्रिताः ॥ दक्षस्यवचनंश्रुत्वा ततश्चंद्रोब्रवीदिदं ॥ १२ ॥ देवदेवमहादेवदक्ष
यज्ञविधायक ॥ उमापतेपशुपतेचंद्रशेखरतेनमः ॥ १३ ॥ शरणंत्वांप्रपन्नोस्मिदक्षशापंनि
वारय ॥ श्रीमहादेव० ॥ चातुर्वर्ण्यंपुरासृष्टंब्रह्मणापद्मयोनिना ॥ १४ ॥ मुखाद्ब्रह्मकुलंजा
तंतद्वचोनान्यथाक्वचित् ॥ अथाप्युपायंवक्ष्यामिव्याधितस्यागदोयथा ॥ १५ ॥ स्त्रीषुसा

म्येनवर्तेस्वकल्पस्यसमभागतः॥ क्षयस्तेन्यतरेपक्षेवृद्धिश्चान्यतरेभवेत्॥ १६॥ आपूर्णतो
तेभवित्तासवितुःकर्योगतः॥ तद्वियोगात्कलाहानिःपूर्णस्त्वेसर्वदाव्ययः॥ १७ चंद्र०
दक्षशापात्कलाहीनस्तेजोमेविफलीकृतं॥ सकलोहंकथंभूयांतेजश्चातीवनिर्मलं॥ १८
तदुपायंवदविभोकरुणाकरशेखर॥ श्रीमहादेव०॥ इत्युपांताकिंतक्षेत्रेरामनाम्नाविभूषि
तं॥ १९॥ तत्रापियद्गुहक्षेत्रंव्याडीशाधिष्ठितंमम॥ तस्याग्नेयदिशोभागेचंद्रतीर्थमनामयं
२०॥ तद्गच्छतपसःसिध्येतेनःशुद्धोभविष्यसि॥ इत्यादि० नवमोध्यायः॥ शौनक०
चंद्रस्तद्वचनंश्रुत्वाचंद्रतीर्थंजगामह॥ तत्राश्रमपदंकृत्वाशिवंपंचाक्षरंजपन्॥ १
समाःसहस्रंकृतवांस्तपःपरमदारुणं॥ तदधस्तात्तपश्चक्रेरोहिणीचंद्रवल्लभा॥ २
ततःकालेबहुतिथेपार्वतीवल्लभःशिवः॥ चंद्राश्रमपदंप्राप्तःक्रीडन्वल्लभयाक्वचित्॥ ३

स्त्रिसंध्यपावनसंवीतंरसालवनराजितं ॥ तत्रगच्छमहाभागघृणीमंत्रमनुस्मरन् ॥ १० ॥ प्रदक्षि
णानमस्कारान्कृत्वास्नानपरायणः ॥ त्रिरात्रान्मुच्यतेकुष्ठान्नान्यथाममभाषितं ॥ ११ ॥ त
च्छ्रुत्वामुडिलस्तस्माद्घृणीतीर्थमुपागतः ॥ कार्तिकेयंगुहंनत्वामातरंवरदांबिकां ॥ १२ ॥ सौ
रमष्टाक्षरंमंत्रंवरदांबोपदेशितं ॥ घृणिमंत्रमनुस्मृत्यतत्रस्नानपरायणः ॥ १३ ॥ कुष्ठव्याधि
विनिर्मुक्तस्त्रिरात्रात्समजायत ॥ ततस्त्वमपिराजेंद्रशीघ्रंगच्छगुहाश्रमं ॥ १४ ॥ वरदांबाकी
र्तिकेयमुपास्यध्यानतत्परः ॥ अधिगम्यततोमंत्रंवरदांबोपदेशितं ॥ १५ ॥ कोटिमंत्रजपा
दस्मात्स्नानात्त्रिषवणेरितात् ॥ मुच्यसेब्रह्महत्यापात्वमासेत्रिभिरहैर्दितः ॥ १६ ॥ इत्युदा
लवचः श्रुत्वाशोणस्तानृषिपुंगवान् ॥ प्रदक्षिणीकृत्ययोघृणीतीर्थमनुस्मरन् ॥ १७ ॥ ब्र

देवराजोसियज्ञभागभुजांवर ॥४॥ मयाप्रसादादत्तेयंमालाब्रह्मविनिर्मिता ॥ वीणादंडसमा
श्लिष्टादातुंयोग्यानकर्हिचित् ॥५॥ इत्युक्त्वादायतांमालांवीणादंडेन्ययोजयत् ॥ ममप्रसा
दात्वंराज्यमधितिष्ठसिसर्वदा ॥६॥ इदानींमामवज्ञायवर्तसेभूतिगर्वितः ॥ मघवन्मदमत्तो
सिविभूतिस्त्वांवियोक्ष्यति ॥७॥ इत्युक्तानारदस्तस्माद्विजन्माइवनिर्ययौ ॥ इंद्रस्यैरावतग
जस्तत्रैवांतरधीयत ॥८॥ उच्चैःश्रवाश्चाश्वरत्नंरत्नान्यन्यानिसर्वशः ॥ अदृष्टान्यभव
न्विप्रानारदस्यापमानतः ॥९॥ ततःपरमनिर्विण्णोमघवानिदमब्रवीत् ॥ विभूतिमदम
त्तस्यजातःसर्वधनक्षयः ॥१०॥ ज्ञानांजनमिदंप्राप्तंदारिद्र्यंसर्वभेषजं ॥ बृहस्पतिःसुरा
चार्यःक्वयातोननुलक्षितः ॥११॥ धन्वंतरिर्भिषग्रत्नंनायातोनाश्विनावपि ॥ रंभानाट्य
समारंभोमेनकाचतिलोत्तमा ॥१२॥ मातंगश्रुतिनादेनद्युपातोपिनलक्ष्यते ॥ घृतकुंडे

तदक्षय्यंघृतपल्वलसंनिभं ॥ १३ ॥ दृष्ट्वादृदिविदाहोमेमरणायैवकल्पते ॥ इंद्राणित्वमिहा
गच्छस्थिराभवममासने ॥ १४ ॥ विवत्सोमघवान्प्राहपुनः पुनरिदंवचः ॥ भवनांतर्गतः शू
न्यः शचींतामन्वशोचयत् ॥ १५ ॥ मघवाविलपत्यद्यश्रुयतांप्राणवल्लभे ॥ ममभाग्यंविले
पंतेविशोचंतमनाथवत् ॥ १६ ॥ नायात्यद्यापिमेसुभ्रूर्मय्यनुक्रोशवत्यपि ॥ इतिब्रुवंतंविल
पंतमुच्चैर्विविग्नचिंतंविवत्सोशुचार्पितं ॥ वृथाभ्रमंतंभवनांतरालेविकत्थमानंमुहुरात्मचे
ष्टितं ॥ १७ ॥ तदिंद्रचेष्टितंसर्वंनारदोब्रह्मणेवदत् ॥ ततस्तूर्णमुपव्रज्यशंभवेविस्मवेब्रवीत्
ततस्तूर्णमुपस्थायपुनरिंद्रमुपागतः ॥ १९ ॥ इतिश्रीस्कं० एकादशोध्यायः ॥ ११ ॥
शौनक० ॥ नारदस्यवचः श्रुत्वाउपेंद्रः खगपृष्ठतः ॥ जगामनंदनवनंतत्रेंद्रंसददर्शह ॥ १ ॥
अधोकृशंराजभूवेंद्रोदृष्ट्वोपेंद्रंचदूरतः ॥ रोदनासन्नकंठोपिरोदोच्चैस्तुबालवत् ॥ २ ॥

उपेंद्र स्तमुवाथेचोरोदिषित्वंकथंप्रभो॥ कस्माद्दंतेकलिलंतद्वदस्वाविलंबयन॥३॥इंद्रउ॰
नारदस्योपदेशान्मेसर्वंपिश्रीःस्थंगता॥वस्त्वेपरिहितंयन्मेतदकस्मान्नदृश्यते॥४॥इतो
धिकंकिंकर्तव्यंसर्वज्ञोसिजगत्पते॥गौतमस्यसतीभार्याअहल्यापतिदेवता॥५॥तदापरा
धात्सर्वंगेसंजातोस्मिभगव्रणी॥वृत्रहत्यावृतःपूर्वंभ्रममाणइतस्ततः॥६॥पुरोहितगिर
श्छेदादगाधेदुखसागरे॥मग्नस्त्वोनावमारुह्यमुक्तस्तस्मान्महाभयात्॥७॥इत्येवमा
दिदुःखानिस्वकृतान्यकृतानिच॥निस्तीर्णोनिमहाबाहोत्वत्प्रसादान्महाबलात्॥८॥
इदंकष्टतरंदुःखंनारदस्यप्रकोपजं॥इदंत्रैविष्टपंराज्यंसर्वंनिहतकंटकं॥९॥नारदस्यप्र
सादेनभुज्यतेसर्वदामया॥नारदोबुद्धिदोनित्यंपितामाताचनारदः॥१०॥सखाभ्राता
चबंधुश्चशास्ताशासयितामम॥दैत्यानांविषमेयुद्धेऋषीणांचैवसंकटे॥११॥नारदो

तत्रचंद्रमसंदृष्ट्वाक्षीणंप्रक्षीणकिल्बिषं ॥ पस्पर्शकरुणाविष्टः करेणामृतवर्षिणा ४
ततस्तुकिरणोज्वालः प्रतपन्निवचंद्रमाः ॥ रोहिणींपार्वतीस्पृष्ट्वादिव्यरूपधराभवत् ५
ततश्चांद्रमसंतीर्थंत्रिषुलोकेषुविश्रुतं ॥ तत्पुरस्तोदेवतीर्थंयत्रदेवः पुरस्थितः ६ पार्व
तीवल्लभःसाक्षात्सर्वदेवमयः स्थितः ॥ देवसंज्ञेनदद्यापिलिंगाकारंप्रदृश्यते ७ तत्पुर
स्तादृषीनांकुंडंपरमदुर्लभं ॥ यस्यसंस्पर्शनादेवदारिद्र्येनामुयान्नरः ॥ ८ ॥ इतिश्री
सह्याद्रिखंडेत्रयोध्यायः १० ॥ ऋषय० ॥ विभूतिकुंडमाहात्म्यंवदसौनकसुव्रत धन्या
वयंनतृप्यामः पिबंतस्तत्कथामृतं ॥ १ ॥ सौनक० ॥ देवदेवः पुरारातिर्विभूतिमदगर्वितः
नारदंदृष्टवान्मार्गेननमामयथापुरा ॥ २ ॥ तेनदत्तांपुष्पमालांगुंजद्भ्रमरनादितां ऐरा
वतगजस्कंधेस्थापयामासमंदधीः ॥ ३ ॥ इंद्रस्याविनयंदृष्ट्वादेवर्षिःप्रत्युवाचतं त्वमिंद्र

श्रुत्वा तूर्णंगत्वागुहाश्रमं॥ गुहान्मंत्रमुपागम्यकुंडंगत्वाविभूतिदं॥ २१॥ तोषयामासदेवेशं
नाम्नाबटुकभैरवं॥ महापद्मश्वपद्मश्वशंखोमकरकच्छपो॥ मुकुंदकुंदनीलाश्वनिधयस्ते
प्रजज्ञिरे॥ हाहाहूहूश्वगंधर्वैरिभाद्याश्चाष्टनायकाः॥ २३॥ मृदंगश्रुतिघोषेणसुप्रज्ञाश्चो
पतस्थिरे॥ ऐरावतोगजेंद्रश्चचतुर्दंतविराजितः॥ २४॥ घंटाघर्घरिकानादैः प्रज्ञातःपुरतः
स्थितः॥ पतिव्रताशिरोरत्नंशचीदासत्वतेर्हृता॥ २५॥ आस्थित्वाशिबिकांसाध्वीपुरस्ताल
क्ष्यदृश्यत॥ बृहस्पतिःशिष्यसहस्रसंयुतउदीरयन्ब्रह्ममुहुः सनातनं॥ तेजोवतांदेवगणे
नसार्धंभुवंदिवंस्वंचविभूषयन्स्थितः॥ २६॥ ततः सर्वेदेवगणाः परिवार्यपितस्थिरे॥ बटु
कोभैरवः साक्षाच्छंकरोलोकशंकरः॥ २७॥ वृषपृष्ठमुपाश्रित्यपुरस्तालक्ष्यदृश्यत॥ दृष्ट्वा
तंदेवराजोवैजयशब्दंचकारह॥ २८॥ जयजयमहादेवजयाचिंत्यजयाभय॥ जयसर्वस्यसं

भर्त्रे विहर्त्रे सुरविद्विषां ॥ २९ ॥ आपत्सयोनिधौ मग्नं प्रपन्नं वत्सलं बुजे ॥ प्रसादकुरुमे देवश्रीर्यथा
मानमुचति ॥ ३० ॥ श्रीभैरव० ॥ माभैस्त्वं देवराजोच्चैः श्रियापूर्णो भविष्यसि ॥ ऋषयः सर्वदे
वाश्च निधयश्चाप्सरोगणाः ॥ ३१ ॥ बृहस्पतिपुरोगास्तन्नाचीदासन्नानावृता ॥ हयउच्चैः श्रवाश्चा
यंगजेंद्रो निजवाहनः ॥ ३२ ॥ एतच्च प्राप्यते सर्वं सर्वस्वं मत्प्रसादतः ॥ भवेदक्षयमेवाशु लंघ
निजमंदिरं ॥ ३३ ॥ इत्येवमुक्तस्तुष्टेन नृपेणापुरंदरो नारदतुंबरादयैः ॥ प्रस्तूयमानः शुशुभे सु
रावृतः पुरोगमानंकुसुमैर्दिवश्च्युतैः ॥ ३४ ॥ ऐरावतंदेवगजेंद्रमुच्चकैः श्रियासमामंत्रितमार
रोहसः ॥ ननः सर्वदेवगणाः प्रणेमुः स्तुत्सुरार्चितं ॥ तुष्टुवुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः ॥ ३५ ॥
जयशब्दं चकारोच्चैः पुरोधास्तदनंतरं ॥ न्यानुषक्तयासार्धंययौनाकंपुरंदरः ॥ ३७ ॥ शौनक०
इदमाख्यानकं दिव्यं पुरंदरजयावहं ॥ यः पठेच्छृणुयाद्वापि स संपद्भिर्नियुज्यते ॥ ३८ ॥ इति० द्वाद

स०उ०
१८

त्रोध्यायः ॥ १२ ॥ शौनकउ० ॥ गुहस्यचोत्तरेदेशेअस्तिदाक्ष्यपुरंमहत् ॥ तत्रतीर्थान्यनेक
निरामेणस्थापितानिच ॥ जगदुद्धारिणीवाद्धिसंयोगस्तीर्थराडभूत् ॥ २ ॥ ऋषयउ० ॥ कथं
सतीर्थराजोहिजगदुद्धारिणीकथं ॥ तज्जन्मश्रोतुमिछामस्त्वत्तोब्रह्मविदांवर ॥ ३ ॥ शौनक०
तीर्थराजस्यमाहात्म्यंकिंचिद्वक्ष्यामिभूसुराः ॥ जामदग्न्यस्यतुह्यर्थमागतास्तेऋषेदेवताः ॥ ४ ॥
स्वांशेनैवहिसर्वाणि तीर्थानिविविधानिच ॥ जगदुद्धारिणीयोगेरेणुकेयोन्यवेशयत् ॥ ५ ॥
ततस्तन्मुक्तिदंक्षेत्रंतीर्थराडितिसंज्ञकं ॥ तत्रैतेऋषयः सर्वेदेवगंधर्वमानवाः ॥ ६ ॥ आश्र
मान्कल्पयित्वातेसुखंप्रापुः समाहिताः ॥ तस्यैवदक्षिणेभागेहनूमानेजनीसुतः ॥ ७ ॥ उद्दा
लकोनामऋषिर्धौम्योधनंजयस्तथा ॥ मधुच्छंदाजयश्चैतेगत्तदंडाः समावसन् ॥ ८ ॥ आं
जनिरवसद्यत्रतत्रतीर्थमनुत्तमं ॥ अंजनीवलयंनामतत्क्षेत्रंपुण्यदंस्मृतं ॥ ९ ॥ उद्दालकं

१८

केनमंत्रेणजितवानस्मितान्निपून्॥ तमहंनैवपश्यामिनारदंपितरंमम॥१२॥नारदंविना
देवदीनोस्मिकृपणोस्म्यहं॥ नान्यंनाथंप्रपश्यामिशरणंत्वांव्रजाम्यहं॥१३॥पुरंदरवचःश्रु
त्वानारदःप्रकटीभवत्॥ प्रणेमुर्देवताःसर्वादृष्ट्वाब्रह्मर्षिमागतं॥१४॥देवराजःप्रमुदितोद
ंडवत्पतितोभुवि॥ देवर्षेत्वांप्रपन्नोस्मिदीनोस्मिकृपणोस्म्यहं॥१५॥अनुकंपयमेनाथत्व
न्नाथेशरणागतं॥ ॥नारदोमाभैस्त्वंदेवदेवेनाभूतिहीनोसिसांप्रतं॥१६॥उपायंतेप्रव
क्ष्यामिगच्छशीघ्रंगुहाश्रमं॥ प्रपद्यस्वगुहंशीघ्रंवरदांबोचमातरं॥१७॥आपदुद्धरणंमंत्रं
प्रपद्यस्वमहामते॥१८॥ताभ्यांकृतप्रसादःसन्गच्छकुंडंविभूतिदं॥पुनःसंयोक्ष्यसे
स्वाभिर्विभूतीभिर्नसंशयः॥१९॥ तत्राश्रमपदंकृत्वासमाराधयशंकरं॥२९॥आपदु
द्धरणंदेवंभैरवंबटुकाभिधं॥ तत्रतुष्टोदेवदेवोविभूतिंतेप्रदास्यति॥२०॥नारदस्यवचः

इतिज्ञात्वामुनिश्रेष्ठोजग्राहनियमंत्विमं। भुक्तिमुक्तिप्रदेरम्येक्षेत्रेनित्यंवसाम्यहं १९ एवं
सक्षेत्रसंन्यासंगृहीत्वातत्रसंस्थितः। गंगावगाहनेच्छाचऋषेर्दाल्भ्यस्यचाजनि २० तस्य
त्वपूर्वनियमादिच्छाचविफलाह्यभूत्। तदर्थंपुलिनेरम्येतपस्तेपेसुदुश्चरं २१ शौनक० ए
तस्मिन्नंतरेविप्राभार्गवोजगदीश्वरः। जगदुद्धारिणीयोगेसर्वतीर्थमयेकिल २२ स्नातुम
भ्याययौतत्ररेणुकानंदवर्धनः। तंदृष्ट्वामुनयःसर्वेप्रणेमुश्चपुनःपुनः २३ बभाषेतानृषी
न्रामःश्लक्ष्णंमधुरयागिरा। यूयंजनाऋषिगणाःकस्माद्दूरतस्त्वरिताः २४ शिष्याऊचुः
अस्माकंगुरुरेषोत्रगंगावगाहनेच्छया। तपतेपुलिनेचात्रतस्मात्खिन्नावयंविभो २५ इति
श्रुत्वाजामदग्न्योदाल्भ्यंप्राबोधयत्तदा। श्रीपर्शुरामउ०। मयानिधिपृथक्तेसुक्षेत्रंविनिर्मि
तंपुरा २६ प्रीत्यावगाहनेकारीगंगासमुद्रगामिनी। आसीदस्मुमयानीतामहानद्यश्चतु

दंत्री २७ सागरोच्छ्वासजंस्रोतोयावद्व्रजतिसुव्रत तत्रतीर्थन्यनेकानिनवखंडगतानिच २८
अस्थापिमामकेक्षेत्रेसह्यखंडेस्तुखंडिते दक्षिणंबालखंडंचतथाचकरहाटकं २९ ततो
दग्वरहाटंचआर्यावर्ततुमध्यकं उत्तरंनागरंखंडंदमनंचततःपरं ३० सौम्यमुत्तरमेवंच
सप्तखंडान्यनुक्रमात् ईशान्येवरहाटस्यशास्त्रीसौर्यश्चिसंगमे ३१ प्रयागस्थानितो
थानित्रिवेणीत्रभृतीनितु संस्थाप्यचमयाहूतास्त्विदशास्तत्रवासिनः ३२ स्वांशैरवस्थि
तान्नूनंतत्रयागंबभूवह शास्त्युत्तरंतोयावत्सावित्रीसिंधुसंगमः ३३ आर्यावर्तोना
मदेशस्तत्रमेचित्तपूरणं आसीत्तस्मादयंदेशश्चित्तपूर्णाभिधोभवत् ३४ तत्राहंसुरव
मापन्नोमहेंद्रेनिवसाम्यहं तस्येवोपत्यकायांतुत्रिवनद्याश्चसंगमः ३५ वासिष्ठासंग
मोयावत्संचक्रोत्रीतिकीर्त्यते अपरेधौतपापाच्चपूर्वस्माच्चार्जुनीस्थिता ३६ तत्रतीर्थं

न्येनकानि अविमुक्तास्थितानिहि अंत्रोरेवसमानीयस्थापितानिपृथकपृथक ३८
कान्तीक्षेत्रमिदंपुण्यंचतुर्वर्गफलप्रदं आर्यावर्तस्यवायव्यांनेऋत्येनागरस्यच ३९ तस्मि
न्क्षेत्रमयापूर्वंतीर्थानिस्थापितानितु विष्णुपदानिसर्वाणिसावित्रीसिंधुसंगमे ४०
गायत्रीचास्थितातत्रमुकुतीर्थमनुत्तमं मुक्तिदंपरमंक्षेत्रंपितृसंतोषकंपरं ४१ तत्रैव
चहुते दत्तंचाक्षय्यफलमश्नुते कदाचिच्चतपस्तप्तुंदुरदृष्टेनप्रेरितोस्म्यहं ४२ पितृ
संतर्पणार्थायगतोस्मिसागरांतिकं क्षेत्रंतद्विजनेदृष्ट्वाचैवंहृदिविभावितं ४३ तपस्त
प्तासृजद्ब्रह्माब्राह्मणान्वेदगुप्तये तत्सर्थंपितृदेवानांधर्मसंरक्षणायच ४४ सर्वस्य
प्रभवोविप्रास्तेदधानाः कृतिंमम अतस्तत्कार्यसिध्यर्थंतपस्तप्तंसुदुश्चरं ४५ त
तोमेतप्यमानस्यरुद्रःकामानपूर्यत इत्यादि० श्रीस्कांदेस० चतुर्दशोध्यायः १४

तपस्यंतंदृष्ट्वावैभगवान्हरः॥आविरभूत्स्वयंतत्रनाम्नाचोद्दालकेश्वरः॥१०॥प्रोवाचभ
गवान्रुद्रस्तमृषिंसंस्थितव्रतं॥किमर्थंतप्यसेचात्रतद्ब्रूहिमुनिपुंगव॥११॥विनाकर्मविना
धर्मंविनापूजांविनाध्वरं॥त्वदर्शनमात्रेणकृतकृत्योभवेज्जनः॥१२॥तदर्थमिहतप्यामि
स्त्रिवदर्शनलोलुपः॥त्वदर्शनादृतेनार्थमन्यमीहेमहेश्वर॥१३॥अधुनाकृतकृत्योहिमोय
तोनुग्रहीतवान्॥उद्दालकेश्वर॥त्वन्नाम्नात्रभवंविद्धित्वद्भक्तिभावभावितः॥१४॥यद्यदि
च्छसिविप्रर्षेतन्मेवाच्यंसुव्रत॥उद्दालकस्त्विदंवाचेजप्तंस्थेयमुमापते॥१५॥तथोक्तोभग
वाञ्छंभुःसगणस्तत्रसंस्थितः॥तस्यदर्शनमात्रेणचोपपापात्प्रमुच्यते॥१६॥नैमिषेयक॥ती
र्थराडुत्तरंक्षेत्रंधर्मार्थकाममोक्षदं॥दात्तभेद्यृषिवरस्तत्रतीर्थविगाहनेच्छया॥१७॥अ
न्येभ्यऋषिभिःसार्धंक्षेत्रेस्मिन्संस्थितःस्वयं॥सर्वतीर्थमयंक्षेत्रंपुरुषार्थप्रसाधनं॥१८

क्षाद्दुरुशिष्योपरस्परं पद्मोमासहितोतोहिस्वगणैःपरिवेष्टितो १० स्थितानतावयंसर्वे
निशामःसुचिरंसुखं तप्यतांचारणंतंवैयूयंतंचादिपूरुषं ११ सएषभवतांसद्यस्तत्र
श्रेयःप्रदास्यति इतिदेवोवचःश्रुत्वाऋषिसंघसमावृतः १२ तथाषष्टिकुलैर्युक्तः सच
तुर्दशगोत्रकैः ऋषिभिःसत्रनिष्ठश्चकश्यपःसत्रदीक्षितः १३ तपस्यंतंजामदग्न्यं
ब्रह्मविष्णुशिवात्मकं तप्तकांचनसंकाशंसर्वाभरणभूषितं १४ तंभक्तवत्सलंदेवं
दत्तावतारधारिणं कृतांजलिपुटोभूत्वाऋषिःस्तोतुंप्रचक्रमे १५ ततस्तुष्टोह्यहंदे
वमब्रुवंनतिपूर्वकं भवदागमनात्तुष्टश्चेष्टमेसफलाह्यभूत् १६ धन्यंचमामकंक्षेत्रं
तेनतुष्टियाताश्चपूर्वजाः तपःसिद्धिश्चसंजाताचित्तस्यपावनंतथा १७ अथऋषि
गणाः सर्वेयूयंवैचित्तपावनाः भवतामीप्सितंयद्यद्गृणुध्वंप्रार्थयामिवः १८

ततस्तेब्राह्मणाएवमब्रुवंस्तपसांनिधे ॥ यज्ञस्यफलदातात्वंसाक्षाद्यज्ञस्वरूपवान् १९
यस्माद्यज्ञश्चसंजातावर्णगावस्तथायतः ॥ वेदायतःसमुद्भूतायतश्छंदांस्यजायत २०
सआदिपुरुषः साक्षात्त्वमेवजगदीश्वरः ॥ त्वद्भूतिनाद्वयंजाताः सत्रस्यफलभागिनः २१
ज्ञानंचनिर्मलंप्राप्यस्वर्गोदृष्टस्त्वयिप्रभो ॥ स्वर्गप्राप्तेस्त्वंप्राप्तिःसुखदामृतदायिका २२
अतोवृणीमस्त्वत्तावद्वरंयासस्त्ववांतिके ॥ त्वंवभजनेनित्यंतथात्वांघ्रिपूजने २३ अ
नुकंपाचतेस्माभुअधुनेवास्तुनःसदा ॥ तथेत्युक्ताततस्तूर्णमृषिभिस्तैःसमावृतः २४
आगतोहंमहेंद्रेचजगदुद्धारिणीतटे ॥ तत्रतेऋषयः पूर्वंस्थापितागृहमेधिनः २५ क
श्यपोत्रिर्भरद्वाजोजामदग्न्यानितुदनाः ॥ वत्साश्चविश्वमृद्गाश्चवासिष्ठाःकपयस्तथा
२६ गौडिल्याः कौत्सिकाश्चैवबाभ्रव्यागार्ग्यसंज्ञकाः ॥ कौडिन्याश्चैवतेविप्रास्तस्तेत्रे


निवसंतिहि २७ सुखिनोहर्षयुक्ताश्चवेदाध्ययनतत्पराः षट्कर्मनिरतानूनंमहाय
ज्ञक्रियापराः २८ तेषुखेदःकथंतेत्रमनीषाविफलाकथं तद्वदस्वमहाभागनाम्नि
द्धिकरवाणिहि २९ दाल्भ्यउवाच सर्वतीर्थाधिकंतीर्थमन्नाम्निजगदीश्वर त्वमेव
विष्णुः साक्षाद्विगंगाविष्णुपदीत्विये ३० त्वयिमेसंमतिर्जातागंगास्नानात्मिकापु
नः तदर्थंनुनपस्तप्तंसर्वज्ञस्त्वंविभोह्यसि ३१ श्रीभार्गवराम० जटाजूटधृताप्
र्वंत्रिस्रोताचोग्रकर्मणा रुद्रेणकृपयास्वल्पो त्सृष्टाभगीरथस्यच ३२ तेरुद्रंप्रार्थयि
त्वातामानयिष्येतवांतिकं इत्युक्त्वाभगवानरामस्तत्रैवांतरधीयत ३३ इतिश्रीस्कं
दपुराणेसह्याद्रेउत्तरार्द्धेइक्षुपातरामक्षेत्रवर्णनंनामपंचदशोध्यायः समाप्तश्चा

रामउ० गंगायमुनयोर्मध्येऋषयःसत्रमासत ॥ अप्राप्यस्वर्गलोकास्तेदेवैस्तुष्टुवुर्मुने १
विप्ररूपेणरुद्रोवाआगत्यप्राहतान्मुनीन् ॥ यूयंसर्वेस्वर्गकामाजामदग्न्यस्यतप्यतः २ एत
त्क्षेत्रंचेषुपातमधिगम्यमहत्तरं ॥ संतुष्टोभवतांकामं विधास्यतिनसंशयः ॥ ३ ॥ इत्येवंविप्र
वाक्यमुक्त्वासर्वेसदासितसराः ॥ आगत्यमामकंस्थानंसत्रमारेभिरेपुनः ॥ ४ यजनीयामरा
सर्वेतत्रतेदद्दशुर्भृगवे ॥ आश्चर्यपरमंप्राप्यविस्मिताश्चक्षणंपुनः ॥ ५ ॥ इंद्राद्यादेवताः सर्वाः
पूजयामासुरर्हणैः ॥ कृतांजलिपुटाः सर्वेनमस्कृत्वायथाविधि ६ ॥ ऋषयस्तान्सुरान्प्राहुर्वे
यंस्वर्गस्यकांक्षिणः ॥ भवंतोयांतिनः सर्वेकथयागंतुमर्हथ ॥ ७ ॥ देवाऊचुः ॥ रेणुकेयेन
हरिणात्रिलोकीस्थितिकारिणा ॥ बलेनतपसारुद्रात्रिष्येणामिततेजसा ॥ ८ ॥ निर्मितंचेषु
पातारंक्षेत्रंश्रेष्ठंसुरैरपि ॥ नाकाधिकतरंनित्यंसुसर्वैर्निषेवितं ॥ ९ ॥ तत्रहरिहरौसा

॥ येसह्याद्रिखंडः ॥ श्रीभार्गवरामब्रह्मार्पणमस्तु ॥ श्रीमन्मंगलमूर्तयेनमः ॥
॥ श्रीः ॥ ग्रंथसंख्या पूर्वार्द्ध उ० ८०५० ॥ इहाध्यायाः १२४ ॥ श्रीरस्तु ॥

स०उ०
२३

ह०पत्रांक ३६९ उ०प्र० २३ दि० ३९१



३९